केन्द्रीय माध्यमिक शिक्षा बोर्ड, नई दिल्ली के निर्धारित पाठ्यक्रमानुसार

*सरस्वती*

# संस्कृत व्याकरण

[दसवीं कक्षा के विद्यार्थियों के लिए]

## शेमुषी एवं व्याकरणवीथिः पर आधारित

लेखक
**हरि ओइम् शास्त्री**
*एम०ए० (संस्कृत-हिन्दी), बी०एड्०*

**न्यू सरस्वती हाउस ( इंडिया ) प्रा०लि०**
नई दिल्ली-110002

NEW SARASWATI HOUSE

Second Floor, MGM Tower, 19 Ansari Road, Daryaganj, New Delhi-110002 (India)
**Phone** : +91-11-43556600
**Fax** : +91-11-43556688
**E-mail** : delhi@saraswatihouse.com
**Website** : www.saraswatihouse.com
**CIN** : U22110DL2013PTC262320
Import-Export Licence No. 0513086293

**Branches:**

- Ahmedabad (079) 22160722 • Bengaluru (080) 26619880, 26676396
- Bhopal +91-7554003654 • Chennai (044) 28416531 • Dehradun 09837452852
- Guwahati (0361) 2457198 • Hyderabad (040) 42615566 • Jaipur (0141) 4006022
- Jalandhar (0181) 4642600, 4643600 • Kochi (0484) 4033369 • Kolkata (033) 40042314
- Lucknow (0522) 4062517 • Mumbai (022) 28737050, 28737090
- Nagpur +91-7066149006 • Patna (0612) 2275403 • Ranchi (0651) 2244654

*First edition 2019*

**ISBN:** 978-93-5362-005-9

**Published by:** New Saraswati House (India) Pvt. Ltd.
19 Ansari Road, Daryaganj, New Delhi-110002 (India)

The moral rights of the author has been asserted.

©Reserved with the Publishers

All rights reserved under the Copyright Act. No part of this publication may be reproduced, transcribed, transmitted, stored in a retrieval system or translated into any language or computer, in any form or by any means, electronic, mechanical, magnetic, optical, chemical, manual, photocopy or otherwise without the prior permission of the copyright owner. Any person who does any unauthorised act in relation to this publication may be liable to criminal prosecution and civil claims for damages.

**Printed at:** Vikas Publishing House Pvt. Ltd., Sahibabad (Uttar Pradesh)

**Product Code:** NSS3SVS100SKTAA18CBN

This book is meant for educational and learning purposes. The author(s) of the book has/have taken all reasonable care to ensure that the contents of the book do not violate any copyright or other intellectual property rights of any person in any manner whatsoever. In the event the author(s) has/have been unable to track any source and if any copyright has been inadvertently infringed, please notify the publisher in writing for any corrective action.

# प्राक्कथनम्

'संस्कृतम्' भारतस्य आत्मा अस्ति। यथा आत्मानं विना कश्चिदपि जनः जीवितो न कथ्यते तथैव संस्कृतं विना भारतस्यापि कल्पना कर्तुं न शक्यते।

संस्कृतस्य प्रचाराय-प्रसाराय भारते अनेके जनाः, अनेकं सङ्गठनं अनेकाः संस्थाश्च प्राणपणेन एतस्मिन् पुण्यकार्ये संलग्नाः वर्तन्ते। यतः भारतस्य प्राचीनं समस्तं ज्ञानं-विज्ञानम्-ऐश्वर्यम्-उपासना-इतिहासः-दर्शनं विशालाश्च वैदिक-परम्पराः संस्कृतभाषायामेव सन्ति। तेनैव भारतं '**विश्वगुरुः**' इति उपाधिना विभूषते।

अद्यापि यदा भारतीयाः वैदेशिकाः वा प्राचीनं रागं, गीतं, सामवेदस्य मन्त्रान् शृण्वन्ति, अद्भुत्-फलयुक्तम् आयुर्वेदस्य विषये पठन्ति तस्य च औषधीः उपभोज्य स्वस्थाः भवन्ति, दूरदर्शने अद्भुतं रामायण-महाभारतयोः युद्धं कथाञ्च पश्यन्ति। जनाः आग्नेयास्त्र-वरुणास्त्र-पाशुपतास्त्र-वायव्यास्त्र-सर्पास्त्र-सरथ-आकाश-गमनं, पुष्पकविमानः भगवतः श्रीकृष्णस्य च सुदर्शन चक्रादीनां विषये यदा पठन्ति, शृण्वन्ति पश्यन्ति तदा भावविभोराः भूत्वा भारतीय संस्कृतिं संस्कृतञ्च प्रति नतमस्तकाः भवन्ति।

इयं वार्ता कष्टकरी वर्तते यत् वैदेशिकाणां कुचक्रेण प्रभाविताः भूत्वा अस्माकं केचिद् लेखकाः-कवयः-पत्रकाराः-चिन्तकाः, वाचकाः, बान्धवः स्वसंस्कृतेः प्राचीनगौरवस्य उपहासं कृत्वा करणे वा आत्मगौरवं मन्यन्ते स्म। अद्यापि इयं प्रवृत्तिः कुत्रचिद् दृश्यते एव।

परं सौभाग्यवशात् शनैः-शनैः जनानाम् इदं चिन्तनं परिवर्तते। परं यावत् संस्कृतभाषायाः पठन-पाठनं धनोपार्जनोन्मुखी न भविष्यति तावत् अस्मिन् क्षेत्रे पर्याप्ता सफलता न अधिगमिष्यति। भारतीय शासनेन एतत्कृते अवश्यमेव प्रयत्नं कर्तव्यम्। तदैव वास्तविक रूपे तत् शासनं भारतीयाणां कथयितुं शक्ष्यते।

केषाञ्चिद् विदुषां भारत-संस्कृतेः प्रवीणानाञ्च प्रयत्नेन **केन्द्रीय माध्यमिक शिक्षा परिषद् (बोर्ड)** सङ्गठनमपि समये-समये संस्कृतभाषायाः पठन-पाठन संवर्धनाय प्रयत्नानि विधीयते। पूर्वं यदा सम्प्रेषणात्मिकी-प्रणाली भाषायामारब्धा तदापि के०मा०शि०बो० इति सङ्गठनेन संस्कृतभाषायाः पठन-पाठनस्य कृते प्रशंसात्मकं प्रयासं कृतम्। तस्याः प्रणाल्याः माध्यमेन संस्कृतस्य पठने-पाठने च अतीव सरलता आगता। अस्यैव परिणामः इदं नवीनं पुस्तकं वर्तते। पूज्य शिक्षक महानुभावेभ्यः मया स्व प्रियमित्राणां प्रकाशकाणाम् अथक प्रयत्नैः कार्यं कृत्वा इदं पुस्तकं भवत्सेवायां प्रस्तूयते। आशास्ये यत् भवतामाशीर्वादं, सहयोगं मार्गदर्शनञ्च यथासमयं मह्यं प्राप्स्यन्ते।

अन्ते च एतस्मिन् दुस्साध्यकार्ये परमपिता परमात्मनः आशीर्वादं एवं **पूज्य गुरुवर स्व० आचार्य सत्यदेव विद्यालंकार महाभागानां** परोक्ष मार्गदर्शनम् अस्ति। तेषाम् आशीर्वादेन एव इदं श्रमसाध्यं कार्यं सिद्धं जातम्। अतः एतेभ्यः महानुभावेभ्यः भूरिशां कृतज्ञतां ज्ञापयामि।

**—लेखकः**

# संस्कृतस्य पाठ्यक्रमः ( कोड नं. 122 )

## कक्षा–दशमी

80 अङ्काः

## खण्डः 'क'–अपठित-अवबोधनम्

**एकः गद्यात्मकः खण्डः**

**80-100 शब्दपरिमितः गद्यांशः सरलकथा वर्णनम् वा**

- ❖ एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम्
- ❖ अनुच्छेद-आधारितम् भाषिकं कार्यम् (MCQ)

**भाषिककार्याय तत्त्वानि**

- ❖ वाक्ये कर्तृ-क्रिया पदचयनम्
- ❖ कर्तृ-क्रिया-अन्वितिः
- ❖ विशेषण-विशेष्य चयनम्
- ❖ सर्वनामप्रयोगः
- ❖ पर्याय-विलोमपद-चयनम्

## खण्डः 'ख'– रचनात्मकं-कार्यम्

**(*i*) सङ्केताधारितम् औपचारिकं अथवा अनौपचारिकं पत्रम्**

**(*ii*) चित्राधारितम् वर्णनम् अथवा अनुच्छेदलेखनम्**

**(*iii*) संस्कृतभाषायाम् अनुवाद कार्यम्**

## खण्डः 'ग'–अनुप्रयुक्त-व्याकरणम्

**शेमुषी–अभ्यासपुस्तक-आधारितम्**

**1. सन्धिकार्यम्**

- ❖ स्वरसन्धिः – दीर्घः, गुणः, वृद्धिः, यण्, अयादिः, पूर्वरूपम्
- ❖ व्यञ्जनसन्धिः – परसवर्ण, छत्वं, तुकागमः, मोनुस्वारः वर्गीयप्रथमाक्षराणां तृतीयवर्णे परिवर्तनम्, प्रथमवर्णस्य पंचमवर्णे परिवर्तनम्
- ❖ विसर्गसन्धिः – विसर्गस्य उत्वं, रत्वम्, विसर्गलोपः, विसर्गस्य स्थाने स्, श्, ष्।

**2. समासः वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां च समासः**

- ❖ तत्पुरुषः – विभक्तिः, नञ्, उपपदः
- ❖ कर्मधारयः – द्विगुः, द्वन्द्वः, बहुव्रीहिः (समानाधिकरण), अव्ययीभावः अनु, उप, स, निर्, प्रति, यथा

**3. प्रत्ययाः**

- ❖ कृदन्ताः – तव्यत्, अनीयर्, शतृ, शानच्
- ❖ तद्धिताः – मतुप्, इन्, ठक्, त्व, तल्
- ❖ स्त्रीप्रत्ययौ – टाप्, ङीप्

4. **वाच्यपरिवर्तनम्–केवलं लट्लकारे कर्तृ–कर्म–क्रिया**

5. **समयः – अङ्कानां स्थाने शब्देषु समयलेखनम्**

सामान्य – सपाद - सार्ध - पादोन

6. **अव्ययपदानि**

अपि, इव, उच्चैः, एव, नूनम्, पुरा, इतस्ततः, अत्र-तत्र, इदानीम्, यथा–तथा, विना, सहसा, अधुना, वृथा, शनैः, इति, कदा, कुतः, मा, यत्, यत्र–कुत्र, सम्प्रति, यदा–कदा, यावत्, श्वः, ह्यः, बहिः, कदापि, किमर्थम्।

7. **अशुद्धि-संशोधनम् – वचन – लिंग – पुरुष – लकार दृष्ट्या वाक्येषु संशोधनम्**

## खण्डः 'घ'–पठित-अवबोधनम्

1. **पाठ्यपुस्तकस्य सामग्रीम् अधिकृत्य अवबोधनात्मकं कार्यम्**

(अ) गद्यांशः (आ) पद्यांशः (इ) नाट्यांशः

**प्रश्नप्रकाराः** – एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि, भाषिककार्यम् च।

2. **श्लोकान्वयः रिक्तस्थानपूर्तिद्वारा**

3. **वाक्येषु रेखाङ्कितपदानि अधिकृत्य पंच प्रश्नानां निर्माणम्।**

4. **शब्दार्थाः**

सन्दर्भे शब्दप्रयोगद्वारा शब्दार्थमेलनद्वारा वा

बहुविकल्पात्मकाः / ल०उ० प्रश्नाः

5. **घटनाक्रमानुसारं कथालेखनम्**

**पुस्तकम्**–'शेमुषी' संस्कृत-पाठ्यपुस्तकम् द्वितीयः भागः (दशमश्रेण्यै)

## पाठानां नामानि

| पाठसङ्ख्या | पाठनाम |
|---|---|
| प्रथमः पाठः | शुचिपर्यावरणम् |
| द्वितीयः पाठः | बुद्धिर्बलवती सदा |
| तृतीयः पाठः | व्यायामः सर्वदा पथ्यः |
| चतुर्थः पाठः | शिशुलालनम् |
| पञ्चमः पाठः | जननी तुल्यवत्सला |
| षष्ठः पाठः | सुभाषितानि |
| सप्तमः पाठः | सौहार्दं प्रकृतेः शोभा |
| अष्टमः पाठः | विचित्रः साक्षी |
| नवमः पाठः | सूक्तयः |
| दशमः पाठः | भूकम्पविभीषिका |
| एकादशः पाठः | प्राणेभ्योऽपि प्रियः सुहृद् |
| द्वादशः पाठः | अन्योक्तयः |

# संस्कृतम् सम्प्रेषणात्मकम् ( कोड नं. 122 )

## कक्षा–दशमी

'क' खण्ड: अपठित-अवबोधनम्

'ख' खण्ड: रचनात्मक-कार्यम्

'ग' खण्ड: अनुप्रयुक्त-व्याकरणम्

'घ' खण्ड: पठित-अवबोधनम्

| खण्ड: | विषया: | प्रश्नप्रकारा: |
|---|---|---|
| 'क' | अपठित-अवबोधनम् | |
| 1. | एक: गद्यांश:/ अनुच्छेद: 80–100 शब्दपरिमित: | अति-लघूत्तरात्मका: पूर्णवाक्यात्मका:<br>लघूत्तरात्मका: (भाषिककार्यम्) |
| | कुल भार | |
| 'ख' | रचनात्मक-कार्यम् | |
| 2. | औपचारिकं अथवा अनौपचारिकं पत्रम् | निबन्धात्मक: |
| 3. | चित्रवर्णनम् अथवा अनुच्छेदलेखनम् | निबन्धात्मक: |
| 4. | संस्कृतभाषायाम् अनुवाद कार्यम् | निबन्धात्मक: |
| | पूर्ण भार | |
| 'ग' | अनुप्रयुक्त-व्याकरणम् | |
| 5. | सन्धि: | लघूत्तरात्मका:/ब०वि० |
| 6. | समास: | बहुविकल्पात्मक:/ल०उ० |
| 7. | प्रत्यया: | बहुविकल्पात्मक:/ल०उ० |
| 8. | वाच्यप्रकरणम् | लघूत्तरात्मका:/ ब०वि० |
| 9. | समय: | लघूत्तरात्मका:/ ब०वि० |
| 10. | अव्ययपदानि | लघूत्तरात्मका:/ ब०वि० |
| 11. | संशोधनकार्यम् | बहुविकल्पात्मक:/ल०उ० |
| | कुल भार | |

| 'घ' | पठित-अवबोधनम् | |
|---|---|---|
| 12(अ) | गद्यांश: | ब०वि०/ल०उ० |
| (आ) | पद्यांश: | ब०वि०/ल०उ० |
| (इ) | नाट्यांश: | ब०वि०/ल०उ० |
| 13. | श्लोकान्वय: | ल०उ०/ब०वि० |
| 14. | प्रश्न-निर्माणम् | ल०उ०/ब०वि० |
| 15. | शब्दार्थमेलनम् | ब०वि०/लघूत्तरात्मकम् |
| | कुल भार | |

**सम्पूर्णभार: 80**

# विषय-सूची


**खण्डः 'क' ( अपठित-अवबोधनम् )** **1–54**

एकः सरलगद्यांशः (80-100 शब्दपरिमितः गद्यांशः) 3–48

• अपठित-अवबोधनस्य विचारबिन्दवः 49–54

**खण्डः 'ख' ( रचनात्मकं कार्यम् )** **55–132**

**ख1.** सङ्केताधारितम् औपचारिक/अनौपचारिकपत्रम् 57–82

**ख2.** लघुकथा/अनुच्छेदलेखनम् 83–99

**अथवा**

चित्राधारितम् वर्णनम् 100–122

**ख3.** संस्कृत भाषायाम् अनुवाद कार्यम् 123–124

• रचनात्मकं कार्यस्य विचारबिन्दवः 125–132

**खण्डः 'ग' ( अनुप्रयुक्त-व्याकरणम् )** **133–330**

**ग1.** सन्धिकार्यम् 135–157

**ग2.** समासकार्यम् 158–182

**ग3.** प्रत्ययाः 183–232

**ग4.** अव्ययाः 233–254

**ग5.** वाच्यपरिवर्तनम् (केवलं लट्लकारे) 255–278

**ग6.** समय-लेखनम् 279–294

**ग7.** वचन-लिङ्ग-पुरुष-लकार दृष्ट्या वाक्य संशोधनम् 295–312

• अनुप्रयुक्त व्याकरणस्य विचारबिन्दवः 313–330

❖ **प्रश्नपत्रम् ( अभ्यास-प्रश्नपत्रम् )** **331–350**

# खण्डः 'क'–अपठित-अवबोधनम्

(सरल-गद्यांशम् आधारितं कार्यम्–प्रश्नोत्तराणि)

**एकः सरलगद्यांशः ( 80–100 शब्दपरिमितः गद्यांशः )**

**( सरलकथा घटनावर्णनम् वा )–**

- एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि
- समुचितशीर्षकप्रदानम्
- भाषिककार्यम्

  (विशेषण-विशेष्य, कर्त्ता-क्रिया-अन्वितिः, पर्यायवाचिनः, विलोमशब्दाः, संज्ञास्थाने सर्वनामप्रयोगः)

**आवश्यक बिन्दु–**

1. अपठित गद्यांश तथा श्लोक को पहले दो-तीन बार अच्छी तरह पढ़ना चाहिए, फिर उत्तर लिखना चाहिए।
2. यदि शब्दों का अर्थ स्पष्ट न हो तो उन वाक्यों को ध्यान से पढ़ना चाहिए, जिनमें उक्त शब्दों का प्रयोग हुआ है तथा शब्द का भाव ग्रहण करने का प्रयत्न करना चाहिए।
3. अपठित गद्यांश तथा श्लोक में दिए गए अव्ययों और विभक्तियों को विशेष ध्यान से पढ़ें क्योंकि इनका अर्थ ज्ञात न होने से उत्तर प्रायः अशुद्ध हो सकता है।
4. गद्यांश के आधार पर पूछे जाने वाले प्रश्नों के अलावा अलग से एक प्रश्न **'शीर्षको दीयताम्'** अर्थात् **'उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत'** होता है। इसके लिए विद्यार्थी उस अंश को पूरा पढ़कर और सोचकर छोटा और सारयुक्त शीर्षक चुनें जिसमें अंश का सम्पूर्ण भाव निहित हो।
5. रिक्त स्थान की पूर्ति से पहले सम्बन्धित वाक्य को ध्यान से पढ़ना चाहिए तथा उचित शब्द चयन करने पर ही रिक्त स्थान की पूर्ति करनी चाहिए।

# क अपठित-अवबोधनम्

## गद्यांशः

गद्यांश के प्रश्नों के उत्तर लिखने से पहले निम्नलिखित बातों का ध्यान रखना आवश्यक है—

- सबसे पहले दिए गए गद्यांश को तीन-चार बार पढ़ना चाहिए।
- गद्यांश में दिए गए अव्ययों तथा विभक्तियों का पूर्ण ध्यान रखना चाहिए।
- किसी शब्द का अर्थ स्पष्ट न होने की स्थिति में पूरे वाक्य (जिस वाक्य में शब्द दिया गया है) को ध्यान से पढ़कर शब्द का भाव ग्रहण करना चाहिए।
- सार्थक शीर्षक गद्यांश के किसी वाक्य या श्लोक की किसी एक प्रसिद्ध पंक्ति में ही निहित होता है।
- व्याकरणिक प्रश्नों का उत्तर देने से पहले उस वाक्य को ध्यान से पढ़ लेना चाहिए, जिस वाक्य से उक्त व्याकरणिक शब्द लिया गया है; यथा—"**साधोः आचरणं विशुद्धं विनम्रतामयं च भवितव्यम्।**" यदि यहाँ पर प्रश्न किया जाता है कि दिए गए वाक्य में '**साधोः**' शब्द में किस विभक्ति का प्रयोग किया गया है तो **षष्ठी विभक्ति** ही लिखनी चाहिए, **पञ्चमी** नहीं, क्योंकि दिए गए वाक्य का अर्थ षष्ठी विभक्ति में है, पञ्चमी में नहीं।

## एकः सरलगद्यांशः (80–100 शब्दपरिमितः गद्यांशः)

### उदाहरणार्थम्

**निम्नलिखितं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

**1**

भारतस्य अन्तरिक्षानुसंधानसंस्थानम् (इसरो ISRO)। अस्माकम् उच्च-मस्तकं वर्तते। तेनैव कारणेन भारतम् आत्मानं गर्वान्वितं गौरवान्वितश्च अनुभूयते। अन्तरिक्ष अनुसंधान-क्षेत्रे इसरो संस्थायाः वैज्ञानिकाः दिन-प्रतिदिनमेव प्रगतेः सोपानात्सोपानम् आरुह्यन्ते। भारतीय-रक्षा-विज्ञान-वातावरण-आर्थिक-शिक्षादिषु क्षेत्रेषु अन्तरिक्षयानानां माध्यमेन अतीव प्रगतिः भारतदेशेन कृता। न केवलं देशार्थमेव परमधुना अस्माकम् अन्तरिक्षवैज्ञानिकाः समस्त दक्षिण-पूर्व-एशिया क्षेत्रार्थमपि अन्तरिक्षयानानि अक्षिपन्। अनेन प्रकारेण भारतीयाः वैज्ञानिकाः तेषां देशानां हितार्थं प्रगत्यर्थं च स्वयोगदानं दत्तवन्तः।

अधुना तु भारतदेशः सर्वेषु क्षेत्रेषु स्वान्तरिक्षयानैः अग्रणी शक्तिशाली च वर्तते। अनेन कारणेन अस्माकं प्रतिवेशिकाः देशाः अपि यथासमयं भारतस्य वैज्ञानिकक्षेत्रे नेतृत्वम् इच्छन्ति। आशास्यामहे यद् भविष्ये अनेके देशाः अस्माकम् 'इसरो' संस्थानेन अन्तरिक्षक्षेत्रे लाभान्विताः भविष्यन्ति।

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) भारतीयान्तरिक्षानुसंधानसंस्थानम् संक्षेपेण किं कथ्यते?

**उत्तर :** इसरो।

(*ii*) अधुना कः देशः सर्वक्षेत्रेषु स्वान्तरिक्षयानैः अग्रणी वर्तते?

**उत्तर :** भारतदेशः।

(*iii*) भविष्ये के अस्माकम् 'इसरो' संस्थानेन अन्तरिक्षक्षेत्रे लाभान्विताः भविष्यन्ति?

**उत्तर :** अनेकदेशाः।

(*iv*) अस्माकम् उच्च-मस्तकं किं वर्तते?

**उत्तर :** इसरो।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) अधुना अस्माकम् अन्तरिक्षवैज्ञानिकाः किम् अकुर्वन्?

**उत्तर :** अधुना अस्माकम् अन्तरिक्षवैज्ञानिकाः समस्त-दक्षिण-पूर्व-एशिया क्षेत्रार्थमपि अन्तरिक्षयानानि अक्षिपन्।

(*ii*) कुत्र केषां च माध्यमेन भारतदेशेन अतीव प्रगतिः कृता?

**उत्तर :** भारतीय-रक्षा-विज्ञान-वातावरण-आर्थिक-शिक्षादिषु क्षेत्रेषु अन्तरिक्षयानानां माध्यमेन भारतदेशेन अतीव प्रगतिः कृता।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'भारतीयाः वैज्ञानिकाः' अनयोः पदयोः विशेषणपदं किम्?

(क) वैज्ञानिकाः (ख) वैज्ञानिकः (ग) भारतीयाः (घ) भारतीयः

**उत्तर :** (ग) भारतीयाः।

(*ii*) 'अतीव प्रगतिः भारतदेशेन कृता।' अत्र क्रियापदं किमस्ति?

(क) कृता (ख) प्रगतिः (ग) अतीव (घ) भारतदेशेन

**उत्तर :** (क) कृता।

(*iii*) अनुच्छेदे 'उन्नतिः' पदस्य कः पर्यायः आगतोऽस्ति?

(क) रक्षा (ख) प्रगतिः (ग) अग्रणी (घ) लाभ

**उत्तर :** (ख) प्रगतिः।

(*iv*) 'अस्माकं प्रातिवेशिकाः देशाः।' अत्र 'अस्माकम्' पदं केभ्यः आगतम्?

(क) जनेभ्यः (ख) विदेशीभ्यः (ग) ग्रामीणेभ्यः (घ) भारतीयेभ्यः

**उत्तर :** (घ) भारतीयेभ्यः।

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**उत्तर :** भारतीय-अन्तरिक्ष-अनुसंधान संस्थानम् / भारतीय-अन्तरिक्ष-अनुसंधान-संस्थानस्य प्रगतिः।

**2**

'स्वच्छता' दैवप्रसन्नतया सह संयुक्ता वर्तते। कथ्यते यत् यत्र स्वच्छता तत्र सौभाग्यम्। स्वच्छतया मानवोन्नतिः मानवप्रसन्नता च संयुक्ते वर्तेते। यत्र वातावरणे स्वच्छता भवति तत्र सर्वाः समृद्धयः वसन्ति। अस्वच्छता मानवेभ्यः केवलं दुःखमेव यच्छति तथा परिवारे, जीवने, समाजे, राष्ट्रे विश्वे वा दुःखं दारिद्रयञ्च वर्धते। अस्वच्छतया रुग्णता, उन्मत्ता, उच्छृंखलता, मानसिकी उद्विग्नता च जायन्ते। अतः स्वच्छता हितकारिणी अस्वच्छता च अहितकारिणी वर्तेते। 'स्वच्छतया एव मानवाः सुस्वास्थ्यम्,

आह्लादं मानसिकीं शान्तिं च लभन्ते। यत्र मालिन्यं भवति तत्र केवलं मानुषेषु एव न अपितु कीटेषु, पशुषु, वृक्षेषु चापि स्वास्थ्यं, परिवर्तनं, विकासः चैतन्यञ्च दुर्बलं भवन्ति। तेषां कृते प्रसन्नता, उन्नतिः विकासादयः अन्तर्हिताः भवन्ति। जीवने यत्र-तत्र-सर्वत्र कटुता, पीड़ा, दुर्बलता क्लेशाश्च वर्धन्ते। अतः स्वच्छता सर्वेभ्यः अनिवार्या वर्तते। 10

कथितमपि– **स्वच्छतायामीश्वरवासो भवति।**

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) 'स्वच्छता' कया सह संयुक्ता वर्तते?

**उत्तर :** दैवप्रसन्नतया।

(*ii*) का हितकारिणी वर्तते?

**उत्तर :** स्वच्छता।

(*iii*) स्वच्छतायां को भवति?

**उत्तर :** ईश्वरवासः।

(*iv*) यत्र स्वच्छता तत्र किम्?

**उत्तर :** सौभाग्यम्।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) स्वच्छतया एव मानवाः किं लभन्ते?

**उत्तर :** स्वच्छतया एव मानवाः सुस्वास्थ्यम्, आह्लादं मानसिकीं शान्तिं च लभन्ते।

(*ii*) अस्वच्छतया के जायन्ते?

**उत्तर :** अस्वच्छतया रुग्णता, उन्मत्ता, उच्छृंखलता मानसिकी उद्विग्नता च जायन्ते।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'अतः स्वच्छता सर्वेभ्यः अनिवार्या वर्तते'। अत्र कर्तृपदं किमस्ति?

(क) वर्तते (ख) स्वच्छता (ग) अनिवार्या (घ) सर्वेभ्यः

**उत्तर :** (ख) स्वच्छता।

(*ii*) 'स्वच्छता हितकारिणी' अनयोः पदयोः विशेष्यपदं किम्?

(क) स्वच्छता (ख) हितकारिणी (ग) स्वच्छः (घ) हितकारी

**उत्तर :** (क) स्वच्छता।

(*iii*) 'स्वच्छतायाम् ईश्वरवासो भवति'। अत्र वाक्ये क्रियापदं किं वर्तते?

(क) ईश्वरवासः (ख) ईश्वरवासो (ग) स्वच्छतायाम् (घ) भवति

**उत्तर :** (घ) भवति।

(*iv*) 'प्रसन्नताम्' इत्यस्य पदस्य अनुच्छेदे कः पर्यायः आगतः?

(क) शान्तिम् (ख) दुःखम् (ग) आह्लादम् (घ) कटुताम्

**उत्तर :** (ग) आह्लादम्।

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**उत्तर :** स्वच्छतायाम् ईश्वरवासो भवति।

3

अथ निरन्तरं वर्धमानेन प्रदूषणेन मानवजातिः विविधैः रोगैः आक्रान्ता दृश्यते। वैज्ञानिकाः अस्याः प्रदूषणसमस्यायाः समाधाने दिवानिशं प्रयतन्ते किन्तु यावद् देशस्य जनता पर्यावरणस्य रक्षणे कृतसंकल्पा न भविष्यति, तावद् इयं समस्या तथैव स्थास्यति। जनैः सम्यग् ज्ञातव्यं यत् पर्यावरणस्य रक्षणे एव अस्माकं रक्षणं भविष्यति। एतदर्थं स्थाने-स्थाने वृक्षाः रोपणीयाः। वनानां छेदनं रोद्धव्यम्। पवनः शुद्धः भवेत् एतदर्थं प्रयत्नः करणीयः। 'अन्यथा मानवजात्या सह सर्वं जगत् ध्वस्तं भविष्यति।'

वृक्षाः धरायाः सर्वोत्तमाः उपहाराः सन्ति, तेषाम् आरोपणं, वर्धनं, पालनं-पोषणं वा सर्वोत्तमं पुण्यं गण्यते। यदा जीवानाम् उपरि कापि दैवीया आपदा आगच्छति तदा इमे वृक्षाः एव तान् रक्षन्ति। अतः सदा शुभावसरे, व्रते पर्वणि वा वृक्षारोपणम् अवश्यमेव करणीयम्। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) वर्धमानेन प्रदूषणेन मानवजातिः कैः आक्रान्ता दृश्यते?

**उत्तर :** रोगैः।

(*ii*) वैज्ञानिकाः कस्याः समाधाने प्रयतन्ते?

**उत्तर :** प्रदूषणसमस्यायाः।

(*iii*) कस्य रक्षणे अस्माकं रक्षणं भविष्यति?

**उत्तर :** पर्यावरणस्य।

(*iv*) केषां छेदनं रोद्धव्यम्?

**उत्तर :** वनानाम्।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) जनैः पर्यावरणस्य रक्षणार्थं किं कर्त्तव्यम्?

**उत्तर :** जनैः सम्यग् ज्ञातव्यं यत् पर्यावरणस्य रक्षणे एव अस्माकं रक्षणं भविष्यति। एतदर्थं स्थाने-स्थाने वृक्षाः रोपणीयाः। वनानां छेदनं रोद्धव्यम्। पवनः शुद्धः भवेत् एतदर्थं प्रयत्नः करणीयः।

(*ii*) जनैः सम्यक् किं ज्ञातव्यम्?

**उत्तर :** जनैः सम्यक् ज्ञातव्यं यत् पर्यावरणस्य रक्षणे एव अस्माकं रक्षणं भविष्यति।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'तावद् इयं समस्या तथैव' इत्यत्र 'इयं समस्या' पदं कस्मै आगतम्?

(क) प्रदूषण-समस्यायै (ख) वन-समस्यायै (ग) पवन-समस्यायै (घ) ध्वनि-समस्यायै

**उत्तर :** (क) प्रदूषण-समस्यायै।

(*ii*) 'पर्यावरणस्य रक्षणे अस्माकं रक्षणं भविष्यति'। इत्यत्र 'अस्माकं' पदं केभ्यः प्रयुक्तम्?

(क) भारताय (ख) वृक्षेभ्यः (ग) जनेभ्यः (घ) देशेभ्यः

**उत्तर :** (ग) जनेभ्यः।

(*iii*) 'पवनः शुद्धः भवेत्'। अस्मिन् वाक्ये किम् विशेषणम्?

(क) पवनः (ख) शुद्धः (ग) उभौ (घ) भवेत्

**उत्तर :** (ख) शुद्धः।

(*iv*) 'अन्यथा मानवजात्या सह सर्वं जगत् ध्वस्तं भविष्यति।' अस्मिन् वाक्ये क्रियापदं किम्?

(क) अन्यथा (ख) भविष्यति (ग) ध्वस्तं (घ) सह

**उत्तर :** (ख) भविष्यति।

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**उत्तर :** प्रदूषणसमस्या।

## 4

पर्यटनं रोमाञ्चकारि भवति। प्रियजनैः सह कृतं पर्यटनम् एव आनन्दं ददाति। पर्यटनेन ज्ञानवृद्धिः मनोरञ्जनं च भवतः। अन्यच्च यत् स्वयं दृश्यते अनुभूयते च तत् ज्ञानं स्थिरतरं भवति। कस्मिन् देशे प्रदेशे वा किं-किं दर्शनीयम्? अथवा तत्र किं भुज्यते? किं पीयते? कथं व्यवहारः क्रियते? का तत्रत्याः वेषभूषाः? के च उत्सवाः? एतत् सर्वं पर्यटनेन ज्ञायते। पर्यटन-उद्योगेन भारतशासनं पर्याप्तं धनं लभते। अतः इमम् उद्योगं वर्धयितुं शासनं यत्नशीलम् अस्ति।

अद्य तु पर्यटनम् एकम् उद्योगरूपे अभवत्। सम्पूर्णं विश्वम् अनेन उद्योगेन अपरिमितं धनं प्राप्यते। संसारे अनेके देशाः ईदृशाः सन्ति येषु पर्यटनं प्रमुखम् उद्योगरूपम् अधारयत्। अस्माकं देशेऽपि कश्मीरः ईदृशः प्रदेशः वर्तते यस्य प्रमुखः आयस्रोतः पर्यटनम् एव विद्यते। तेन प्रदेशः अधिकांश रुप्यकाणि वैदेशिकमुद्राः च प्राप्नोति। अतः इमम् उद्योगं वर्धनीयम् एव। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) कैः सह कृतं पर्यटनम् आनन्दं ददाति?

**उत्तर :** प्रियजनैः।

(*ii*) पर्यटनं कीदृशं भवति?

**उत्तर :** रोमाञ्चकारि।

(*iii*) केन भारतशासनं पर्याप्तं धनं लभते?

**उत्तर :** पर्यटन-उद्योगेन।

(*iv*) किं वर्धयितुं शासनं यत्नशीलम् अस्ति?

**उत्तर :** पर्यटन-उद्योगम्।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) पर्यटनेन किं किं ज्ञायते?

**उत्तर :** कस्मिन् देशे प्रदेशे वा किं-किं दर्शनीयम्? अथवा तत्र किं भुज्यते? किं पीयते? कथं व्यवहारः क्रियते? का तत्रत्याः वेशभूषाः? के च उत्सवाः? एतत् सर्वं पर्यटनेन ज्ञायते।

(*ii*) किं ज्ञानं स्थिरतरं भवति?

**उत्तर :** यत् स्वयं दृश्यते अनुभूयते च तत् ज्ञानं स्थिरतरं भवति।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'अतः इमम् उद्योगं वर्धयितुम्' अत्र 'इमम् उद्योगं' पदं कस्मै प्रयुक्तम्?

(क) प्रशासनाय (ख) पर्यटन-उद्योगाय (ग) धनाय (घ) उद्योगाय

**उत्तर :** (ख) पर्यटन-उद्योगाय।

(*ii*) अनुच्छेदे 'अस्ति' इति क्रियायाः कर्तृपदं किम्?

(क) इमम् (ख) शासनम् (ग) उद्योगम् (घ) कार्यम्

**उत्तर :** (ख) शासनम्।

(*iii*) 'पर्यटनं रोमाञ्चकारि' इत्यनयोः पदयोः विशेषणपदम् किम्?

(क) रोमाञ्चकारि (ख) रोमाञ्चकं (ग) पर्यटनं (घ) पर्यटन

**उत्तर :** (क) रोमाञ्चकारि।

(*iv*) 'परिमितम्' इत्यस्य पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

(क) मनोरञ्जनम् (ख) प्रमुखम् (ग) अपरिमितम् (घ) वर्धनीयम्

**उत्तर :** (ग) अपरिमितम्।

**IV. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**उत्तर :** पर्यटनस्य महत्त्वम्/पर्यटनम्।

## 5

जलमालिन्यम् इति किम्? जले यदा अनपेक्षितानि हानिकारकाणि विषाक्तानि रासायनिकवस्तूनि, अम्लानि, तैलादीनि वा विलीयन्ते तदा तादृशं जलं प्राणधारणाय उपयोगाय वा योग्यं न भवति। इदम् एव जलमालिन्यम् इत्युच्यते। एतादृशे मलिने जले जलजन्तवः जीवितुम् अशक्ताः भवन्ति, सद्यो म्रियन्ते च। जलजन्तूनां प्राणधारणाय जले विलीनः ऑक्सीजन अनिलः अत्यावश्यको वर्तते।

यस्य सहायतया प्राणिनः स्वजीवनम् अग्रे सारयन्ति। सः एव प्राणवायुः (ऑक्सीजन) वर्तते। इदं तु प्रकृतये ईश्वरवरदानं वर्तते। प्राणिनः स्वजीवनाय तस्यैव आश्रयं ग्रहणन्ति। अस्यैव छत्र-छायायां ते स्वजीवनम् आरभ्य मृत्युपर्यन्तं तिष्ठन्ति। अन्नं जलं वा विना किञ्चित् समयं यावत् जीवाः स्वस्थाः अपि स्थातुं शक्यन्ते परं वायुं विना तु क्षणमात्रमपि स्थातुं न शक्यन्ते। अतः प्राणदानिने वायवे नमः।

10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **½ × 4 = 2**

(*i*) केषां प्राणधारणाय जले ऑक्सीजन अनिलः अत्यावश्यको वर्तते?

**उत्तर :** जलजन्तूनाम्।

(*ii*) मलिनं जलं किमर्थं योग्यं न भवति?

**उत्तर :** उपयोगाय।

(*iii*) प्रकृतये ईश्वरवरदानं किं वर्तते?

**उत्तर :** प्राणवायुः (ऑक्सीजन)।

(*iv*) प्राणदानिने कस्मै नमः?

**उत्तर :** वायवे।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) जलमालिन्यम् किम् अस्ति?

**उत्तर :** जले यदा अनपेक्षितानि हानिकारकाणि विषाक्तानि रासायनिकवस्तूनि, अम्लानि, तैलादीनि विलीयन्ते तदा तादृशं जलं प्राणधारणाय उपयोगाय वा योग्यं न भवति। इदं जलमालिन्यम् इत्युच्यते।

(*ii*) जलजन्तूनां प्राणधारणाय कः आवश्यको वर्तते?

**उत्तर :** जलजन्तूनां प्राणधारणाय जले विलीनः ऑक्सीजन अनिलः आवश्यको वर्तते।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'अपेक्षितानि' इत्यस्य पदस्य किं विपर्ययपदम् अनुच्छेदे प्रयुक्तम्?

(क) तैलादीनि (ख) अनपेक्षितानि (ग) विषाक्तानि (घ) जलानि

**उत्तर :** (ख) अनपेक्षितानि।

(*ii*) 'अशक्ताः' पदम् अनुच्छेदे कस्मै आगतम्?

(क) जलजन्तूभ्यः (ख) अम्लेभ्यः (ग) अशक्तेभ्यः (घ) जनेभ्यः

**उत्तर :** (क) जलजन्तूभ्यः।

(*iii*) अनुच्छेदे 'भवति' इति क्रियायाः कर्तृपदं किम्?

(क) तादृशम् (ख) जलम् (ग) उपयोगाय (घ) योग्यम्

**उत्तर :** (ख) जलम्।

(*iv*) 'इदं तु प्रकृतये ईश्वरवरदानं वर्तते।' अस्मिन् वाक्ये 'इदं' सर्वनामपदं कस्मै प्रयुक्तम्?

(क) जलाय (ख) अनलाय (ग) अन्नाय (घ) प्राणवायवे

**उत्तर :** (घ) प्राणवायवे।

**IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**उत्तर :** जलमालिन्यम्/जलमालिन्यस्य दुष्प्रभावः।

## 6

किं फलं शिक्षायाः, किमर्थं चेयं सस्नेहम् उपादीयते, पुरा भारतीयानाम् अस्मत्पूर्वजाणाञ्च यादृशी दृष्टिरासीत्, किमधुनापि तादृशी दृष्टिरस्ति? पुरा सुवर्ण-रजत-आकारे भारते शुल्करहिताशिक्षा वितीर्यते स्म। पुरा या प्रणाली भारते शिक्षायाः आसीत् सा तिरोहिता दौर्भाग्यादस्माकम्। भारतीयाः विद्वांसः इदानीं तां प्रणालीं प्रवर्तयितुं बद्धपरिकराः विलोक्यन्ते।

ईश्वरः कुर्यात् ते स्वकार्ये सफलाः भवेयुः। संसारे शिक्षा मुक्तये अपि दातव्या। भौतिकी, आर्थिकी, धार्मिकी आध्यात्मिकी वा या कापि मुक्तिः भवेत्। मानवजीवनाय लाभकरी एव भविष्यति। कथितम् अपि— सा विद्या या विमुक्तये। भारतस्य प्राचीनाः ऋषयः ये अस्माकं पूर्वजाः आसन् तेषां जीवनदृष्टिः ईदृशी एव आसीत्। अतः ते अस्यै प्रयत्नमपि अकुर्वन्। **10**

**प्रश्नाः**—

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **½ × 4 = 2**

(*i*) केषां पूर्वजानां शिक्षा दृष्टिः आसीत्?

**उत्तर :** भारतीयानाम्।

(*ii*) पुरा कथम् शिक्षा वितीर्यते स्म?

**उत्तर :** शुल्करहिता।

(*iii*) इदानीम् जनाः तां प्रणालीं प्रवर्तयितुं कीदृशाः विलोक्यन्ते?

**उत्तर :** बद्धपरिकराः।

(*iv*) पुरा कीदृशे भारते शुल्करहिताशिक्षा वितीर्यते स्म?

**उत्तर :** सुवर्ण-रजत-आकारे।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) अधुना दौर्भाग्यात् का तिरोहिता?

**उत्तर :** पुरा या प्रणाली शिक्षायाः आसीत् सा अधुना दौर्भाग्यात् तिरोहिता।

(*ii*) भारतीयाः विद्वांसः किमर्थं बद्धपरिकराः विलोक्यन्ते?

**उत्तर :** पुरा या शिक्षायाः प्रणाली आसीत् भारतीयाः विद्वांसः तां प्रणालीं प्रवर्तयितुम् बद्धपरिकराः विलोक्यन्ते।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'यादृशी' इत्यस्य विशेषणस्य विशेष्यपदं किम्?

(क) प्रणाली (ख) तादृशी (ग) दृष्टिः (घ) सृष्टिः

**उत्तर :** (ग) दृष्टिः।

(*ii*) 'समाप्ता अभवत्' इत्यस्मिन् अर्थे किं पदमत्र प्रयुक्तम्?

(क) आसीत् (ख) तिरोहिता (ग) वितीर्यते (घ) अतिरोहिता

**उत्तर** : (ख) तिरोहिता।

(*iii*) 'चेयं' इति पदे 'इयं' पदं कस्य पदस्य विशेषणम् अस्ति?

(क) 'शिक्षा' पदस्य (ख) शुल्करहिता पदस्य (ग) तिरोहिता पदस्य (घ) दृष्टिः पदस्य

**उत्तर** : (क) 'शिक्षा' पदस्य।

(*iv*) अनुच्छेदे 'भवेयुः' इत्यस्य क्रियापदस्य कर्तृपदं किं वर्तते?

(क) सफलाः (ख) ते (ग) ईश्वरः (घ) स्वकार्ये

**उत्तर** : (ख) ते।

**IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। **Write an appropriate title for this passage.**)

**उत्तर** : प्राचीना शिक्षा-व्यवस्था।

## अभ्यासः

**निम्नलिखितं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत–**

### 1

वर्तमान काले सम्पूर्णे भारते संरचनायाः विकासः (Skill Development) चर्चायां वर्तते। अधुना तु केवलमिदमेव श्रूयते यत् सर्वत्र संरचनायाः विकासः भवेत्। औद्योगिके क्षेत्रे सर्वकारः इदं कृत्वा श्रमिकान् उद्योगपतीन् च प्रोत्साहयति यत् यः जनः स्व औद्योगिके इकाईक्षेत्रे अत्यधिकान् जनान् संयोजयिष्यति अत्यधिकम् उत्पादनञ्च करिष्यति सः सर्वकारेण पारितोषिकं प्राप्स्यति।

अधुना तु सम्पूर्णे देशे निर्माणाय, आत्मनिर्भरतायै, मुद्राणाम् एकत्रीकरणाय संरचनाभूतविकासस्य महती आवश्यकता विद्यते। यदा जनाः अधिकारिणः, अभियन्तारः, श्रमिकाः व्यापारिणश्च अतीव कठिनं परिश्रमं करिष्यन्ति तदा ते देशाय अत्यधिकं निर्माणमपि करिष्यन्ति। यदा अधिकाधिकं निर्माणं भविष्यति अधिकानि वस्तूनि क्षेत्रेषु प्राप्स्यन्ति, न्यूनतमं मूल्यं वस्तुनः भविष्यति। सर्वकारः न्यूनातिन्यूनं करं जनतायाः गृहीष्यति तदा जनाः प्रसन्नताम् अनुभविष्यन्ति। यत्र-तत्र-सर्वत्र सम्पूर्णे देशे शुचितायाः साम्राज्यं प्रसारं वा भविष्यति। अतः वयम् अन्येषु देशेषु संरचनायाः विकासाय निर्भराः न भूत्वा संरचनाविकासं स्वयमेव कुर्याम। येन जनान् कार्यं मुद्राः वा प्राप्नुयुः जनाः च सुखिनः भवेयुः। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) अधुना सम्पूर्णे देशे कस्य महती आवश्यकता विद्यते।

(*ii*) सर्वत्र कस्याः विकासः भवेत्?

(*iii*) वर्तमानकाले सम्पूर्णे देशे (भारते) कस्याः विकासः चर्चायां वर्तते?

(*iv*) यत्र-तत्र-सर्वत्र सम्पूर्णे देशे शुचितायाः किं भविष्यति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) वयम् अन्येषु देशेषु कीदृशाः न भूत्वा संरचना विकासं स्वयमेव कुर्याम?

(*ii*) कदा जनाः अधिकारिणश्च देशाय अत्यधिकं निर्माणमपि करिष्यन्ति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'जनाः सुखिनः च भवेयुः'। अत्र क्रियापदं किमस्ति?

(क) जनाः (ख) भवेयुः (ग) च (घ) सुखिनः

(*ii*) अनुच्छेदे 'क्षेत्रे' इति विशेष्यपदस्य विशेषणपदं किं वर्तते?

(क) भारते (ख) देशे (ग) देशेषु (घ) औद्योगिके

(*iii*) 'इदानीम्' इति पदस्य कः पर्यायः अनुच्छेदे आगतः?

(क) अधुना (ख) महती (ग) यत् (घ) यत्र-तत्र-सर्वत्र

(*iv*) अत्र अनुच्छेदे 'दुःखिनः' इत्यस्य पदस्य कः विपर्ययः प्रयुक्तः?

(क) जनाम् (ख) वस्तुनः (ग) संरचनायाः (घ) सुखिनः

**IV. उपरिलिखितस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**2**

सम्पूर्णे देशे साम्प्रतं सङ्गणनभारतमेव (Digital India) श्रूयते। सङ्गणनभारतं (Digital India) सम्पूर्णायाः जनतायाः स्वप्नं वर्तते। अनेके वैज्ञानिकाः, अभियन्तारः, व्यापारिणः, व्याख्यातारः छात्राश्च अस्मिन् लक्ष्ये दिवानिशं संयुक्ताः सन्ति। सर्वे इच्छन्ति यत् अस्माकं देशः अस्मिन् क्षेत्रे अतीव वर्धेत। अनया विधिना सम्पूर्णे देशे कुत्रापि कर्गदरहितं व्यापारं कार्यं वा भवितुं शक्ष्यति। येन लक्षशः वृक्षाणां कर्तनं विनाशं वा रोधिष्यति। सर्वत्र हरीतिमा, छाया शुद्धं पर्यावरणञ्च भविष्यन्ति। यथासमयं वर्षा, शीतं ग्रीष्मश्चापि आगमिष्यन्ति। जलं वायुः अन्नञ्चापि शुद्धानि प्राप्स्यन्ति। रोगाणामपि न्यूनता जनानाञ्च प्रसन्नतायामभिवृद्धिः भविष्यतः। अनेन प्रकारेण शीघ्रातिशीघ्रं सम्पूर्णः देशः सञ्चारस्य एकस्मिन् सूत्रे बद्धो भविष्यति। प्रबल-सञ्चारप्रणाल्या कस्मिंश्चिदपि कार्ये विलम्बो न भविष्यति। वाहनेषु, पत्रेषु, दूरभाषेषु कार्यालयानां च कार्येषु तीव्रतमा गतिः आगमिष्यति। अतः भारतीयैः अधिकाधिकं सङ्गणनकार्यमेव कर्तव्यम्। यतः इदं कलियुगं कल (यन्त्र) युगं वर्तते। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) साम्प्रतं सम्पूर्णे देशे किं श्रूयते? (*ii*) इदं कलियुगं किं वर्तते?

(*iii*) सङ्गणनभारतं कस्याः स्वप्नं वर्तते? (*iv*) अनया विधिना कीदृशं व्यापारं कार्यं वा भवितुं शक्ष्यति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) के अस्मिन् लक्ष्ये दिवानिशं संयुक्ताः सन्ति?

(*ii*) अनया विधिना सम्पूर्णे देशे किं भवितुं शक्ष्यति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'आपः' इत्यस्य पदस्य कः पर्यायः अनुच्छेदे आगतः?

(क) सर्वत्र (ख) वायुः (ग) छाया (घ) जलम्

(*ii*) अनुच्छेदे 'शीघ्रम्' इति पदस्य कः विपर्ययः अत्र लिखितो वर्तते?

(क) विलम्बः (ख) अविलम्बः (ग) विनाशम् (घ) निशान्

(*iii*) 'अस्माकं देशः अस्मिन् क्षेत्रे अतीव वर्धेत'। अत्र क्रियापदं किम्?

(क) अतीव (ख) वर्धेत (ग) देशः (घ) अस्माकम्

(*iv*) 'अनया विधिना' अनयोः पदयोः विशेषणपदं किम्?

(क) विधि (ख) इदम् (ग) अनया (घ) विधिना

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**3**

'योगः कर्मसु कौशलम्' अर्थात् योगः तु कर्मसु कुशलताम् आनयति। यदा मानवः निष्ठया श्रमेण वा कार्याणि करोति तदा तेषु निपुणता कुशलता च जायेते। आलस्यं मानवानां प्रबलः शत्रुः परिश्रमश्च प्रबलं मित्रं वर्तेते। जनाः यथासमयं यथाशक्ति च कार्याणि कृत्वा सुखानि शान्तिं च प्राप्नुवन्ति। श्रेष्ठा कर्मकुशलता एव शास्त्रेषु योगः कथ्यते तेषु पठन-पाठनं, सद्ग्रन्थाणां स्वाध्यायः, निराश्रितेभ्यः आश्रयदानं, ऋषि-मुनि समेत स्वपूर्वजाणां श्रेष्ठं कर्म-चरित्रं-कार्यं वा स्वीकरणमेव योगः कथ्यते।

ये जनाः एतान् नियमान् कार्याणि वा पालयन्ति ते योगिनः एव कथ्यन्ते। कथितम् अपि–

युक्ताहार विहारस्य युक्त चेष्टस्य कर्मसु।
युक्त स्वप्नावबोधस्य योगो भवति दुःखहाः।।

अर्थात् उचितरूपेण भोजनं, भ्रमणं कर्मसु च उचिताः चेष्टाः, उचित रूपेण शयनं जागरणं च दुःखहाः योगो भवति। अनेन प्रकारेण श्रीकृष्णचन्द्रः योगेश्वरः कथ्यते।

"योगस्थः कुरु कर्माणि सङ्गंत्यक्त्वा धनञ्जय।" 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) श्रेष्ठा कर्मकुशलता एव शास्त्रेषु कः कथ्यते?

(*ii*) योगः कीदृशो भवति?

(*iii*) के सुखानि शान्तिं च प्राप्नुवन्ति?

(*iv*) मानवानां प्रबलः शत्रुः कः?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) शास्त्रेषु योगः किं कथ्यते?

(*ii*) दुःखहाः योगः कः भवति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) योगो भवति दुःखहाः' अत्र विशेषणपदं किम्?

(क) दुःखहाः (ख) भवति (ग) योगः (घ) योगो

(*ii*) श्लोके 'अवबोधः' इत्यस्य पदस्य कः विपर्ययः लिखितोऽस्ति?

(क) योगः (ख) दुःखहाः (ग) स्वप्नः (घ) युक्तः

(*iii*) 'योगः तु कर्मसु कुशलताम् आनयति'। अस्मिन् वाक्ये कर्तृपदं किमस्ति?

(क) कर्मसु (ख) योगः (ग) आनयति (घ) कुशलताम्

(*iv*) 'ते योगिनः एव कथ्यन्ते'। अस्मिन् वाक्ये क्रियापदं किं वर्तते?

(क) कथ्यन्ते (ख) एव (ग) योगिनः (घ) ते

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**4**

संसारे सम्पूर्णा ज्ञानराशिः वेदाः कथ्यन्ते। वेदानां ज्ञानत्वं तु विश्वे सिद्धं वर्तते। जनैः कथ्यते यत् वेदाः तु सृष्ट्यादौ एव चतुर्णाम् ऋषीणां माध्यमेन एव ईश्वरेण प्रकटिताः सन्ति। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च अग्निः, वायुः आदित्यः अङ्गिरः च एतेषां चतुर्णाम् ऋषीणां हृदयेषु सृष्ट्यादौ एव प्रकटिताः अभवन्। पश्चात् गुरु-शिष्य परम्पराभिः अनेकेषां विदुषां, ऋषीणां, मुनीनां, गुरूणां शिष्याणाञ्च हृदयेषु भवन्तः ते अद्य अस्माकं समक्षे उपस्थिताः सन्ति।

एते एव ज्ञानस्य मुख्य धाराः वर्तन्ते। आदिज्ञानराशिरूपवेदान् पठित्वा एव ऋषयः ज्ञानवृद्धाः आत्मदर्शिनश्च अभवन्। कथितमपि केनचिद् कविना–

ज्ञान का सागर चार वेद, ये वाणी है भगवान की।
इसी से मिलती सब सामग्री, जीवन के कल्याण की।।

भारते सर्वप्रथमं वेदभाष्यं महर्षिणा याज्ञवल्क्येन कृतम्। पश्चात् अनेके भारतीयाः वैदेशिकाश्च विद्वांसः तपस्विनश्च वेदभाष्यं कृतवन्तः। वर्तमाने काले भारतीयवेदभाष्येषु सायण-उव्वट-स्वामिदयानन्दानां विदुषाम् ऋषीणाञ्च वेदभाष्याः प्रसिद्धाः सन्ति।

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) संसारे सम्पूर्णा ज्ञानराशिः के कथ्यन्ते?

(*ii*) वेदाः कदा ईश्वरेण प्रकटिताः सन्ति?

(*iii*) अनेके भारतीयाः वैदेशिकाश्च विद्वांसः किं कृतवन्तः?

(*iv*) वर्तमाने काले ऋषीणाम् के प्रसिद्धाः सन्ति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) कथम् ऋषयः ज्ञानवृद्धाः आत्मदर्शिनश्च अभवन्?

(*ii*) जनैः किं कथ्यते?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'संसारे सम्पूर्णज्ञानराशिः वेदाः कथ्यन्ते'। अत्र वाक्ये क्रियापदं किमस्ति?

(क) संसारे (ख) वेदाः (ग) कथ्यन्ते (घ) ज्ञानराशिः

(*ii*) अनुच्छेदे 'कृतम्' इति क्रियायाः कर्तृपदं किम्?

(क) भारते (ख) याज्ञवल्क्येन (ग) महर्षिणा (घ) कृतम्

(*iii*) 'वेदभाष्याः प्रसिद्धाः' अनयोः पदयोः विशेषणं किं वर्तते?

(क) प्रसिद्धाः (ख) वेदभाष्याः (ग) वेदभाष्यः (घ) प्रसिद्धः

(*iv*) अनुच्छेदे 'गुरूणाम्' इत्यस्य पदस्य विपर्ययपदं किम्?

(क) शिष्याणाम् (ख) विदुषाम् (ग) ऋषीणाम् (घ) मुनीनाम्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**5**

नद्यः धरायाः प्राणभूताः सन्ति। ताः निरन्तरं धरायां जीवनं सर्जन्ति। तासाम्माध्यमेनैव धरायां प्राणाः, जीवनानि, वस्तूनि च सन्ति। नद्यः पृथिव्याः मानदण्डाः आभूषणानि च सन्ति। ताभिः एव धरायाः सौन्दर्यं वर्धते। नद्यः कोटिशः अर्बुदशश्च जीवान् स्व उदरे धारयित्वा प्राणान् यच्छन्ति। परं ये जीवाः धरायाम् आकाशे च वसन्ति तेभ्योऽपि जलं दत्वा नद्यः तेषां पालनं पोषणं च कुर्वन्ति।

यस्मिन् क्षेत्रे नदी न भवति तत्र सदैव जलाभावो विद्यते। कूपाः, तडागाः कूल्यादयश्च नदीनां विकल्पाः भवितुं न शक्नुवन्ति। नद्यः पर्वतेभ्यः जलं नीत्वा निर्गच्छन्ति तदनु मार्गेभ्यः जलानि नयन्त्यः धरां शल्यश्यामलां कुर्वन्त्यः सागरं प्रतिगच्छन्ति। मार्गेषु जीवेभ्यः अमृततुल्यं जलं यच्छन्त्यः ताः कोटिशः जीवेषु प्राणान् धारयन्ति। संसारे सर्वासु दीर्घतमा नदी मिस्रदेशस्य नील नदी कथ्यते। भारते तु नद्यः केवलं नद्यः एव न सन्ति अपितु ताः मातृरूपाः मान्यन्ते। गङ्गा-यमुना-नर्मदा-सतलुज-झेलम-कृष्णा-कावेरी-तुङ्गभद्रा-कोसी-ब्रह्मपुत्रादयः नद्यः मातृरूपाः भूत्वा भारतं शोभयन्ते। अतः कथितम्–प्राणभूताभ्यः मातृरूपाभ्यः नदीभ्यः नमः।

प्रश्ना:–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) नद्य: धराया: का: सन्ति?

(*ii*) यस्मिन् क्षेत्रे नदी न भवति तत्र सदैव को विद्यते?

(*iii*) कीदृशीभ्य: नदीभ्य: नम:?

(*iv*) का: भारते मातृरूपा: मान्यन्ते?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) नद्य: केषां पालनं पोषणं च कुर्वन्ति?

(*ii*) भारते तु का: नद्य: मातृरूपा: भूत्वा भारतं शोभयन्ते?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'अपितु ता: मातृरूपा: मान्यन्ते'। अत्र 'ता:' पदं काभ्य: प्रयुक्तम्?

(क) जलेभ्य: (ख) जीवेभ्य: (ग) जनेभ्य: (घ) नदीभ्य:

(*ii*) 'नद्य: तेषां पालनं पोषणं च कुर्वन्ति'। अत्र 'नद्य:' इति कर्तृपदस्य क्रियापदं किम्?

(क) कुर्वन्ति (ख) पालनम् (ग) पोषणम् (घ) तेषाम्

(*iii*) अनुच्छेदे 'अमृततुल्यम्' इति विशेषणस्य किं विशेष्यपदम् आगतम्?

(क) जलानि (ख) जलम् (ग) सागरम् (घ) भारतम्

(*iv*) 'धराया:' इत्यस्य पदस्य क: पर्याय: अत्र अनुच्छेदे प्रयुक्तोऽस्ति?

(क) मानदण्डा: (ख) जीवा: (ग) पृथिव्या: (घ) नद्या:

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 6

विश्वे अस्माकं भारतदेश: एक: खेलप्रिय: देशो वर्तते। अत्र अनेके खेला: प्रचलिता: सन्ति, यथा– क्रिकेट, हॉकी, कबड्डी, पादकन्दुकम्, हस्तकन्दुकम्, मल्लक्रीडा, शरसन्धानम्, धावनम्, कूर्दनम्, उच्च-उच्छलनादय:। भारतवर्षे, प्राचीनकालादेव खेलनैव शिक्षापि दीयते स्म। अत्र खेला: तु जीवनस्य अनिवार्यमङ्गमस्ति। संसारे अत्रत्या: क्रीडका: स्व-स्व खेलेषु स्वप्रतिभां यथासमयमदर्शयन्।

क्रीडका: तु विभिन्न खेलसमारोहेषु विश्वस्य समक्षे स्वप्रतिभां प्रदर्श्य दर्शकान् आश्चर्यचकितान् अकुर्वन्। शर सन्धाने, मल्लक्रीडासु च ते स्वर्णपदकानि विजित्य देशस्य मस्तकमतीव उच्चतमं कृतवन्त:। हॉकी क्रीडा कबड्डी च सदैव भारताय वरदानम् अयच्छताम्। हॉकी क्रीडा तु भारतस्य राष्ट्रीय: खेल: वर्तते। विश्वम् अनेकवारं क्रिकेट खेलेषु भारतस्य नैपुण्यमपश्यत्। अनेकदा भारतं स्वर्णपदकं जित्वा विश्वविजेतापि अभवत्।

एतद् भवति सति अपि क्रीडाक्षेत्रे अनेकश: सुधाराणामावश्यकता विद्यते। खेल-क्षेत्रेषु विभागेषु च राजनैतिक्या: जना: स्व-अधिकारं कृत्वा उपविष्टा: सन्ति। तेनैव कारणेन राष्ट्रीये अन्तर्राष्ट्रीये वा स्तरे खेलेषु क्रीडका: मनोवाञ्छितां सफलतां न प्राप्नुवन्ति। अत: यावत् विशालो देशो वर्तते तावदेव सफलतां पदकानि च प्राप्तुं शुद्धतया प्रयासं कर्तव्यम्, खेलसंस्थासु तु केवलं खेल विशेषज्ञा: एव नेतृत्वं कुर्यु: तदैव पूर्णां सफलतां प्राप्स्यन्ते क्रीडका:। 10

प्रश्ना:–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) विश्वे अस्माकं भारतदेश: कीदृश: देशो वर्तते?

(*ii*) कुत्र अत्रत्या: क्रीडका: स्व-स्व खेलेषु स्वप्रतिभाम् अदर्शयन्?

(*iii*) हॉकी-क्रीडा तु भारतस्य कीदृशः खेलः वर्तते?

(*iv*) खेल संस्थासु तु केवलं के एव नेतृत्वं कुर्युः?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) अत्र भारतदेशे के खेलाः प्रचलिताः सन्ति?

(*ii*) केन कारणेन राष्ट्रीये अन्तर्राष्ट्रीये वा स्तरे खेलेषु क्रीडकाः मनोवाञ्छितां सफलतां न प्राप्नुवन्ति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'केवलं खेलविशेषज्ञाः एव नेतृत्वं कुर्युः'। अत्र 'कुर्युः' इति क्रियायाः कर्तृपदं किम्?

(क) केवलम् (ख) नेतृत्वम् (ग) खेलविशेषज्ञाः (घ) विशेषज्ञाः

(*ii*) 'अभिशापम्' इत्यस्य पदस्य कः विपर्ययः अनुच्छेदे आगतः?

(क) वरदानम् (ख) विश्वम् (ग) सफलताम् (घ) प्रयासम्

(*iii*) 'अत्र अनेके खेलाः प्रचलिताः सन्ति'। अत्र क्रियापदं किम्?

(क) अत्र (ख) सन्ति (ग) अनेके (घ) खेलाः

(*iv*) अत्र अनुच्छेदे 'भारतदेशः' इति विशेष्यपदस्य किं विशेषणं लिखितं वर्तते?

(क) एकः खेलप्रियः (ख) देशो (ग) देशः (घ) प्रियः

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 7

भारतीय रेल विभागः देशस्य सर्वाधिको विशालो विभागो वर्तते। अयं विभागः आकाश्मीरं कन्याकुमारीं यावत् एवम् ओखातः (द्वारकातः) अरुणाचलं यावत् प्रसरितो वर्तते। भारतीयरेलयानानि प्रतिदिनं लक्षशः जनान् तेषां स्थानेषु प्रापयन्ति। सहस्रशः रेलयानानि अनेकेषां जनानां कर्मचारिणाम् अधिकारिणाञ्च आजीविकायाः प्रमुखानि साधनानि सन्ति। रेलस्थानके गत्वा एवं प्रतीयते यत् वयं एकस्मिन् विशेषे प्रदेशे आगताः। सम्पूर्णः संसारः रेलवाहनेषु रेलस्थानकेषु वा वसति। सर्वकारमपि सर्वाधिकं करस्वरूपं धनं रेलविभागादेव प्राप्यते। जनाः दूरातिदूरं समीपं वा गन्तुं रेलवाहनानि एव अपेक्षन्ते।

भारतीय-सर्वकारोऽपि अहर्निशं रेलयात्रामतीव सुविधायुक्तां शीघ्रतमाम् आकर्षकां वा कर्तुं प्रयतते। वैज्ञानिकाः, अभियन्तारः, कलामर्मज्ञाश्च रेलयानं शायिकाः आसनानि च आकर्षकानि, सुख-सुविधायुक्तानि वा कर्तुं निरन्तरं प्रयासे संयुक्ताः सन्ति। अनेन कारणेन एव जनेषु रेलविभागो रेलयानानि च लोकप्रियाणि सन्ति। सम्प्रति राजधानी, शताब्दी, दुरन्तो, जनशताब्दी, तेजसः, हमसफ़रः, गतिमानादीनि रेलवाहनानि केवलं भारतीयेषु एव नापितु वैदेशिकेषु जनेषु अपि लोकप्रियाणि सन्ति। संस्कृतभाषायां रेलवाहनं लौहपथगामि वाहनमपि कथ्यते। अधुना इमं विभागम् अधिकाधिकाम् आधुनिकतां सुविधां वा अपेक्षते येन सर्वहाराः जनाः अपि तं प्रति आकर्षिताः स्युः। **10**

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **½ × 4 = 2**

(*i*) देशस्य सर्वाधिको विशालो विभागः को वर्तते?

(*ii*) रेल विभागः कं यावत् प्रसरितो वर्तते?

(*iii*) कुत्र गत्वा एवं प्रतीयते यत् वयम् एकस्मिन् विशेषे प्रदेशे आगताः?

(*iv*) संस्कृतभाषायां रेलवाहनं किं कथ्यते?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) भारतीय-सर्वकारोऽपि किं कर्तुं प्रयतते?

(*ii*) सम्प्रति कानि जनेषु अपि लोकप्रियाणि सन्ति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'सर्वहारा: जना:' अनयो: पदयो: विशेषणपदं किमस्ति?

(क) जना: (ख) जन: (ग) सर्वहरा: (घ) सर्वहारा:

(*ii*) अनुच्छेदे 'अपेक्षन्ते' इत्यस्य क्रियापदस्य कर्तृपदं किं वर्तते?

(क) जना: (ख) समीपम् (ग) दूरातिदूरम् (घ) रेलवाहनानि

(*iii*) 'भारतीय रेल विभाग: देशस्य .................. विभागो वर्तते'। अत्र वाक्ये क्रियापदं किम्?

(क) वर्तते (ख) रेलविभाग:

(ग) भारतीयरेलविभाग: (घ) विशाल:

(*iv*) अनुच्छेदे 'आगत्य' इति पदस्य क: विपर्यय: आगत:?

(क) अपेक्षन्ते (ख) स्यु: (ग) गत्वा (घ) गन्तुम्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 8

मानवजीवनं सदैव अग्रे वर्धते। तज्जीवनं शास्त्रेषु अतीव पुण्यस्य फलं कथितम्। अत: मानवजीवनं सदा शिक्षया सह संयुक्तमस्ति। वेदानां शिक्षया सह शास्त्राणाम्, ऋषीणां मुनीनाञ्च शिक्षा: मानवा: सदैव ग्रहणन्ति स्म। अनेन सह ते विज्ञानस्य प्रौद्योगिकीनाञ्च शिक्षा: अपि ग्रहीतवन्त:। आधिदैविकी, आधिभौतिकी अध्यात्मिकी च शिक्षा: तेषां जीवने सदा मार्गदर्शनं कुर्वन्ति स्म अद्यापि च कुर्वन्ति। जगति मानवजीवनम् अतीव मूल्ययुक्तं जीवनं वर्तते। अत: संसारे तस्य महत्त्वमपि अत्यधिकमस्ति।

मानव: आदिकालात् अद्यावधि पर्यन्तं सदैव अनुसन्धानकर्ता एव अस्ति। स: यावत् परिश्रमम् आध्यात्मिकज्ञानप्राप्तौ कृतवान् तावदेव परिश्रमं स: वैज्ञानिकीं प्रौद्योगिकीं च विद्यां प्राप्तौ अपि कृतवान्। अत: जल-थल-गगनेषु स: अद्भुतं कार्यम् अकरोत्। समाचार प्रेषणे, समाचार प्राप्तौ, संचार प्रणाले: विस्तारे, जल-थल-नभेषु च परिवहनव्यवस्थानां विस्तारम् मानवानां परिश्रमस्य, योग्यताया:, तीक्ष्णबुद्धे: च परिचायका: वर्तन्ते। विज्ञान एवं प्रौद्योगिकी शिक्षा मानवजीवने क्रान्तिकारिणं परिवर्तनं कृतवती। अद्य मानवा: अन्तरिक्ष-महासागराणां क्षेत्रेषु स्वप्रतिष्ठां स्थापितवन्त:। अन्तरिक्षे स: अनेकवारं गतवान् स्वयात्रासु च स: मूषकादीन् जन्तूनपि नीतवान्। अनेन अनेकवारम् अनुसन्धानं कृत्वा तेन विज्ञान एवं तकनीकी प्रौद्योगिकी च क्षेत्रेषु स्वकीर्तिध्वजा स्थापिता। धन्या: सन्ति तस्य शिक्षा, उत्साहं प्रयत्नानि च। 10

**प्रश्ना:—**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) किं सदैव अग्रे वर्धते?

(*ii*) मानवजीवनं सदा कया सह संयुक्तमस्ति?

(*iii*) जगति किम् अतीव मूल्ययुक्तं जीवनं वर्तते?

(*iv*) अद्य मानवा: केषां क्षेत्रेषु स्वप्रतिष्ठां स्थापितवन्त:?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) मानव: आदिकालात् अद्यावधि पर्यन्तं क: एवास्ति?

(*ii*) मानवानां परिश्रमस्य, योग्यताया: तीक्ष्णबुद्धेश्च के परिचायका: सन्ति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) अनुच्छेदे 'वर्धते' इति क्रियापदस्य कर्तृपदं किम्?

(क) सदैव (ख) मानवजीवनम् (ग) अग्रे (घ) जीवनम्

(*ii*) 'अन्तरिक्षे स: अनेकवारं गतवान्'। अत्र क्रियापदं किम्?

(क) गतवान् (ख) स: (ग) अनेकवारम् (घ) अन्तरिक्षे

(*iii*) 'स: यावत् परिश्रमम्........'। अत्र 'स:' पदं कस्मै प्रयुक्तम्?

(क) मानवाय (ख) ज्ञानाय (ग) परिश्रमाय (घ) आदिकालाय

(*iv*) 'अद्भुतं कार्यम्' अनयो: पदयो: विशेष्यपदं किं वर्तते?

(क) अद्भुतम् (ख) अद्भुत: (ग) कार्य: (घ) कार्यम्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 9

दीपावलीनामकं पर्वण: भारते अतीव महत्त्वम् अस्ति। श्रूयते यत् अस्मिन् दिने त्रेतायुगे मर्यादापुरुषोत्तम: श्रीरामचन्द्र: पितु: आज्ञां परिपालयन्, चतुर्दशवर्षपर्यन्तं वने उषित्वा राक्षसराजं रावणं हत्वा तस्य बन्धनात् स्वपत्नीं सीतां च विमोच्य, सीतया लक्ष्मणेन च सहित: अयोध्यां नगरीं प्रतिनिवृत्त: आसीत्। तदा च तस्य स्वागतं लोकेन रात्रौ दीपमालां कृत्वा कृतम्। तत: प्रभृति: सर्वै: भारतीयै: अस्मिन् एव दिने प्रतिवर्षं स्वगृहेषु दीपमाला क्रियते।

तदा सर्वत्र चाकचक्यं भवति। जना: आपणेषु गृहेषु, मार्गेषु सर्वत्र विद्युद्दीपकै:, तैलदीपकै: मोमवर्तिकाभिश्च प्रकाशं कुर्वन्ति। एवं प्रतीयते यत्—"तमसो मा ज्योतिर्गमय" इति प्रार्थनां सर्वत्रैव जना: कुर्वन्ति। जनानाम् आलस्यं दूरीभूत्वा पुरुषार्थस्य साम्राज्यं प्रसरति। नक्तं जना: स्व-स्वगृहे महादेव्या: लक्ष्म्या: पूजनं कृत्वा तस्या आशीर्वादं याचन्ते। तत्पश्चात् मिष्ठान्नं क्रीत्वा खादन्ति खादयन्ति च। केचित् बाला: तदा स्फोटकानां विस्फोटनमपि कुर्वन्ति। एवं महापर्वण: दीपावल्या: भव्यरूपेण आयोजनं क्रियते। 10

**प्रश्ना:–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) राम: कं हत्वा स्वपत्नीं सीतां विमोचितवान्?

(*ii*) कुत्र दीपावल्या: अतीव महत्त्वम् अस्ति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) अस्य दिनस्य विषये किं श्रूयते?

(*ii*) कस्य भारते अतीव महत्त्वम्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'तदा च तस्य स्वागतं लोकेन' इति वाक्ये 'तस्य' पदं कस्मै प्रयुक्तम्?

(क) सीतायै (ख) रामाय (ग) लक्ष्मणाय (घ) राज्ञे

(*ii*) 'निवृत्त: आसीत्' इत्यस्य क्रियापदस्य कर्तृपदं किमस्ति?

(क) सीता (ख) लक्ष्मण: (ग) श्रीरामचन्द्र: (घ) मर्यादापुरुषोत्तम:

(*iii*) 'सर्वै: भारतीयै:' इत्यनयो: पदयो: किं विशेषणम्?

(क) सर्वै: (ख) भारतीयै: (ग) उभयो: (घ) भारतीया:

(*iv*) 'कानने' इतिपदस्य क: पर्याय: अनुच्छेदे आगत:?

(क) विपिने (ख) वने (ग) गृहे (घ) भारते

**IV. उपरिलिखितस्य गद्यांशस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 10

भारतम् अस्माकं पूर्वजानां महता प्रयत्नेन 1947 तमे ईसवीयाब्दे अगस्तमासस्य पञ्चदशे दिनाङ्के स्वतन्त्रम् अभवत्। तदनन्तरं डॉ० राजेन्द्रप्रसादमहोदयस्य सभापतित्वे संविधानसभा भारतस्य संविधानं निर्मितवती। संविधानस्य आरम्भदिवसः गणतन्त्रदिवसः इत्युच्यते। तस्माद् दिनाद् भारतं पूर्णरूपेण स्वतन्त्रं जातम्। पञ्चाशदुत्तरैकोनविंशतिशततमे (1950) ईसवीयाब्दे जनवरी मासस्य षड्विंशतितमे दिनाङ्के (26 जनवरी) स्वतन्त्रभारतस्य संविधानम् आरब्धम् अभवत्। डॉ० राजेन्द्रप्रसाद एव स्वतन्त्र-भारतस्य प्रथमो राष्ट्रपतिः निर्वाचितः अभवत्।

सः अतीव शान्तः दृढ़विश्वासी, साधारणवेशभूषाधारी परमसाधारण-प्रतिभायाः स्वामी आसीत्। सः सच्चरित्रः सत्यार्थे भारतीयसंस्कृतेः पूजकः, मातृभूमेः आराधकः भूमिपुत्रश्च आसीत्। सः गुरुकुलानाम् अतीव पक्षपाती आसीत्। अतः स्वपौत्र्यौ श्रीमती महादेवीवर्मायाः महिला विद्यापीठे अध्ययनार्थं प्रेषितवान्। देशवासिनां हृदयेषु तं प्रति अतीव श्रद्धा आसीत्। देशः कदापि एतादृशं सपूतं नैव विस्मरिष्यति। 10

प्रश्नाः–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) भारतम् अगस्तमासस्य कस्यां तिथौ स्वतन्त्रम् अभवत्?
(*ii*) का भारतस्य संविधानं निर्मितवती?
(*iii*) कस्मिन् मासे भारतस्य संविधानम् आरब्धम् अभवत्?
(*iv*) संविधानस्य आरम्भदिवसः कः कथ्यते?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) स्वतन्त्रतानन्तरं किम् अभवत्?
(*ii*) भारतस्य संविधानं कदा आरब्धम्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'महता' इति पदस्य अनुच्छेदे किं विशेष्यम् आगतम्?
(क) स्वतन्त्रम् (ख) प्रयत्नेन (ग) जातम् (घ) स्वतन्त्रेण

(*ii*) 'तस्माद् दिनाद्' अत्र 'तस्माद्' सर्वनाम पदं कस्य संज्ञापदस्य स्थाने प्रयुक्तम्?
(क) अगस्तमासस्य (ख) दिनाङ्कस्य (ग) दिनस्य (घ) गणतन्त्रदिवसस्य

(*iii*) 'तिथौ' इत्यर्थे गद्यांशे किम् पदम् प्रयुक्तम्?
(क) स्वतन्त्रम् (ख) भारतम् (ग) उभयोः (घ) दिनाङ्के

(*iv*) अनुच्छेदे 'निर्मितवती' इति क्रियायाः कर्तृपदं किम्?
(क) संविधान सभा (ख) भारतस्य (ग) सभापतित्वे (घ) संविधानम्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 11

कालिदासस्य लोकप्रियतायाः कारणं तस्य प्रसादगुणयुता ललिता परिष्कृता शैली अस्ति। शब्दलाघवः कालिदासस्य कलात्मकरुचेः परिचायकः अस्ति। तस्य अलंकारेषु उपमायाः प्रयोगः अद्वितीयः अस्ति। चरित्रचित्रणे कालिदासः अतीव पटुः अस्ति। भाषा भावश्च पात्रानुकूलौ तिष्ठतः। कालिदासस्य प्रकृतिचित्रणम् अतीव रम्यम् अस्ति। कालिदास-मतेन तपसा प्रेम निर्मलं पुष्टं च भवति। कालिदासः उपमाप्रयोगे प्रसिद्धः अस्ति।

कालिदासस्य उपमा जगत्प्रसिद्धः वर्तते। अतएव कथ्यते—

''उपमा कालिदासस्य भारवेरार्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥''

कालिदासः वर्तमानयुगस्य आदिकविः वाल्मीकिः वर्तते। सः यस्मिन् विषये लेखनीं ग्रहणाति सा तत्पृष्ठे नृत्यमिव करोति। प्रकृतिवर्णनं भवेत् विरहवेदनां वा, चित्रवर्णनं भवेत् वा चरित्रवर्णनम्; कालिदासः सर्वेषु निपुणो वर्तते। अतः जनाः तस्मै कविकुलगुरुः कथयित्वा आदरयन्ते। 10

प्रश्नाः–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) $1 \times 2 = 2$

(*i*) कालिदासस्य लोकप्रियतायाः कारणं कीदृशी शैली अस्ति?

(*ii*) कालिदासस्य केषु उपमायाः प्रयोगः अद्वितीयः अस्ति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) $2 \times 2 = 4$

(*i*) कालिदासस्य लोकप्रियतायाः किं कारणम् अस्ति?

(*ii*) कस्मिन् विषये कालिदासः अतीव पटुः अस्ति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) $1 \times 2 = 2$

(*i*) 'विख्यातः' अस्य पर्यायः अनुच्छेदात् चित्वा लिखत।

(क) प्रसिद्धः (ख) पटुः (ग) अद्वितीयः (घ) परिचायकः

(*ii*) अनुच्छेदे 'तिष्ठतः' इति क्रियायाः कर्तृपदे के स्तः?

(क) भाषा (ख) भावः (ग) भाषा भावश्च (घ) प्रकृतिचित्रणम्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** $2 \times 1 = 2$

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 12

रामायणम् लौकिकसंस्कृतस्य प्रथमः ग्रन्थः। अस्मिन् ग्रन्थे मर्यादापुरुषोत्तमस्य श्रीरामस्य जीवनस्य वृत्तं वर्तते। अस्य लेखकः महर्षिः वाल्मीकिः आसीत्। सः आदिकविः आसीत् अतः तस्य रचना 'आदिकाव्यम्' इति कृत्वा विद्वांसः स्मरन्ति। एतत् काव्यम् अनुष्टुप्-छन्दसि निबद्धम्। अत्र श्लोकानां चतुर्विंशतिसहस्रं वर्तते, तेन रामायणं 'चतुर्विंशति-साहस्री-संहिता' इति नाम्ना अपि विद्वद्भिः स्मर्यते। इदं कविना नारदमुनेः प्रेरणया ब्रह्मणः वचनेन च रचितम्।

रामायणे कविना यद् वर्णनं कृतम् तत्सर्वत्र अलौकिकं विद्यते। महर्षिः वाल्मीकिः श्रीरामस्य समकालीनः भवति सति यद् वर्णनं कृतवान् तत्सर्वं सत्यं प्रतीयते। अतः तद्वर्णनं निर्विवादं वर्तते। महर्षिः वाल्मीकिः श्रीरामस्य वर्णनं अवताररूपे न कृत्वा केवलं मर्यादापुरुषोत्तमरूपे कृतवान्। अतः तद् वर्णनम् अलौकिकं नास्ति। ऐतिहासिकाः जनाः अपि तदेव स्वीकुर्वन्ति। 10

प्रश्नाः–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) $1 \times 2 = 2$

(*i*) रामायणे कस्य जीवनस्य वृत्तं वर्तते?

(*ii*) कः आदिकविः आसीत्?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। **Answer in complete sentence.**) **2 × 2 = 4**

(*i*) किमर्थम् आदिकाव्यम् इदम्?

(*ii*) रामायणं कविना केन कारणेन रचितम्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। **Work of Language.**) **½ × 4 = 2**

(*i*) 'वाल्मीकिः' अस्य पदस्य विशेषणपदम् लिखत।

(क) महर्षिः (ख) आदिकविः (ग) उभयोः (घ) कविः

(*ii*) 'सः आदिकविः आसीत्' अत्र 'सः' पदं कस्मै प्रयुक्तम्?

(क) रामायणाय (ख) वाल्मीकिने (ग) ब्रह्मणे (घ) रामाय

(*iii*) 'एतत् काव्यम् अनुष्टुप्-छन्दसि निबद्धम्'। अत्र 'एतत् काव्यम्' कं प्रति सङ्केतं करोति?

(क) कविताम् (ख) रामायणम् (ग) कालिदासम् (घ) महाभारतम्

(*iv*) अनुच्छेदे 'रचितम्' इति क्रियापदस्य कर्तृपदं किमस्ति?

(क) वचनेन (ख) ब्रह्मणः (ग) प्रेरणया (घ) कविना

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। **Write an appropriate title for this passage.**)

## 13

वसन्तोत्सवः 'वसन्तपञ्चमी' इति नाम्ना अपि प्रसिद्धो वर्तते। माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथौ अयम् उत्सवः भवति। अस्मिन् दिने क्षेत्रेषु सर्वत्र पीतं सर्षपं विकसितं दृश्यते। जनाः पीतवस्त्राणि धारयित्वा इतस्ततः भ्रमन्ति। विद्यालयेषु छात्राणां अध्ययनं तु न भवति, परं ते सर्वे समवेताः नगराद् ग्रामाद् वा बहिर्गच्छन्ति। तत्र एकस्मिन् क्रीडाक्षेत्रे विविधासु क्रीडास्पर्धासु रममाणाः भवन्ति। मधुराणि गीतानि गीयन्ते। वीररसपूर्णाः देशभक्तिभावभरिताः देशहिताय बलिदानस्य प्रेरणां सञ्चारयन्त्यः कविताः अपि पठ्यन्ते।

पीतवर्णस्य अतीव महत्त्वम् अस्मिन् पर्वणि वर्तते। सम्पूर्णा प्रकृतिः पीतवर्णस्यावरणं धृत्वा नववधूरिव प्रतिभाति। क्षेत्रेषु वृक्षेषु वा पीतत्वं प्रसृतं भवति। जनाः अस्मिन् उत्सवे सरस्वतीपूजनं महोत्साहेन कुर्वन्ति। सर्वत्र सरस्वतीदेव्याः मूर्तिं धृत्वा तस्याः पूजनं कुर्वन्ति, व्रतं धारयन्ति, उद्यापनं कन्याभोजं च कृत्वा महादेव्याः सरस्वत्याः आराधनां कृत्वा आत्मानं कृतकृत्यं मन्यन्ते। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। **Answer in one word.**) **1 × 2 = 2**

(*i*) सर्वत्र कीदृशं सर्षपं दृश्यते?

(*ii*) जनाः कानि धारयित्वा इतस्ततः भ्रमन्ति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। **Answer in complete sentence.**) **2 × 2 = 4**

(*i*) जनैः कीदृशाः कविताः पठ्यन्ते?

(*ii*) वसन्तोत्सवः कदा मन्यते?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। **Work of Language.**) **½ × 4 = 2**

(*i*) 'पर्व' पदस्य अर्थे कः शब्दः अनुच्छेदे प्रयुक्तः?

(क) उत्सवः (ख) वसन्तः (ग) ग्रन्थिः (घ) पक्षः

(*ii*) 'पठनम्' इत्यस्य पर्यायः अनुच्छेदात् चित्वा लिखत।

(क) अध्यापनम् (ख) अध्ययनम् (ग) सर्षपम् (घ) लेखनम्

(*iii*) 'परं ते सर्वे समवेताः नगराद्' इति वाक्ये 'ते सर्वे' केभ्यः कथितम्?

(क) जनेभ्यः (ख) गीतेभ्यः (ग) क्षेत्रेभ्यः (घ) छात्रेभ्यः

(*iv*) अनुच्छेदे 'अयम् उत्सवः' इत्यस्य कर्तृपदस्य क्रियापदं किम्?

(क) भवति (ख) पञ्चम्याम् (ग) तिथौ (घ) माघमासस्य

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 14

संस्कृतशिक्षायां प्रथमा बाधा तावदियं, यत् अस्यां शिक्षार्थिनां प्रायेणाभाव एव वर्तते। संस्कृतशिक्षाक्षेत्रे वर्तमानस्य शिक्षार्थिनाम् अभावस्य यदा कारणमन्विष्यते, तदाऽस्माकम् एष एव निष्कर्षः, यत् सम्प्रति शिक्षाया उद्देश्यमेव लोकैरेतत् स्वीकृतं यत् विविधोपभोगसाधनानामभिवृद्धये धनार्जनस्य सामर्थ्यं प्राप्येत। तच्च संस्कृतशिक्षापेक्षया इतरशिक्षाभिरिदानीम् अनायासेन स्वल्पायासेन वा भवितुं शक्नोति।

अतः छात्राः अस्यां न प्राप्नुवन्ति। शासनेन जनैः च एतदर्थं प्रयत्नं कर्तव्यं यत् संस्कृतशिक्षायामपि जीविकोपार्जनस्य शक्तिः प्राप्नोतु। यतः आजीविका तु जीवनेन सह संयुक्ता वर्तते। संस्कृत शिक्षया सह यदा आजीविकाः संयुक्ताः भविष्यन्ति तदा तस्याः अपि प्रसारं वर्धिष्यते। जनानां जीवनस्तरमपि उन्नतं भविष्यति। भारतस्य प्राचीनं गौरवम् अपि चमत्कृतं भविष्यति। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **1 × 2 = 2**

(*i*) लोकैः सम्प्रति शिक्षायाः किम् उद्देश्यं स्वीकृतम्?

(*ii*) कुत्र शिक्षार्थिनाम् अभावः वर्तते?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) संस्कृतशिक्षायां प्रथमा बाधा काऽस्ति?

(*ii*) संस्कृतशिक्षाक्षेत्रे शिक्षार्थिनाम् वर्तमानस्य अभावस्य किम् कारणमस्ति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'अस्याम्' पदम् अनुच्छेदे कस्मै प्रयुक्तम्?

(क) शिक्षायै (ख) संस्कृत-शिक्षायै (ग) छात्रेभ्यः (घ) शिक्षकेभ्यः

(*ii*) 'वर्तते' इति क्रियायाः कर्तृपदं किम्?

(क) प्रायेणाभावः (ख) प्रायेण (ग) अभावः (घ) भावः

(*iii*) 'लोकैः' इति कर्तृपदस्य क्रियापदं किम्?

(क) उद्देश्यमेव (ख) एतत् (ग) रेतत् (घ) स्वीकृतम्

(*iv*) अनुच्छेदे 'अधुना' इत्यस्य पदस्य कः पर्यायः आगतः?

(क) अतः (ख) सम्प्रति (ग) तदा (घ) अपि

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 15

वर्तमानयुगम् विज्ञानमयम् अस्माकं सर्वासु क्रियासु विज्ञानतत्त्वानि एव विराजन्ते। पठनक्रियाम् एव पश्यन्तु। पठने अपि विज्ञानस्य सिद्धान्ताः अनुकरणीयाः। यदि न करिष्यामः तर्हि नेत्रयोः विकारः भवितुं शक्नोति। पुस्तकं यदि नेत्रयोः अति समीपे भवति तर्हि पठितुं न शक्यते। यदा पुस्तकम् अतिदूरं भवति तदा अपि पठनं दुष्करं भवति। नेत्रविशेषज्ञाः कथयन्ति यत् प्रायः पञ्चविंशतिसेण्टिमीटरमितं (25 से०मी०) दूरम् अन्तरं समीचीनं भवति। तावद्दूरं पुस्तकं गृहीत्वा पठने यदि बाधा न अस्ति तदा शोभनं परन्तु यदि न पठ्यते तदा नेत्रचिकित्सकस्य समीपे गत्वा नेत्रपरीक्षणं कारयेत् अन्यथा नेत्रदृष्टिः दुर्बला भवेत्। शयानः चापि न पठेत्। प्रतिदिनं च सूर्योदये नेत्रव्यायामः करणीयः येन वृद्धावस्थायाम् अपि उपनेत्रस्य आवश्यकता न भवेत्। 10

**प्रश्नाः—**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **1 × 2 = 2**

(*i*) वर्तमानयुगं कीदृशम् अस्ति ?

(*ii*) नेत्रव्यायामः प्रतिदिनं कदा करणीयः ?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) यदा पुस्तकम् अतिदूरं भवति तदा किं भवति ?

(*ii*) कति दूरात् पुस्तकं पठनीयम् ?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'अतिसमीपम्' इत्यस्य किम् विपर्ययपदम् अत्र प्रयुक्तम् ?

(क) अतिदूरं (ख) अतिकठिनम् (ग) दुष्करम् (घ) समीचीनम्

(*ii*) 'भवेत्' इति क्रियायाः कर्तृपदं किम् ?

(क) आवश्यकता (ख) पठनम् (ग) बाधा (घ) योग्यता

(*iii*) 'नयनयोः' इत्यस्य पदस्य कः पर्यायः अनुच्छेदे आगतः ?

(क) कर्णयोः (ख) पादयोः (ग) नासिकयोः (घ) नेत्रयोः

(*iv*) 'नेत्रदृष्टिः दुर्बला' अनयोः विशेषणपदं किम्?

(क) दुर्बला (ख) नेत्रम् (ग) नेत्रदृष्टिः (घ) दृष्टिः

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 16

एकदा केचन शिष्याः भिक्षाटनं कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् मार्गे आगच्छत्। गजस्य उपरि उपविष्टः हस्तिपकः उच्चस्वरेण पुनः पुनः घोषयति स्म— 'अपसरन्तु अपसरन्तु' इति। सर्वे शिष्याः धावितवन्तः। यथा सर्वेषु वस्तुषु ईश्वरः अस्ति तथा गजे अपि, इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान्। तावति काले गजः तं स्वशुण्ड्या गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्च्छितम् तं गुरुकुलम् अनयन्। लब्धसंज्ञं तं गुरुः अपृच्छत्— 'वत्स! त्वम् एवं किमर्थम् आचरः इति?' शिष्यः अवदत्—'गुरुवर्य! भवद्भिः एव शिक्षितं यत् ईश्वरः सर्वेषु अस्ति अतः अहं गजे अपि ईश्वरं मत्वा तत्र अतिष्ठम् इति।' गुरुः उक्तवान्— ''वत्स! यथा गजे ईश्वरः अस्ति तथा हस्तिपके अपि ईश्वरः'' इति त्वया कथं न चिन्तितम्। 10

प्रश्नाः–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) गजः कं स्वशुण्ड्या गृहीत्वा प्राक्षिपत् ?

(*ii*) 'अपसरन्तु अपसरन्तु' इति कः घोषयति स्म ?

(*iii*) 'ईश्वरः सर्वेषु अस्ति' इति केन शिक्षितम् आसीत् ?

(*iv*) कस्मिन् ईश्वरं विचिन्त्य शिष्यः तत्रैव स्थितवान् ?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) यदा गजः आगतः तदा शिष्याः किं कुर्वन्ति स्म ?

(*ii*) शिष्यः कुत्र संज्ञाम् अलभत ?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) अनुच्छेदे 'वेगेन' इति अस्य पदस्य किं विशेषणम् ?

(क) तीव्रेण (ख) महता (ग) शनैः (घ) लघुता

(*ii*) 'अपसरन्तु' इति क्रियापदस्य कर्तृपदं किम् ?

(क) शिष्यः (ख) शिष्याः (ग) हस्तिपकः (घ) हस्तिः

(*iii*) अनुच्छेदे 'तस्मिन् एव समये' इति स्थाने किं पदं प्रयुक्तम् ?

(क) तदा (ख) तदैव (ग) यदा (घ) यदैव

(*iv*) 'हस्तिनि' इत्यस्य पदस्य कः पर्यायः अनुच्छेदे आगतः?

(क) महता (ख) गजे (ग) ईश्वरे (घ) सर्वे

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**17**

वैज्ञानिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात्। वर्तमानकाले चलभाषित्रयन्त्रं (मोबाइल (सेल) फ़ोन) तादृशम् एव लोकप्रियं यन्त्रं वर्तते। बालाः, वृद्धाः, युवकाः, पुरुषाः, महिलाः, नागरिकाः, ग्रामीणाः वा, सर्वेषाम् एव एतत् कर्णभूषणं जातम्। यानानि आरूढाः, कार्यालयेषु कार्यं कुर्वन्तः, मार्गेषु चलन्तः, सभागारेषु प्रवचनं शृण्वन्तः जनाः अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्णः अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभागारेषु, कक्षासु, अन्यसभासु वा अव्यवस्था भवति। सत्यम् अस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति। वस्तुतः वयं यन्त्रस्य अधीनाः न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति। 10

प्रश्नाः–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) वर्तमानकाले किं लोकप्रियं सञ्चारसाधनम् ?

(*ii*) यन्त्रस्य दुष्प्रयोगेण कस्य शान्तिः नश्यति ?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) के बुद्धिमन्तः सन्ति?

(*ii*) कक्षासु यन्त्रस्य ध्वनिना किं भवति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'सन्देशप्रेषणे अधिकतमा सुविधा स्यात्' अत्र किं विशेषणपदम्?

(क) अधिकतमा (ख) अधिका (ग) सुविधा (घ) सन्देशप्रेषणे

(*ii*) 'तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति' अत्र 'तस्य' इति पदं कस्मै प्रयुक्तम्?

(क) आविष्काराय (ख) दूरभाषाय (ग) यन्त्राय (घ) चलदूरभाषाय

(*iii*) 'सर्वेषाम् एव एतत् कर्णभूषणं जातम्' इति वाक्ये किम् अव्ययपदम्?

(क) एतत् (ख) जातम् (ग) एव (घ) सर्वेषाम्

(*iv*) 'ये विज्ञानस्य सदुपयोगं कुर्वन्ति'। अत्र क्रियापदं किमस्ति?

(क) ये (ख) सदुपयोगं (ग) कुर्वन्ति (घ) विज्ञानस्य

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 18

अहम् एका नदी अस्मि। पर्वतेभ्यः निर्गत्य क्षेत्रेषु आगच्छामि। तदा मम सलिलं स्वच्छं शीतलं मधुरं च भवति। प्रपातः मम प्रथमावस्था अस्ति। शनैः-शनैः अहं सागरं प्रति गच्छामि।

मम बालुकायुक्ततटेषु हरिताः तरवः भवन्ति। तेषां वृक्षाणाम् उपरि काकाः चटकाः, शुकाः कोकिलाः च वसन्ति। स्त्रियः कलशान् गृहीत्वा मम तीरे आयान्ति। कतिपयान् क्षणान् यापयित्वा, वार्तालापं कृत्वा जलेन पात्राणि पूरयित्वा ताः इतः गच्छन्ति। पक्षिणां कलरवैः, बालकानां क्रीडाभिः, स्त्रीणां वार्तालापैः मम तटाः गुञ्जायमानाः भवन्ति परं केचन जनाः अत्रागत्य मनोरञ्जनं कुर्वन्ति खादन्ति, भोजनस्य अवशिष्टं च मम जले एव पातयन्ति। एवम् अवकरैः मम जलं दूषितं भवति। दूषितं जलं स्वास्थ्याय अहितकरम् अस्ति। अतः जलं दूषितं न कर्तव्यम् यतः जलम् एव प्राणिनां जीवनम् अस्ति। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) नदी केभ्यः निर्गत्य क्षेत्रेषु आगच्छति?

(*ii*) कीदृशं जलं स्वास्थ्याय अहितकरम् अस्ति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) कस्य अवशिष्टं जनाः जले पातयन्ति?

(*ii*) पर्वतेभ्यः निर्गतायाः नद्याः जलं कीदृशं भवति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'शनैः-शनैः अहं सागरं प्रति गच्छामि।' अत्र 'अहम्' इति पदं कस्मै प्रयुक्तम्?

(क) स्त्रियै (ख) नद्यै (ग) नार्यै (घ) शक्त्यै

(*ii*) 'गुञ्जायमानाः' इति पदं कस्य विशेषणम्?

(क) तटाः पदस्य (ख) नद्यः पदस्य (ग) धाराः पदस्य (घ) नार्यः पदस्य

(*iii*) 'अध:' इति अव्ययस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?

(क) उपरि (ख) नीचैः (ग) समीपे (घ) निकषा

(*iv*) 'अहम् एका नदी अस्मि'। अत्र कर्तृपदं किम्?

(क) अहम् (ख) अस्मि (ग) नदी (घ) एका

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 19

प्रकृतिः मनुष्यस्य उपकारिणी। मनुष्यैः सह तस्याः शाश्वतः सम्बन्धः। सा विविधरूपेण अस्मिन् जगति आत्मानं प्रकटयति। पशवः, पक्षिणः वनस्पतयश्च तस्याः एव अङ्गानि। निराशाः असहायाः च जनाः तस्याः एव आश्रयं प्राप्नुवन्ति। सा स्वमनोहरेण सौन्दर्येण नीरसम् हृदयम् अपि सरसं करोति। सूर्यः चन्द्रश्च तस्याः नेत्रे स्तः। शस्य-श्यामला एषा भूमिः, विविधाः ओषधयः सकलानि खनिजानि च प्रकृतेः एव शोभा। सा तु नित्यम् एव एतैः साधनैः सर्वेषाम् उपकारं करोति, परम् अधन्यः अयं जनः कृतज्ञतां विहाय असाधुसेवितं पथं गच्छति विविधानि कष्टानि च अनुभवति। नरः शाश्वतं सुखं वाञ्छति चेत् तर्हि प्रकृतेः प्रतिकूलं कदापि न आचरेत् इति। **10**

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **½ × 4 = 2**

(*i*) मनुष्यैः सह कस्याः शाश्वतः सम्बन्धः?

(*ii*) का सर्वेषाम् उपकारं करोति?

(*iii*) मनुष्यैः सह प्रकृतेः कीदृशः सम्बन्धः?

(*iv*) सूर्यः चन्द्रः च कस्याः नेत्रे स्तः?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) प्रकृतेः का शोभा?

(*ii*) नरः शाश्वतं सुखं वाञ्छति चेत् तर्हि: किम् आचरेत्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) सूर्यः चन्द्रः च 'तस्याः' नेत्रे। अत्र '**तस्याः**' सर्वनामपदं कस्यै प्रयुक्तम्?

(क) जीवाय (ख) ईश्वराय (ग) जगते (घ) प्रकृत्यै

(*ii*) सा '**अस्मिन् जगति**' आत्मानं प्रकटयति। अत्र स्थूलपदयोः किं विशेष्यपदम्?

(क) जगति (ख) अस्मिन् (ग) इदम् (घ) जगत्

(*iii*) 'जगत् इदं भासमानं जायते।' अत्र '**भासमानं**' पदं कस्य विशेषणम्?

(क) इदं पदस्य (ख) जगत् पदस्य (ग) जायते पदस्य (घ) अस्य

(*iv*) अनुच्छेदे 'दिवाकरः' इत्यस्य पदस्य कः पर्यायः आगतोऽस्ति?

(क) चन्द्रः (ख) जनः (ग) सूर्यः (घ) नरः

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 20

अहम् एक: छिन्न: द्रुम: अस्मि। ह्य: वने एक: नर: आगच्छत्। स: काष्ठाय मम शरीरम् अच्छिनत्। छेदनेन मे शरीरे अनेके व्रणा: जाता:। छुरिकाया: प्रहारेण शरीराद् अश्रुरूपा: जलबिन्दव: अपतन्। अकथनीया मम पीडा। हृदयं विदीर्णं जातम्। अश्रुभि: कण्ठ: अवरुद्ध:। मम अन्तकाल: समीपे एव तिष्ठति। काष्ठानि एकत्रीकृत्य स: तु अगच्छत् परं कोऽस्ति अत्र मम व्यथाकथा श्रवणाय? वृक्षान् छित्त्वा नर: प्रकृतिमातु: अङ्गानि नाशयति। इन्धनाय, कर्गदपत्राय, भवननिर्माणाय मम काष्ठस्य प्रयोग: भवति। किन्तु कुत: मे पत्राणि, पुष्पाणि कुत: च रोगनिवारणाय औषधय:? प्रनेन तु निराश्रिता: भविष्यन्ति आश्रिता: खगा: कीटपतङ्गाश्च। पन्थान: अपि छायाहीना: भविष्यन्ति। आतपेन तप्ता: श्रान्ताश्च पथिका: अधुना कुत्र गमिष्यन्ति? मम जीवने पुन: वसन्तर्तु: न आगमिष्यति। 10

**प्रश्ना:–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) $1 \times 2 = 2$

(*i*) छुरिकाप्रहारेण वृक्षस्य शरीरात् के अपतन्?

(*ii*) वृक्षस्य जीवने पुन: किं न आगमिष्यति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) $2 \times 2 = 4$

(*i*) वृक्षस्य काष्ठप्रयोग: कुत्र-कुत्र भवति?

(*ii*) छेदनेन वृक्षस्य शरीरे किम् अभवत्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) $\frac{1}{2} \times 4 = 2$

(*i*) आतपेन **तप्ता: पथिका:** कुत्र गमिष्यन्ति? अस्मिन् वाक्ये स्थूलपदयो: किं विशेषणपदम्?

(क) तप्ता: (ख) तप्त (ग) पथिका: (घ) पथिक:

(*ii*) 'अकथनीया मम पीडा' अत्र 'मम' सर्वनामपदं कस्मै प्रयुक्तम्?

(क) नराय (ख) वृक्षाय (ग) द्रुमाय (घ) काष्ठाय

(*iii*) 'आश्रिता:' अस्य पदस्य विपरीतार्थकं पदं लिखत।

(क) अनाश्रिता: (ख) निराश्रिता: (ग) उपाश्रिता: (घ) अनुश्रिता:

(*iv*) अनुच्छेदे 'वृक्ष:' इत्यस्य पदस्य क: पर्याय: लिखित:?

(क) द्रुम: (ख) छिन्न: (ग) हृदयम् (घ) कण्ठ:

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** $2 \times 1 = 2$

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 21

दक्षिणभारते सागर-मध्ये एकं लघुद्वीपं वर्तते। तस्मिन् द्वीपे सागरतरङ्गै: क्षाल्यमानं प्राचीनं नगरं कन्याकुमारी इति अस्ति। एषा कन्याकुमारी त्रयाणां सागराणां सङ्गमस्थली अस्ति। समुद्रजले प्रतिबिम्बितं सूर्योदयस्य दृश्यम् अद्‌भुतम् एव। सूर्यस्य क्रमश: अरुणा, पीता धवला च शोभा दर्शकान् मन्त्रमुग्धान् करोति। सागरस्य लहरीभि: क्षिप्तानां चित्र-विचित्रवर्णानां शुक्तीनां वृष्टि: इव भवति। जलधितटे स्थितै: नारिकेल-कदली पादपै: परिवृता इव एषा नगरी। एकदा स्वामिविवेकानन्द: समुद्रजले स्थितायाम् एकस्यां बृहत्-शिलायाम् उपविष्ट: त्रीणि दिनानि यावत् ध्यानमग्न: जात:। एतस्यां शिलायाम् एव अधुना विवेकानन्दकेन्द्रं विकसितम् अस्ति। अत्र आगत्य साधका: ध्यानं साधनां च कृत्वा जीवनं सफलं कुर्वन्ति। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) त्रयाणां सागराणां संगमस्थलस्य किं नाम वर्तते ?

(*ii*) समुद्रजले प्रतिबिम्बितं कस्य दृश्यम् अद्भुतम् ?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) स्वामिविवेकानन्दः कुत्र त्रीणि दिनानि ध्यानमग्नः जातः ?

(*ii*) दक्षिणभारते कुत्र लघुद्वीपं वर्तते ?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) सागरस्य लहरीभिः **'क्षिप्तानां शुक्तीनां'** वृष्टिः इव भवति। अत्र स्थूलपदयोः किं विशेषणपदम् ?

(क) शुक्तीनां (ख) क्षिप्ताः (ग) क्षिप्तानां (घ) शुक्तीः

(*ii*) 'समुद्रजले प्रतिबिम्बितं सूर्योदयस्य दृश्यम् अद्भुतम् एव।' अस्मिन् वाक्ये अव्ययपदं किम् ?

(क) एव (ख) दृश्यम् (ग) अद्भुतं (घ) सूर्योदयस्य

(*iii*) 'करोति' इति क्रियायाः कर्तृपदं किम् ?

(क) शोभा (ख) धवला (ग) पीता (घ) अरुणा

(*iv*) अनुच्छेदे "वृक्षैः" पदस्य कः पर्यायः आगतः ?

(क) पादपैः (ख) काष्ठैः (ग) पादैः (घ) पुष्पैः

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 22

पुरा गुजरातप्रदेशे एकस्मिन् ग्रामे एकं गुरुकुलम् आसीत्। तत्र द्विशतं छात्राः गुरुभ्यः अनेकान् विषयान् पठन्ति स्म। तेषां भोजनादिव्यवस्थां नगरस्थिता एका संस्था अकरोत्। एकदा संस्थाधिकारिणः छात्रेभ्यः एकं वैद्यं प्रेषितवन्तः। सः त्रीन् मासान् तत्र अवसत्। किन्तु कोऽपि रुग्णः तस्य समीपे चिकित्सायै न आगच्छत्। वैद्यराजः प्रधानाचार्यम् अपृच्छत्— किम् अत्र कोऽपि रोगी न भवति ? प्रधानाचार्यः विहस्य अवदत्—वैद्यराज! अस्य एकं रहस्यम् अस्ति। अत्र सर्वे तदा भोजनं कुर्वन्ति, यदा ते तीव्रांक्षुधाम् अनुभवन्ति। यदा तेषां भोजनेन तृप्तिः भवति, ततः पूर्वम् एव ते भोजनं त्यजन्ति। एतत् एव एतेषां स्वास्थ्यस्य रहस्यम्। भवान् जानाति एव यत् स्वस्थाः नराः औषधं न सेवन्ते। तद्वचनं श्रुत्वा वैद्यः हसित्वा अवदत्— अत्र मम उपयोगः नास्ति। अहं गच्छामि। नमस्कारः। **यत्र रोगः तत्रैव वैद्यः।** 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) कति संख्यकाः छात्राः गुरुकुले पठन्ति स्म ?

(*ii*) कः प्रधानाचार्यम् अपृच्छत् ?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentences.) 2 × 2 = 4

(*i*) प्रधानाचार्यः विहस्य वैद्यं किम् अवदत् ?

(*ii*) गुरुकुले सर्वे कदा भोजनं कुर्वन्ति ?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) '**स्वस्थाः नराः**' औषधं न सेवन्ते। अत्र स्थूलपदयोः किं विशेषणपदम्?

(क) नराः (ख) नरः (ग) स्वस्थाः (घ) स्वस्थः

(*ii*) तैः एकः वैद्यः प्रेषितः। अत्र कर्तृपदं किं प्रयुक्तम्?

(क) एकः (ख) वैद्यः (ग) तैः (घ) प्रेषितः

(*iii*) अत्र 'मम' उपयोगः न अस्ति। अस्मिन् वाक्ये 'मम' पदं कस्मै प्रयुक्तम्?

(क) वैद्याय (ख) बालाय (ग) प्रधानाचार्याय (घ) आचार्याय

(*iv*) 'वैद्यराजः प्रधानाचार्यम् अपृच्छत्' कथानुसारं किम् इदं वाक्यं शुद्धम् अशुद्धं वा?

(क) शुद्धम् (ख) अशुद्धम् (ग) न ज्ञायते (घ) किञ्चित् शुद्धम्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस कहानी का उचित शीर्षक लिखिए। Write an appropriate title for this story.)

## 23

एकदा राजकुमारः सिद्धार्थः विहाराय उद्यानं गतवान्। अनायासं सः क्रन्दनध्वनिम् अशृणोत्। तदैव च एकः हंसः तस्य सम्मुखे भूमौ अपतत्। तं दृष्ट्वा सिद्धार्थः करुणापूर्णः सञ्जातः। पुनश्च स हंसस्य शरीराद् बाणं निष्कास्य यावत्पश्यति तावद् देवदत्तः तत्र समागतः। स सिद्धार्थम् उक्तवान् "भो सिद्धार्थ! एषः हंसः मया हतः अतः इमं हंसं मह्यं देहि।" सिद्धार्थः उच्चैः अवदत्— "न दास्यामि इमं हंसं यतः अहम् अस्य रक्षकः।" तौ परस्परम् विवदमानौ राजसभां गतवन्तौ। राजा सर्वम् उदन्तं श्रुत्वा आदिष्टवान्— "यस्य समीपे हंसः गमिष्यति स तस्यैव भविष्यति। हंसः तु सानन्दं सिद्धार्थमेव उपगतः।" उक्तम् हि—**रक्षकः भक्षकात् श्रेयान्।** 10

प्रश्नाः—

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) भूमौ कः पतितः आसीत्?

(*ii*) कः उच्चैः अवदत्?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.)— 2 × 2 = 4

(*i*) देवदत्तः किम् अवदत्?

(*ii*) राजा किम् आदिष्टवान्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'न दास्यामि इमम्' अत्र 'इमम्' पदं कस्मै प्रयुक्तम्?

(क) देवदत्ताय (ख) नृपाय (ग) कुमाराय (घ) हंसाय

(*ii*) अत्र 'गमिष्यति' इति क्रियापदस्य किम् कर्तृपदम्?

(क) यस्य (ख) हंसः (ग) समीपे (घ) नृपस्य

(*iii*) 'सहसा' इति अव्ययस्य कः पर्यायः?

(क) अनायासम् (ख) तदैव (ग) तत्र (घ) पुनः

(*iv*) 'सिद्धार्थः करुणापूर्णः' अनयोः पदयोः विशेषणपदं किम्?

(क) सिद्धार्थः (ख) करुणा (ग) करुणापूर्णः (घ) पूर्णः

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 24

सत्सङ्गतेः महिमानं को न जानाति ? संसारे सज्जनाः अपि दुर्जनाः अपि सन्ति। दुर्जनस्य सङ्गतिं कोऽपि कर्तुं न इच्छति। अपरत्र सत्सङ्गं विना मानवस्य जीवनम् एव दुर्जीवनं भवति। वस्तुतः सत्सङ्गतिः जनानां पोषिका कुसङ्गतिश्च नाशिका। सर्वे जनाः स्वपोषमेव इच्छन्ति विनाशं तु न इच्छन्ति। अतः सत्सङ्गतिः एव श्रेयसी। सज्जनाः तु स्वगुणैः एव सन्तः कथ्यन्ते, अतएव जनाः सज्जनानां गुणेभ्यः स्पृह्यन्ति। सद्गुणेनैव जनः मनसा वाचा कर्मणा स्वस्थो भवति। तेन तस्य आयुः वर्धते, यशः अपि सततं वर्धते। को न जानाति यत् सर्वेषां देशानां महापुरुषाः अपि सत्सङ्गत्या श्रेष्ठां पदवीं प्राप्नुवन्। उक्तं हि भवभूतिना महाकविना—'**सत्सङ्गजानि निधनान्यपि तारयन्ति।**' 10

**प्रश्नाः**–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) सत्सङ्गतिं विना मानवस्य जीवनं किं भवति ?

(*ii*) कुसङ्गतिः कीदृशी ?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) संसारे कीदृशाः जनाः सन्ति ?

(*ii*) भवभूतिना किम् उक्तम् ?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) अनुच्छेदे 'कुसङ्गतिः' पदस्य विपर्ययपदं किम् ?

(क) सत्सङ्गजानि (ख) सततं (ग) सत्सङ्गतिः (घ) दुस्सङ्गतिः

(*ii*) 'जनाः गुणेभ्यः स्पृह्यन्ति।' अत्र कर्तृपदं किम् ?

(क) जनाः (ख) जनः (ग) गुणेभ्यः (घ) स्पृह्यन्ति

(*iii*) 'अलभन्त' इत्यर्थे अत्र गद्यांशे किं पदं प्रयुक्तम् ?

(क) इच्छन्ति (ख) स्पृह्यन्ति (ग) प्राप्नुवन् (घ) उक्तम्

(*iv*) 'श्रेष्ठां पदवीम्' अनयोः विशेषणं किम् ?

(क) पदवीम् (ख) श्रेष्ठा (ग) श्रेष्ठाम् (घ) पदवी

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 25

वैज्ञानिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात्। चलभाषितयन्त्रम् (मोबाइल सेलफ़ोन) तादृशम् एव लोकप्रिययन्त्रम् अस्ति। बालाः, वृद्धाः, युवकाः, पुरुषाः, महिलाः, नागरिकाः, ग्रामीणाः कर्मकराः च सर्वेषाम् एव एतत् कर्णभूषणं जातम्। यानानि आरूढाः, कार्यालयेषु कार्यं कुर्वन्तः, मार्गेषु चलन्तः, सभागारेषु प्रवचनं शृण्वन्तः जनाः अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्णः अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभागारेषु, कक्षासु अन्यस्थानेषु च अव्यवस्था भवति। सत्यम् अस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति। वस्तुतः वयं यन्त्रस्य अधीनाः न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति। 10

प्रश्ना:–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) के विज्ञानस्य सदुपयोगं कुर्वन्ति?

(*ii*) अद्यत्वे किं लोकप्रियं यन्त्रम्?

(*iii*) अस्य यन्त्रस्य अविवेकपूर्णेन प्रयोगेण मार्गेषु का: भवन्ति?

(*iv*) यन्त्रं केषाम् अधीनं स्यात्?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) जीवनस्य शान्ति: कथं नश्यति?

(*ii*) चलभाषितयन्त्रं (मोबाइल सेलफ़ोन) केषां कर्णभूषणं जातम्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'अविवेकपूर्ण: अस्य प्रयोग:' अत्र 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) यन्त्राय (ख) भाषितयन्त्राय (ग) चलभाषितयन्त्राय (घ) यानाय

(*ii*) 'लाभकर:' अस्य विपर्ययपदं गद्यांशात् चित्वा लिखत।

(क) हानिकर: (ख) आविष्कार: (ग) कर्मकर: (घ) दुष्कर:

(*iii*) 'आकर्ण्य' अस्मिन् अर्थे किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क) कुर्वन्त: (ख) श्रुत्वा (ग) शृण्वन्त: (घ) वदन्त:

(*iv*) "नवीनतमान् आविष्कारान्" अनयो: विशेषणपदं किम्?

(क) नवीनान् (ख) आविष्कारम् (ग) नवीनतमान् (घ) आविष्कारान्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**26**

एकदा शीतस्य भीषण: प्रकोप: अभवत्। सम्राट् चन्द्रगुप्त: निश्चितवान् यत् निर्धनेभ्य: कम्बलानां वितरणं भवेत्। प्रधानमन्त्री चाणक्य: तत्कार्यं स्वीकृतवान्। भृत्या: सर्वान् कम्बलान् तस्य कुटीरे स्थापितवन्त:। रात्रौ केचन चौरा: कम्बलान् चोरयितुं तस्य कुटीरं प्राविशन्। ते अपश्यन् यत् चाणक्य: एकस्मिन् कटे कम्बलं विना एव सुप्त:। तस्मिन्नेव क्षणे चाणक्य: पदध्वनिं श्रुत्वा प्रबुद्ध:। चौरा: तम् अपृच्छन्—'भवतां समीपे कम्बलानां राशि: अस्ति तथापि भवान् कम्बलं विना एव स्वपिति।' चाणक्य: अवदत्— "शृणुत! एते प्रावारका: केवलं निर्धनेभ्य: वितरणार्थम् एव सन्ति। यदि अहम् एतेषु एकं स्वीकरोमि तर्हि अहम् अपि चौर: भविष्यामि।" नतमस्तका: चौरा: तस्य पादयो: पतित्वा क्षमायाचनाम् अकुर्वन्। 10

प्रश्ना:–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) चाणक्य: किं श्रुत्वा प्रबुद्ध:?

(*ii*) कम्बलानां वितरणं केभ्य: एव आसीत्?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) भृत्या: कम्बलान् कस्य कुटीरे स्थापितवन्त:?

(*ii*) चौरा: चाणक्यस्य पादयो: पतित्वा किम् अकुर्वन्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) कम्बलानां किम् अन्यत् पर्यायपदम् अनुच्छेदे प्रयुक्तम्?

(क) प्रावारका: (ख) कम्बला: (ग) कटा: (घ) तटा:

(*ii*) 'यदि अहम् एतेषु एकं स्वीकरोमि' अत्र 'एतेषु' इति सर्वनामपदं केभ्य: प्रयुक्तम्?

(क) वस्तुभ्य: (ख) धनेभ्य: (ग) कम्बलेभ्य: (घ) चौरेभ्य:

(*iii*) 'भविष्यामि' इति क्रियापदस्य कर्तृपदं किम्?

(क) त्वम् (ख) यूयम् (ग) वयम् (घ) अहम्

(*iv*) 'केचन' इति पदं केषां विशेषणम्?

(क) जनानाम् (ख) कम्बलानाम् (ग) चौराणाम् (घ) वस्तूनाम्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। **Write an appropriate title for this passage.**)

## 27

तमिलनाडुप्रदेशे भारतस्य दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते कन्याकुमारी। अत्र पूर्वसमुद्रस्य, पश्चिमसमुद्रस्य दक्षिणसमुद्रस्य च सङ्गम: भवति। एते त्रय: समुद्रा: भारतवर्षस्य पदतलं निरन्तरं प्रक्षालयन्ति। प्रात: सायं च सर्वदा जनानां महान् सम्मर्द: भवति। प्रात: सूर्योदयस्य सायं सूर्यास्तस्य च दृश्ये सर्वेषां मन: हरत:। अत्र एकम् अन्य दर्शनीयं स्थानम् विवेकानन्दस्मारकं नामक: अस्ति। कन्याकुमारीत: यन्त्रचालितया नौकया विवेकानन्दस्मारकं प्रति गन्तुं शक्यते। समुद्रतीरात् प्रस्थिता नौका आदौ तिरुवल्लुवर प्रतिमाया: समीपं गच्छति। तिरुवल्लुवरमहोदयेन 'तिरुक्कुरल्' इति नामक: तमिलवेद: रचित:। इत: प्रयाणं कृत्वा स्मारकं प्रति गम्यते। तत्र भूतले एकं विशिष्टं ध्यानमन्दिरम् अस्ति यत्र अन्धकारमये प्रकोष्ठे प्रकाशमानम् **'ओ३म्'** इति चित्रं दृश्यते। तत्र सर्वे मौनव्रतमेव धारयन्ति। समुद्रस्य स्वर्णमयं जलम्, स्मारकस्य दर्शनम् सर्वमेव प्रेरणादायकं स्फूर्तिदायकम् च अस्ति। 10

**प्रश्ना:–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) तमिलवेदस्य ग्रन्थस्य नाम किम्?

(*ii*) त्रय: समुद्रा: कस्य पदतलं प्रक्षालयन्ति?

(*iii*) कन्याकुमारीत: स्मारकं प्रति कया गम्यते?

(*iv*) ध्यानमन्दिरस्य प्रकोष्ठं कीदृशं वर्तते?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) कन्याकुमारी कस्मिन् प्रदेशे अस्ति?

(*ii*) कन्याकुमारी स्थले कति समुद्राणां सङ्गम: भवति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'नौकया' इति विशेष्य पदस्य किं विशेषणम् अत्र प्रयुक्तम्?

(क) एकया (ख) यन्त्रचालिता (ग) यन्त्रचालितया (घ) लाघ्वया

(*ii*) 'अन्ते' इति कस्य पदस्य विपर्ययपदम् अस्ति?

(क) आदौ (ख) प्रथमे (ग) भूतले (घ) प्रदेशे

(*iii*) 'धारयन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(क) जना: (ख) मनुष्य: (ग) लोका: (घ) सर्वे

(*iv*) 'जनसमूह:' इति कस्य पर्यायो वर्तते?

(क) महान् (ख) सम्मर्द: (ग) समुदाय: (घ) इत:

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए समुचित शीर्षक लिखिए। Write an suitable title for this paragraph.)

## 28

धनस्य जीवने अत्यधिकं महत्त्वम् अस्ति। धनेन जीवननिर्वाह: भवति। धनं विना वयं कथं भोजनम् अपि प्राप्तुं शक्नुम:? परन्तु यदि लोभेन वयं अन्धा: भूत्वा अधिकाधिकं धनं प्राप्तुम् इच्छाम:, अनुचितसाधनानां प्रयोगं कुर्म:, तर्हि तेन धनेन दु:खमेव भविष्यति। तस्य रक्षणे एव समय: व्यतीत: भवति। कोऽपि तां हरिष्यति इति चिन्ता प्रतिक्षणं वर्धते। अभिमान: विवेकं नाशयति। कृष्णधनस्य प्रच्छादनाय महान् क्लेश: भवति। अत: वयम् उचितै: साधनै: एव धनार्जनं कुर्याम, कस्मै अपि ईर्ष्यां न कुर्याम अपितु यथाशक्ति ये असहाया: सन्ति तेषां साहाय्यं कुर्याम:। त्यागेन एव धनस्य संरक्षणं भवति। त्यागपूर्वकम् उपभोगेन एव वयम् आनन्दं प्राप्तुं शक्नुम:। अन्यस्य धनं प्रति कदापि अस्माभि: लोभ: नैव कर्तव्य:। 10

**प्रश्ना:–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) अभिमान: कं नाशयति?

(*ii*) वयं केषां साहाय्यं कुर्याम?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) धनार्जनं कथं करणीयम्?

(*ii*) प्रतिक्षणं का वर्धते?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'उद्घाटनाय' इत्यस्य पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) स्वच्छादनाय (ख) प्रच्छादनाय (ग) कृष्णधनाय (घ) आनन्दाय

(*ii*) 'तस्य रक्षणे एव समय: व्यतीत: भवति' इत्यत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) बलाय (ख) जीवाय (ग) धनाय (घ) गृहाय

(*iii*) 'कुर्याम' इति क्रियापदस्य कर्तृपदं किम्?

(क) त्वम् (ख) अहम् (ग) आवाम् (घ) वयम्

(*iv*) 'अधिकाधिकम्' इति कस्य पदस्य विशेषणम्?

(क) धनम् (ख) महत्त्वम् (ग) प्रतिक्षणम् (घ) आनन्दम्

**IV. उपरिलिखितस्य अनुच्छेवस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## 29

कालिदास: मेघदूतं रचितवान्। मेघदूते मानसूनविज्ञानस्य अद्भुतं वर्णनम् अस्ति। मानसूनसमय: आषाढमासात् प्रारभते। श्याममेघान् दृष्ट्वा सर्वे जना: प्रसन्ना: भवन्ति। मयूरा: नृत्यन्ति। मानसूनमेघा: सर्वेषां जीवानां कष्टम् अपहरन्ति। मेघानां जलं वनस्पतिभ्य:, पशुपक्षिभ्य:, किं वा सर्वेभ्य: प्राणिभ्य: जीवनं प्रयच्छति। मेघजलै: भूमे: उर्वराशक्ति: वर्धते। क्षेत्राणां सिञ्चनं भवति। गगने यदा कदा इन्द्रधनु: अपि दृश्यते। वायु: शीतल: भवति। शुष्कभूमौ वर्षाया: बिन्दव: पतन्ति। भूमे: सुगन्धितं वाष्पं निर्गच्छति। कदम्बपुष्पाणि विकसन्ति। तेषु भ्रमरा: गुञ्जन्ति। हरिणा: प्रसन्ना: भूत्वा इतस्तत: धावन्ति। चातका: जलबिन्दून् पिबन्ति। बलाका: पङ्क्तिं बद्ध्वा आकाशे उड्डीयन्ते। मेघदूते मेघ: यक्षस्य सन्देशं नयतु इति प्रार्थित:। अत: कालिदास: वायुमार्गस्य ज्ञानवर्धकं वर्णनं करोति। 10

**प्रश्ना:–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) मेघानां जलं प्राणिभ्य: किं प्रयच्छति?

(*ii*) भ्रमरा: कुत्र गुञ्जन्ति?

(*iii*) कै: क्षेत्राणां सिञ्चनं भवति?

(*iv*) के पङ्क्तिं बद्ध्वा आकाशे उड्डयन्ते?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) मेघदूतं क: रचितवान्?

(*ii*) बलाका: कथम् आकाशे उड्डीयन्ते?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) अन्तिमपङ्क्तौ अव्ययपदं किम् वर्तते?

(क) वर्णनं (ख) अत: (ग) कालिदास: (घ) ज्ञानवर्धकं

(*ii*) 'ज्ञानवर्धकम्' इति कस्य विशेषणम्?

(क) धनस्य (ख) जलस्य (ग) वर्णनस्य (घ) गगनस्य

(*iii*) 'धावन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(क) जीवा: (ख) मृगा: (ग) पशव: (घ) हरिणा:

(*iv*) 'क्षीयते' इति क्रियापदस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?

(क) वर्धते (ख) अस्ति (ग) भवति (घ) करोति

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 30

जिह्वाया: माधुर्यं स्वर्गं प्रापयति, जिह्वाया: कटुता नरके पातयति। एक: एव शब्द: जीवनं विभूषयेत्, अन्य: एक: शब्द: जीवनं नाशयेत्। एकदा द्वयो: धनिकयो: मध्ये विवाद: उत्पन्न: जात:। तौ न्यायालयं गतौ। एक: धनिक: अचिन्तयत्— अहं लक्षं रुप्यकाणि न्यायाधीशाय यच्छामि इति। स: स्यूते लक्षं रुप्यकाणि स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीश: तस्य मन्तव्यं ज्ञात्वा क्रुद्ध: अभवत्। धनिक: अवदत्— भो: मत्सदृशा: लक्षरुप्यकाणां दातार: दुर्लभा: एव। न्यायाधीश: अवदत्— लक्षरुप्यकाणां दातार: कदाचित् अन्ये अपि भवेयु: परन्तु लक्षरुप्यकाणां निरादरकर्त्तार: मत्सदृशा: अन्ये विरला: एव। अत: कृपया गच्छतु। न्यायस्थानं मलिनं मा कुरु। लज्जित: धनिक: धनस्यूतं गृहीत्वा तत: निर्गत:। 10

प्रश्नाः–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) $1 \times 2 = 2$

(*i*) धनिकः धनम् आदाय कस्य गृहं गतवान् ?

(*ii*) कस्याः कटुता नरके पातयति ?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) $2 \times 2 = 4$

(*i*) कः न्यायस्थानं मलिनं कर्तुम् इच्छति स्म ?

(*ii*) न्यायाधीशः किमर्थं क्रुद्धः अभवत् ?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) $\frac{1}{2} \times 4 = 2$

(*i*) 'लज्जितः' इति पदं कस्य विशेषणम् ?

(क) धनिकस्य (ख) न्यायाधीशस्य (ग) निर्धनस्य (घ) मलिनस्य

(*ii*) 'सुलभाः' इति पदस्य विपर्ययपदं किम् अत्र प्रयुक्तम् ?

(क) मत्सदृशाः (ख) दातारः (ग) दुर्लभाः (घ) निराकर्त्तारः

(*iii*) 'तौ न्यायालयं गतौ' इति वाक्ये 'तौ' इति पदं काभ्यां प्रयुक्तम् ?

(क) ताभ्याम् (ख) धनिकाभ्याम् (ग) विरलाभ्याम् (घ) जनाभ्याम्

(*iv*) 'अतः कृपया गच्छतु' इति अत्र क्रियापदं किम् ?

(क) गच्छतु (ख) कृपा (ग) कृपया (घ) अतः

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** $2 \times 1 = 2$

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## 31

षट् कारणानि श्रियं विनाशयन्ति। प्रथमं कारणमस्ति असत्यम्। यः नरः असत्यं वदति, तस्य कोऽपि जनः विश्वासं न करोति। निष्ठुरता अस्ति द्वितीयं कारणम्। उक्तञ्च— 'सत्यं ब्रूयात्, प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम्।' तृतीयं कारणम् अस्ति कृतघ्नता। जीवने अनेके जनाः अस्मान् उपकुर्वन्ति। प्रायः जनाः उपकारिणं विस्मरन्ति, प्रत्युपकारं न कुर्वन्ति। एताकृशः स्वभावः कृतघ्नता इति उच्यते। आलस्यम् अपरः महान् दोषः, 'आलस्यं हि मनुष्याणां शरीरस्थः महारिपुः'। अहङ्कारः मनुष्यस्य मतिं नाशयति। अहङ्कारी मनुष्यः सर्वदा आत्मप्रशंसाम् एव करोति। न कदापि कस्यचित् उपकारं करोति। व्यसनानि अपि श्रियं हरन्ति। ये मद्यपानं कुर्वन्ति तेषाम् आत्मिकबलम्, बुद्धिबलं शारीरिकबलं च नश्यति। अतः बुद्धिमान् एतान् दोषान् सर्वथा त्यजेत्। 10

प्रश्नाः–

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) $\frac{1}{2} \times 4 = 2$

(*i*) कीदृशं सत्यं न ब्रूयात् ?

(*ii*) मनुष्याणां शरीरस्थः महारिपुः कः ?

(*iii*) किं द्वितीयं कारणं श्रियं विनाशयति ?

(*iv*) अहङ्कारः किं नाशयति ?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) $2 \times 2 = 4$

(*i*) अहङ्कारी मनुष्यः किं करोति ?

(*ii*) तृतीयं कारणं किम् उच्यते ?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'नाशयति' इति क्रियापदस्य कर्तृपदं किम्?

(क) अहङ्कारः (ख) गर्वम् (ग) धनम् (घ) बलम्

(*ii*) 'बुद्धिः अस्य अस्ति' इति स्थाने किं पदम् अत्र प्रयुक्तम्?

(क) मतिम् (ख) बुद्धिम् (ग) बुद्धिबलम् (घ) बुद्धिमान्

(*iii*) 'स्मरन्ति' इति क्रियापदस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?

(क) उपकुर्वन्ति (ख) अनुस्मरन्ति (ग) विस्मरन्ति (घ) कुर्वन्ति

(*iv*) 'षट्' इति पदं कस्य विशेषणम्?

(क) कारणानि पदस्य (ख) कारणम् (ग) अहङ्कारस्य (घ) श्रियस्य

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

**32**

सुबुद्धिः दुर्बुद्धिश्च द्वौ धनिकौ आस्ताम्। सुबुद्धेः विशालं भवनम् आसीत्। तस्य अनेके उद्योगाः चलन्ति स्म। अतएव सः सर्वदा प्रसन्नचित्तः ईश्वरं स्मरन् आनन्दे निमग्नः भवति स्म। दुर्बुद्धिः तावत् लोभी आसीत्। सदा अधिकाधिकं धनसङ्ग्रहं कर्तुम् इच्छति स्म। सर्वदा असन्तुष्टः, क्रुद्धः दुःखी च भवति स्म। एकदा दुर्बुद्धिः कार्यवशात् सुबुद्धेः गृहम् अगच्छत्। आनन्दमग्नं तं दृष्ट्वा अपृच्छत्–"भवतः आनन्दस्य शान्तेश्च किं रहस्यम्?" सुबुद्धिः उवाच–"मित्र! मम चत्वारः अङ्गरक्षकाः सन्ति। प्रथमः तु सत्यं यत् माम् अपराधात् सर्वदा रक्षति। द्वितीयः स्नेहः, अहं सर्वान् कर्मचारिणः पुत्रवत् मन्ये। तृतीयः न्यायः, यः माम् अन्यायात् रक्षति। चतुर्थः त्यागः मां दानाय प्रेरयति। अतः एतेषां सहायतया अहं सर्वदा आनन्देन जीवामि लोकहितं च करोमि इति।" दुर्बुद्धिः श्रद्धया तस्य चरणयोः अपतत्। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) सुबुद्धेः कति अङ्गरक्षकाः आसन्?

(*ii*) सुबुद्धिः सर्वदा कस्मिन् निमग्नः भवति स्म?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) दुर्बुद्धिः सर्वदा कस्य सङ्ग्रहं कर्तुम् इच्छति स्म?

(*ii*) सुबुद्धिः सर्वान् कर्मचारिणः कथं मन्यते स्म?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'सर्वान्' इति विशेषणस्य विशेष्यपदं किम्?

(क) अहम् (ख) कर्मचारिणः (ग) पुत्रवत् (घ) जनान्

(*ii*) 'चलन्ति स्म' इति क्रियापदस्य कर्तृपदं किम्?

(क) उद्योगाः (ख) अनेके (ग) तस्य (घ) उद्योगः

(*iii*) 'एतेषां सहायतया' इत्यत्र 'एतेषाम्' इति पदं केभ्यः प्रयुक्तम्?

(क) अङ्गरक्षकेभ्यः (ख) मित्रेभ्यः (ग) सेवकेभ्यः (घ) जनेभ्यः

(*iv*) 'न्यायात्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) अधर्मात् (ख) अन्यायात् (ग) अपराधात् (घ) अनायात्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 33

एकदा शरीरस्य सर्वाणि इन्द्रियाणि—हस्तौ, पादौ, मुखं, नासिका, कर्णौ इत्यादीनि मिलित्वा अचिन्तयन्—"वयं सर्वे प्रतिदिनं परिश्रमं कुर्मः। एतद् उदरं सर्वं स्वीकरोति, स्वयं किमपि कार्यं न करोति। अद्यप्रभृति वयमपि कार्यं न करिष्यामः।" एवं चिन्तयित्वा सर्वाणि अङ्गानि कार्यम् अत्यजन्। पादौ स्थिरौ भूत्वा अतिष्ठताम्। हस्तौ निश्चलौ अभवताम्। मुखं अन्नकणः अपि न प्राविशत्। एवं द्वे दिने व्यतीते जाते। शनैः शनैः सर्वाणि अङ्गानि शिथिलानि अभवन्। कार्यशक्तिः क्षीणा अभवत्। कथमपि पुनः मिलित्वा विचारम् अकुर्वन्—"अहो! अस्माकं प्रमादः। भुक्तस्य अन्नस्य पाचनं तु उदरमेव करोति। एतद् एव अस्मभ्यं शक्तिं ददाति। अस्य कृपया एव वयं जीवामः। अतः अस्माभिः सर्वैः अनेन सह सहयोगः करणीयः"। **नूनं संहतिः एव कार्यसाधिका।** **10**

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **½ × 4 = 2**

(*i*) शनैः शनैः सर्वाणि अङ्गानि कीदृशानि अभवन्?

(*ii*) कार्यसाधिका का भवति?

(*iii*) भुक्तस्य अन्नस्य पाचनं किम् अङ्गं करोति?

(*iv*) पादौ कीदृशौ भूत्वा अतिष्ठताम्?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) कानि अङ्गानि मिलित्वा कार्यं त्यक्तवन्तः?

(*ii*) कस्य कृपया अङ्गानि शक्तियुक्तानि भवन्ति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'करिष्यामः' इति क्रियापदस्य कर्तृपदं किम्?

(क) वयमपि (ख) वयम् (ग) त्वम् (घ) आवाम्

(*ii*) 'अहो! अस्माकं प्रमादः' इत्यत्र 'अस्माकं' इति सर्वनामपदं केभ्यः प्रयुक्तम्?

(क) इन्द्रियेभ्यः (ख) अङ्गेभ्यः (ग) इन्द्रेभ्यः (घ) भागेभ्यः

(*iii*) 'भुक्तस्य' इति विशेषणस्य विशेष्यपदं किम्?

(क) निश्चलौ (ख) स्थिरौ (ग) चञ्चलौ (घ) अन्नस्य

(*iv*) 'चलौ' इति पदस्य किं विपर्ययपदम् अत्र प्रयुक्तम्?

(क) अचलौ (ख) सचलौ (ग) निर्चलौ (घ) निश्चलौ

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate title for this passage.)

## 34

एकदा एका पञ्चदशवर्षीया बालिका पित्रा सह मेलकं द्रष्टुं नगरं प्रति गच्छति स्म। सा चतुरमतिः धैर्यशालिनी च आसीत्। सा बाल्यकाले एव विविधासु विद्यासु पारङ्गता आसीत्। मार्गे एका नदी आसीत्। सा नौकया गच्छति स्म। नौकायाम् अनेके जनाः आसन्। नद्यां एकः मकरः आसीत्। तत्र द्वौ जनौ तस्मात् मकरात् भीतौ जले पतितौ। तयोः मुखे भयस्य छाया आसीत्। सा अपि भीता आसीत् परन्तु सा अचिन्तयत्—'तयोः जनयोः रक्षणं कथं करणीयम्?' सा जले अकूर्दत् तयोः च जनयोः हस्तौ गृहीत्वा नौकां प्रति आनयत्। सा तयोः रक्षणम् अकरोत्। सा साहसिनी बालिका लक्ष्मीबाई आसीत्। एतस्यै वीरबालायै नमः। 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **1 × 2 = 2**

(*i*) बालिका केन सह मेलकं द्रष्टुम् अगच्छत्?

(*ii*) बालिका कुत्र अकूर्दत्?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) साहसिनी बालिका का आसीत्?

(*ii*) मार्गे का आसीत्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'साहसिनी बालिका' अनयोः पदयोः विशेष्यपदं किम्?

(क) बालिका (ख) बालिकाः (ग) साहसिनी (घ) साहसी

(*ii*) 'बहवः' इत्यर्थे अस्मिन् अनुच्छेदे किं पदं प्रयुक्तम्?

(क) बहूनि (ख) अनेक (ग) अनेके (घ) बह्वयः

(*iii*) 'अनेके जनाः आसन्' इति वाक्ये कर्तृपदं किम् अस्ति?

(क) अनेके (ख) जनाः (ग) अनेकाः (घ) जनः

(*iv*) 'सा तयोः रक्षणम् अकरोत्' अस्मिन् वाक्ये क्रियापदं किम् अस्ति?

(क) अकरोत् (ख) सा (ग) रक्षणम् (घ) तयोः

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस गद्यांश के लिए उचित शीर्षक लिखिए। Write an appropriate for this passage.)

## 35

चीनदेशस्य प्रख्यातः दार्शनिकः 'हू लाई' प्रतिदिनं प्रातः पर्वते अभ्रमत्। मार्गे तस्य मित्रम् अमिलत् यः तं प्राणमत् परं स दार्शनिकः तस्य उत्तरम् अर्धहोराऽनन्तरमददात् यतः स विचारेषु मग्नः आसीत्। एकदा मित्रस्य एको बन्धुः तेन सह आसीत्। सः स्वभावतः दार्शनिकमनमत् अग्रे च गत्वा अवदत्–''अहो कीदृशं शोभनमस्ति प्रभातम्, कीदृशानि मनमोहकानि सन्ति दृश्यानि अत्र।'' दार्शनिकः स्वमित्रं तस्य बन्धुं च सक्रोधमपश्यत्। यदा एकस्मिन् दिने दार्शनिकमित्रं तस्य गृहे प्राप्तः तु दार्शनिकः अकथयत्—'तव बन्धुः तु अधिकमेव वदति, पुनः एनं मद् गृहे मा आनय। एषः सर्वान् दर्शयति एतानि सुन्दराणि दृश्यानि।' 10

**प्रश्नाः–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **½ × 4 = 2**

(*i*) कः पर्वते अभ्रमत्?

(*ii*) दार्शनिकः शीघ्रम् किं न अददात्?

(*iii*) दार्शनिकः स्वमित्रं कथमपश्यत्?

(*iv*) कः अधिकं वदति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) गृहे प्राप्तं स्वमित्रं दार्शनिकः किम् अकथयत्?

(*ii*) दार्शनिकस्य मित्रस्य बन्धुः अग्रे गत्वा किम् अवदत्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'दृश्यानि' अस्य किं विशेषणम् अनुच्छेदे आगतम्?

(क) सुन्दराणि (ख) एतानि (ग) सुन्दरम् (घ) एतत्

(*ii*) 'तेन सह आसीत्' अत्र 'तेन' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) बन्धवे (ख) मित्राय (ग) दार्शनिकाय (घ) एतस्मै

(*iii*) 'अवदत्' अस्याः क्रियायाः कर्तृपदं किम्?

(क) स्वभावतः (ख) दार्शनिकम् (ग) अग्रे (घ) सः

(*iv*) अनुच्छेदे 'असुन्दराणि' अस्य विपर्ययपदं किम्?

(क) मनमोहकानि (ख) मोहकानि (ग) सुन्दराणि (घ) उत्तमानि

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## व्याकरण वीथिः पुस्तकात्

## उदाहरणार्थम्

### 1

उत्साहः उदासीनता, निराशा चेति तिस्रः मनसः अवस्थाः। शिशवः सदा उत्साहशीलाः इति विदितमेव। युवानः अपि प्रायेण उत्साहशीलाः। अनेके वृद्धाः अपि तथैव। वयसः उत्साहस्य च नास्ति सम्बन्धः। उत्साहः मानवस्य सहजः स्वभावः। सः मनसः शरीरस्य च विकासाय भवति। शिशुः उत्साहेन सर्वं ग्रहीतुं, सर्वैः सह खादितुं सर्वैः सह खेलितुं च प्रवर्तते। प्रतिबन्धे कृते रोदिति। उपहासे कृते क्रोधं प्रकटयति किन्तु निराशो न भवति।

**उपरिलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) शिशुः उपहासे कृते किं करोति?

**उत्तर :** क्रोधम्।

(*ii*) मनसः कति अवस्थाः सन्ति?

**उत्तर :** तिस्रः।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) के के उत्साहशीलाः भवन्ति?

**उत्तर :** शिशवः, युवानः वृद्धाश्चापि उत्साहशीलाः भवन्ति।

(*ii*) कयो: सम्बन्ध: नास्ति?

**उत्तर :** वयस: उत्साहस्य च सम्बन्ध: नास्ति।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) $1 \times 2 = 2$

(*i*) 'अनेके वृद्धा:' अत्र विशेषणपदम् किम्?

**उत्तर :** अनेके।

(*ii*) 'ज्ञातमेव' इति अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

**उत्तर :** विदितमेव।

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** $2 \times 1 = 2$

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। **Write a suitable title for this paragraph.**)

**उत्तर :** उत्साहस्य महत्त्वम्।

## 2

कस्मिंश्चित् प्रदेशे काचित् नदी प्रवहति स्म। नदीतीरे कश्चन संन्यासी स्वशिष्यै: सह आश्रमं निर्माय वसति स्म। एकदा संन्यासी शिष्यै: सह नद्या: अपरं तीरं गन्तुम् एकां नौकाम् आरूढवान्। वेगेन प्रवहन्त्यां नद्याम् अकस्मात् एका अपरा नौका शिलाया: घट्टनेन निमग्ना अभवत्। तेन तस्यां नौकायां स्थिता: सर्वे जना: मरणं प्राप्तवन्त:। संन्यासी अकथयत्–तस्यां नौकायां स्थितेषु कश्चित् दुष्ट: आसीत् इति मन्ये। अत: ते सर्वे मरणं प्राप्तवन्त:।

**उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। **Answer in one word.**) $1 \times 2 = 2$

(*i*) संन्यासी कुत्र वसति स्म?

**उत्तर :** आश्रमे (नदी तीरे)।

(*ii*) अपरा नौका कस्या: घट्टनेन नद्यां निमग्ना अभवत्?

**उत्तर :** शिलाया:।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। **Answer in complete sentence.**) $2 \times 2 = 4$

(*i*) नदी कुत्र प्रवहति स्म?

**उत्तर :** नदी कस्मिंश्चित् प्रदेशे प्रवहति स्म।

(*ii*) संन्यासी नौकादुर्घटनाया: किं कारणं कथितवान्?

**उत्तर :** संन्यासी नौकादुर्घटनाया: नौकायां स्थितेषु दुष्ट: इति कारणं कथितवान्।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) $1 \times 2 = 2$

(*i*) 'सज्जन:' इति पदस्य विपरीतार्थकपदम् अनुच्छेदात् चित्वा लिखत।

**उत्तर :** दुष्ट:।

(*ii*) 'आरूढ़वान्' इति क्रियाया: कर्तृपदम् अनुच्छेदात् चित्वा लिखत।

**उत्तर :** संन्यासी।

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** $2 \times 1 = 2$

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। **Write a suitable title for this paragraph.**)

**उत्तर :** संगते: प्रभाव:।

## 3

प्रात:कालादारभ्य सायं पर्यन्तं मानव: अनेकानि कार्याणि करोति। एतेषु कार्येषु किं समीचीनं किं वा असमीचीनम् इति विषये शयनकाले अवश्यं चिन्तनीयम्। एतादृशेन आत्मावलोकनेन स्वकीये आचरणे आज्ञानेन अनवधानेन रागद्वेषाभ्यां वा यदि कश्चन प्रमाद: सञ्जात:, अपचार: द्रोहो वा निष्पन्न: तर्हि तेषां परिमार्जनोपाय: अवश्यम् आलोचनीय:। पश्चात्ताप: अनुभवितव्य:। श्व: प्रभृति एतादृशं प्रमादं न करिष्यामि इति दृढ़सङ्कल्प: करणीय:।

**उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **1 × 2 = 2**

(*i*) किं समीचीनम् किं वा असमीचीनम् इति विषये कदा आलोचनीयम्?

**उत्तर** : शयनकाले।

(*ii*) यदि अपचार: द्रोह: वा निष्पन्न: तदा क: अवश्यम् आलोचनीय:?

**उत्तर** : परिमार्जनोपाय:।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) क: दृढ़सङ्कल्प: करणीय:?

**उत्तर** : स्व: प्रभृति एतादृशं प्रमादं न करिष्यामि इति दृढ़सङ्कल्प: करणीय:।

(*ii*) मानव: प्रात:कालादारभ्य किं करोति?

**उत्तर** : प्रात:कालादारभ्य सायं पर्यन्तं मानव: अनेकानि कार्याणि करोति।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **1 × 2 = 2**

(*i*) 'करोति' इति क्रियाया: कर्तृपदं किमस्ति?

**उत्तर** : मानव:।

(*ii*) अनुच्छेदे के पदे परस्परं विपरीतार्थे प्रयुक्ते?

**उत्तर** : समीचीनम्–असमीचीनम्।

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

**उत्तर** : दृढ़सङ्कल्पस्य महत्त्वम्।

## 4

य: स्वदोषाणां कृते अनुतपति तस्य सत्पथगमनस्य द्वारम् उद्घाटितं भवति। अनुतापपालनेन पापानि भस्मीभवन्ति, ग्लानि: नश्यति, चित्तं निर्मलं प्रसन्नं च भवति, सद्विचार: समुदेति। इत्थम् आत्मानुशीलनस्य महत्त्वं जीवने अनुभूयते। तेन कृतेषु कार्येषु त्रुटय: न भवन्ति। अत: कृतदोषोऽपि जन: अनुतप्य सत्कर्मसम्पादनेन जीवने महान् भवितुम् अर्हति।

**उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **1 × 2 = 2**

(*i*) जीवने कस्य महत्त्वम् अनुभूयते?

**उत्तर** : आत्मानुशीलनस्य।

(*ii*) कृतदोष: जन: केन महान् भवितुं शक्नोति?

**उत्तर** : सत्कर्मसम्पादनेन।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) अनुतापपालनेन किं-किं भवति?

**उत्तर :** अनुतापपालनेन पापानि भस्मीभवन्ति, ग्लानिः नश्यति, चित्तं निर्मलं प्रसन्नं च भवति, सद्विचारः समुदेति।

(*ii*) कस्य सत्पथगमनस्य द्वारम् उद्घाटितं भवति?

**उत्तर :** यः स्वदोषाणां कृते अनुतपति तस्य सत्पथगमनस्य द्वारम् उद्घाटितं भवति।

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) 1 × 2 = 2

(*i*) 'एवम्' इति अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

**उत्तर :** इत्थम्।

(*ii*) 'अनुभूयते' इति क्रियापदस्य कर्तृपदं किम्?

**उत्तर :** आत्मानुशीलनस्य महत्त्वम्।

**IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

**उत्तर :** आत्मानुशीलनस्य महत्त्वम्।

## 5

कस्मिंश्चित् अरण्ये अनेके पशवः वसन्ति स्म। एकदा पशूनां राजा सिंहः रोगपीडितः अभवत्। एकं श्रृगालं विहाय सर्वे पशवः रोगपीडितं नृपं द्रष्टुमागताः। एकः उष्ट्रः नृपाय एतत् न्यवेदयत् यत् अहंकारिणं श्रृगालं विहाय सर्वे भवन्तं द्रष्टुमागताः। एतच्छ्रुत्वा सिंहः क्रोधितोऽभवत्। स्वमित्रैः एतत् ज्ञात्वा श्रृगालः शीघ्रमेव सिंहस्य समीपे प्राप्तः। क्रोधितेन सिंहेन विलम्बेन आगमनकारणं पृष्टः श्रृगालोऽवदत् यदऽहं तु सर्वप्रथममागन्तुम् ऐच्छम् परं चिकित्सकात् औषधमपि आनेयमिति विचिन्त्य तत्रागच्छम्। तच्छ्रुत्वा प्रसन्नः सिंहः औषधविषये पृष्टवान्। श्रृगालः अवदत् यत्तेन औषधंतु न दत्तं परं कृपापरो भूत्वा चिकित्साक्रमम् उक्तम् यत् उष्ट्रस्य रक्तपाने. नैव रोगस्य शान्तिः भविष्यति। तदा सिंहः तं उष्ट्रमाहूतवान्। भक्त्या आगतं च तं मारयित्वा तस्य रक्तं पीतवान्। एवं स्वपिशुनतायाः दुष्फलम् उष्ट्रेण स्वयमेव प्राप्तम्।

**उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) चिकित्सकेन किम् उक्तमासीत्?

**उत्तर :** चिकित्साक्रमम्।

(*ii*) श्रृगालः शीघ्रमेव कस्य समीपे प्राप्तः?

**उत्तर :** सिंहस्य।

(*iii*) उष्ट्रेण कस्याः दुष्फलम् प्राप्तम्?

**उत्तर :** स्वपिशुनतायाः।

(*iv*) अनेके पशवः कुत्र वसन्ति स्म?

**उत्तर :** अरण्ये।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 1 × 4 = 4

(*i*) क्रोधितेन सिंहेन किं पृष्टम्?

**उत्तर :** क्रोधितेन सिंहेन विलम्बेन आगमनकारणं पृष्टः।

(*ii*) चिकित्सकेन कीदृशं चिकित्साक्रमम् उक्तम्?

उत्तर : चिकित्साक्रमम् उक्तम्यत उष्ट्रस्य रक्तपानेनैव रोगस्य शान्तिः भविष्यति।

(*iii*) कं विहाय सर्वे सिंहं द्रष्टुमागच्छन्?

उत्तर : एकं शृगालं विहाय सर्वे सिंह द्रष्टुमागच्छन्।

(*iv*) सिंहः उष्ट्रमाहूय किं कृतवान्?

उत्तर : सिंहः उष्ट्रमाह्यं तं मारयित्वा तस्य रक्तं पीतवान्।

**III. यथानिर्देशम् उत्तरत्–** 1 + 1 + 2 = 4

(*i*) 'प्रसन्नः सिंहः' इति अत्र विशेष्यपदं किम्?

उत्तर : सिंहः।

(*ii*) 'त्यक्त्वा' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

उत्तर : विहाय।

(*iii*) उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

उत्तर : पिशुनतायाः दुष्टफलम्।

**6**

अमर्त्यसेनः इति नाम एव संस्कृतमयम्। अमर्त्यसेनवर्यस्य जन्म शान्तिनिकेतने अभवत्। अस्य नाम गुरुदेवेन रवीन्द्रनाथवर्येण चितम्। अस्य नाम निर्दिशन् सः उक्तवान् आसीत्–'अमर्त्यसेनः' इत्येषः शब्दः संस्कृतमूलः अतः एतस्य उच्चारणं स्पष्टं स्यात्, यतः अर्थपरिवर्तनं न भवेत्। शान्तिनिकेतने वसन् अमर्त्यसेनः बाल्ये संस्कृताभ्यासं कृतवान्। तस्य तीव्रः अभिलाषः अपि आसीत् यत् मातामहः क्षितीशमोहनसे इव अहम् अपि प्रसिद्धः संस्कृतविद्वान् भवेयम् इति।

**उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 4 = 4

(*i*) अमर्त्यसेनस्य मातामहस्य नाम किम् आसीत्?

उत्तर : क्षितीशमोहनसेनः।

(*ii*) कुत्र वसन् अमर्त्यसेनः संस्कृताभ्यासं कृतवान्?

उत्तर : शान्तिनिकेतने।

(*iii*) अमर्त्यसेनस्य नाम केन चितम्?

उत्तर : रवीन्द्रनाथवर्येण।

(*iv*) किं भवितुम् अमर्त्यसेनस्य तीव्रः अभिलाषः आसीत्?

उत्तर : संस्कृतविद्वान्।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 1 × 2 = 2

अमर्त्यसेनस्य नामविषये निर्दिशन् रवीन्द्रनाथवर्यः किमुक्तवान्?

उत्तर : 'अमर्त्यसेनः' इत्येषः शब्दः संस्कृतमूलः अतः एतस्य उच्चारणं स्पष्टं स्यात्, यतः अर्थपरिवर्तनं न अभवत्।

**III. यथानिर्देशम् उत्तरत्–** 1 + 1 + 2 = 4

(*i*) 'अस्य नाम' इत्यत्र 'अस्य' इति पदं कस्मै प्रयुक्तम्?

उत्तर : अमर्त्यसेनाय।

(*ii*) 'स्यात्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?

उत्तर : भवेत्।

(*iii*) उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

उत्तर : महान् अर्थशास्त्री श्रीअमर्त्यसेनः।

## 7

कदाचित् देवराजः इन्द्रः भूलोकम् आगतवान्। भूलोके कमपि नगरं प्रविष्टः सः मार्गे गच्छन् आसीत्। तत्र कश्चन विक्रेता बहूनां देवानां विग्रहान् संस्थाप्य विक्रयणं करोति स्म। देवेन्द्रः कुतूहलेन समीपं गत्वा दृष्टवान्। तत्र विष्णुः, शिवः, लक्ष्मीः, सरस्वती, गणेशः इत्यादीनां देवानां विग्रहाः आसन्। देवेन्द्रस्य विग्रहः अपि तत्र आसीत्। देवेन्द्रः एकैकस्यापि विग्रहस्य मूल्यं पृष्ट्वा-पृष्ट्वा ज्ञातवान्। अन्ते च कुतूहलेन तत्र स्थितस्य देवेन्द्रविग्रहस्य मूल्यं पृष्टवान्। सः विक्रेता उक्तवान्–यः कोऽपि कमपि विग्रहं क्रीणाति तस्मै एषः देवेन्द्र-विग्रहः निःशुल्कं दीयते इति। तदा तु देवेन्द्रस्य स्थितिः शोचनीया एव आसीत्।

**उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) $1 \times 2 = 2$

(*i*) देवराजः कुत्र आगतवान्?

**उत्तर :** भूलोकम्।

(*ii*) कस्य स्थितिः शोचनीया आसीत्?

**उत्तर :** देवेन्द्रस्य।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) $2 \times 2 = 4$

(*i*) विक्रेता तत्र केषां देवानां विग्रहान् स्थापितवान्?

**उत्तर :** विक्रेता तत्र विष्णुः शिवः, लक्ष्मीः, सरस्वती, गणेशः इत्यादीनां देवानां विग्रहाः स्थापितवान।

(*ii*) देवेन्द्रविग्रहम् कस्मै निःशुल्कं दीयते?

**उत्तर :** यः कोऽपि कमपि विग्रहं क्रीणाति तस्मै एषः देवेन्द्र-विग्रहः निःशुल्कं दीयते।

**III. यथानिर्देशम् उत्तरत–** $1 + 1 + 2 = 4$

(*i*) 'स्थितिः शोचनीया' अत्र विशेष्यपदं किम्?

**उत्तर :** स्थितिः।

(*ii*) 'अपश्यत्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?

**उत्तर :** दृष्टवान्।

(*iii*) उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

**उत्तर :** देवेन्द्रस्य शोचनीया स्थितिः।

## 8

हरियाणाराज्ये यमुनानगरमण्डले एकः संस्कृतपरिवारः अस्ति। तस्मिन् गृहे सर्वे संस्कृते सम्भाषणं कुर्वन्ति। तत्र पशवोऽपि संस्कृतम् अवबोद्धुं समर्थाः सन्ति। तस्मिन् गृहे अभिमन्युः नाम एकः युवकः अस्ति। सोऽपि संस्कृतं वदति। एकदा तत्र एकः संस्कृतप्राध्यापकः आगतवान्। तेन सह अभिमन्युः संस्कृतेन सम्भाषणं कृतवान्। तस्य युवकस्य प्रतिभां दृष्ट्वा प्राध्यापकः अभिमन्यवे शतं रूप्यकाणि दत्तवान्। तस्मात् दिनात् तस्य मनसि संस्कृतं प्रति महती अभिरुचिः समुत्पन्ना। सः प्रतिदिनं गीतायाः श्लोकान् पठित्वा-पठित्वा सर्वान् श्लोकान् अस्मरत्।

**उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) $1 \times 2 = 2$

(*i*) संस्कृतपरिवारः कुत्र अस्ति?

**उत्तर :** यमुनानगरमण्डले।

(*ii*) प्राध्यापकः कस्मै शतं रूप्यकाणि दत्तवान्?

**उत्तर :** अभिमन्यवे।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) $2 \times 2 = 4$

(*i*) प्राध्यापक: अभिमन्यवे शतं रूप्यकाणि किमर्थं दत्तवान्?

**उत्तर :** प्राध्यापका: अभिमन्यवे शतं रुप्यकाणि तस्य प्रतिभां दृष्ट्वा दत्तवान्।

(*ii*) युवक: कथं गीताया: श्लोकान् अस्मरत्?

युवक: प्रतिदिन पठित्वा–पठित्वा गीताया: श्लोकान् अस्मरत्।

**III. यथानिर्देशम् उत्तरत्–** $1 + 1 + 2 = 4$

(*i*) 'अयच्छत्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?

**उत्तर :** दत्तवान्।

(*ii*) 'कृतवान्' इति क्रियापदस्य कर्तृपदम् चित्वा लिखत।

**उत्तर :** अभिमन्यु:।

(*iii*) उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

**उत्तर :** संस्कृतं प्रति अभिरुचि:।

## 9

एकस्मिन् दिने बहव: जिज्ञासव: तत्त्वज्ञानं श्रोतुं महात्मनः सुकरातस्य गृहम् आगच्छन्। ज्ञानचर्चां शृण्वतां तेषां भूयान् काल: व्यतियात:। सुकरातस्य पत्नी गृहेऽपेक्षितानां वस्तूनाम् अभावचर्चां चिकीर्षति स्म, किंतु तत्र उपस्थिते जनसमवाये एतत् सुकरं नासीत्। तत: कोपविहितचेतना सा अपशब्दान् उच्चारयन्ती तत्र समायाता, आगन्तुकेषु च पय: पातयन्ती प्रतिनिवृत्ता। सुकरात: सर्वान् सम्बोधयन् सस्मितम् उवाच, श्रुतं एव भवद्भिर्यत् ये मेघा: गर्जन्ति, ते न वर्षन्ति, किन्तु अद्य प्रकृत्यां विपर्याय: परिलक्षितो भवति, मेघा: गर्जन्ति वर्षन्ति च।

**उपरिलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत–**

**I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) $1 \times 2 = 2$

(*i*) के महात्म-सुकरातस्य गृहम् आगच्छन्?

**उत्तर :** जिज्ञासव:।

(*ii*) सुकरातस्य पत्नी आगन्तुकेषु किं पातयन्ती प्रतिनिवृत्ता?

**उत्तर :** पय:।

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.)– $2 \times 2 = 4$

(*i*) सुकरातस्य पत्नी किं चिकीर्षति स्म?

**उत्तर :** सुकरातस्य पत्नी गृहेऽपेक्षितानां वस्तूनाम् अभावचर्चां चिकीर्षति स्म।

(*ii*) सुकरातस्य मते प्रकृत्यां क: विपर्याय: परिलक्षित:?

**उत्तर :** सुकरातस्यमते प्रकृत्यां अयं विपर्याय: परिलक्षितो भवति यत् मेघा: गर्जन्ति वर्षन्ति च।

**III. यथानिर्देशम् उत्तरत्–** $1 + 1 + 2 = 4$

(*i*) 'कोपविहितचेतना सा' इति पदे अनुच्छेदे कस्यै प्रयुक्ते?

**उत्तर :** सुकरातस्य पत्न्यै।

(*ii*) 'अनेके' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

**उत्तर :** बहव:।

(*iii*) उपरिलिखितस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**उत्तर :** मेघा: गर्जन्ति वर्षन्ति च/सुकरातस्य विचित्र: अनुभव:।

# बोर्ड परीक्षायाः प्रश्नाः

**1**

भारतीयजनानां पाश्चात्यं प्रति महत् आकर्षणम् आसीत्, अस्ति, भविष्यति अपि च। विचारणीयः विषयः तु अयमेव अस्ति यत् किमर्थं जनाः पाश्चात्यं प्रति आकर्षिताः भवन्ति? किं स्वदेशे सर्वसुविधाः न सन्ति? किं कारणम् अत्र? अत्रापि आवासव्यवस्था तादृशी एव उत्तमा अस्ति यादृशी अन्येषु देशेषु। कदा सः कालः आगमिष्यति यदा जनाः विदेशगमनस्य इच्छां त्यक्त्वा स्वदेशे एव तिष्ठन्तः स्वज्ञानस्य प्रयोगं कृत्वा देशम् उन्नेष्यन्ति। देशः तु मातुः इव भवति। यः सर्वेभ्यः सर्वदा यच्छति एव अपेक्षते किञ्चिदपि न। अतः देशस्य सम्मानम् अपि तादृशमेव भवेत् यादृशं मातुः सम्मानं भवति। अतः कथ्यते–"**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।**" *[All India 2014]*

**प्रश्नाः– I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **½ × 4 = 2**

(*i*) के पाश्चात्यं प्रति आकर्षिताः सन्ति?

(*ii*) सम्प्रति कुत्र गमनाय भारतीयजनानां महती इच्छा अस्ति?

(*iii*) जनाः कस्य प्रयोगं कृत्वा देशम् उन्नेष्यन्ति?

(*iv*) अत्रापि आवासव्यवस्था कीदृशी अस्ति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) कः विचारणीयः विषयोऽस्ति?

(*ii*) जनाः कदा देशम् उन्नेष्यन्ति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'उन्नेष्यन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(क) जनाः (ख) सर्वसुविधाः (ग) आकर्षिताः (घ) कालः

(*ii*) 'आकर्षणम्' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?

(क) तादृशी (ख) उत्तमा (ग) महत् (घ) यादृशी

(*iii*) 'गमिष्यति' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(क) भविष्यति (ख) उन्नेष्यन्ति (ग) आगमिष्यति (घ) अस्ति

(*iv*) 'आवासव्यवस्था' इति कर्तृपदस्य क्रियापदं किम्?

(क) भवन्ति (ख) सन्ति (ग) उन्नेष्यन्ति (घ) अस्ति

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

**2**

मम प्रियं पुस्तकं रामायणम् अस्ति। अस्मिन् ग्रन्थे मर्यादापुरुषोत्तमस्य श्रीरामस्य जीवनस्य वृत्तं वर्तते। अस्य लेखकः महर्षिः वाल्मीकिः आसीत्। सः आदिकविः आसीत्, अतः तस्य रचनां 'आदिकाव्यम्' इति कृत्वा विद्वांसः स्मरन्ति। एतत् काव्यम् अनुष्टुप्–छन्दसि निबद्धम्। अत्र श्लोकानां संख्या चतुर्विंशतिसहस्रं वर्तते, तेन रामायणं 'चतुर्विंशति-साहस्री-संहिता' इति नाम्ना अपि विद्वद्भिः स्मर्यते। इदं कविना नारदमुनेः प्रेरणया ब्रह्मणः वचनेन च रचितम्। रामायणे 'बालकाण्ड-अयोध्याकाण्ड-अरण्यकाण्ड-किष्किन्धाकाण्ड-सुन्दरकाण्ड-युद्धकाण्ड-उत्तरकाण्ड' इति सप्त काण्डानि वर्तन्ते। केचन विद्वांसः बालकाण्डं उत्तरकाण्डं च अवान्तरकालिकं प्रक्षेपं मन्यन्ते। तत्र श्रीरामस्य प्रमुखतः महापुरुषरूपेण वर्णनं वर्तते। *[All India 2016]*

**प्रश्नाः– I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **1 × 2 = 2**

(*i*) रामायणे कस्य महापुरुषस्य जीवनस्य वृत्तं वर्तते?

(*ii*) रामायणं केन अन्येन नाम्ना विद्वद्भिः स्मर्यते?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) रामायणस्य सप्त-काण्डानां नामानि लिखत।

(*ii*) कविना रामायणं कस्य प्रेरणया कस्य वचनेन च रचितम्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'रचितम्' इति क्रियापदस्य कर्तृपदं किम्?

(क) रामायणम् (ख) विद्वांस: (ग) श्रीराम: (घ) कविना

(*ii*) 'अस्य लेखक:' अत्र 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) श्रीरामाय (ख) जीवनाय (ग) रामायणाय (घ) बाल्मीकिने

(*iii*) 'महर्षि:' इति पदस्य अनुच्छेदे विशेष्यं किम्?

(क) वाल्मीकि: (ख) लेखक: (ग) कविना (घ) प्रियम्

(*iv*) 'मूर्खा:' इति पदस्य अनुच्छेदे विपर्ययपदं किम्?

(क) पुस्तकम् (ख) कवि: (ग) रामायणम् (घ) विद्वांस:

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

**3**

यदि मन: प्रसन्नम् अस्ति तर्हि वयं सर्वाणि कार्याणि सम्यक् कर्तुं शक्नुम:। मन: खिन्नम् असन्तुष्टं वा अस्ति चेत् अस्माकं प्रेरणा न भवति। अत: मनस: प्रसन्नतारक्षणम् अत्यन्तम् आवश्यकम्। जयपराजययो: आरम्भ: अपि जनानां मनसि भवति। स्नेहस्य शत्रुताया: आरम्भ: अपि तेषां मनसि एव भवति। जनै: सर्वदा भावात्मकचिन्तनं करणीयम्। अभावात्मकचिन्तनकर्त्ता जीवने सर्वत्र कष्टानि एव अनुभवति। अतएव उक्तम्–**"मन एव मनुष्याणां कारणं बन्धमोक्षयो:"**। *[Delhi 2016]*

**प्रश्ना:– I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **1 × 2 = 2**

(*i*) बन्धमोक्षयो: कारणं किम् अस्ति?

(*ii*) कस्य प्रसन्नतारक्षणम् आवश्यकम् अस्ति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) क: जीवने सर्वत्र कष्टानि अनुभवति?

(*ii*) कदा वयं सर्वाणि कार्याणि सम्यक् कर्तुं शक्नुम:?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.)– **½ × 4 = 2**

(*i*) 'शक्नुम:' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम्?

(क) कर्ता (ख) मन: (ग) वयम् (घ) कार्याणि

(*ii*) 'अथवा' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क) अपि (ख) वा (ग) तर्हि (घ) एव

(*iii*) 'आरम्भ:' इति कर्तृ पदस्य किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?

(क) शक्नुम: (ख) करणीम् (ग) मनसि (घ) भवति

(*iv*) गद्यांशे 'तेषाम्' इति सर्वनामपदं केभ्य: प्रयुक्तम्?

(क) कष्टेभ्य: (ख) कार्येभ्य: (ग) जनेभ्य: (घ) जीवनेभ्य:

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## 4

क्रोधः मनुष्यस्य महान् शत्रुः। क्रुद्धः जनः गुरून् अपि निन्दति, अपभाषणं करोति, ज्येष्ठानां हितवचनानि अपि न शृणोति। तस्माद् वयं क्रोधे सावधानाः भवेम। यदि क्रोधः आगच्छति तदा तस्मिन् एव क्षणे मौनं धारणीयम्। मौनेन मनः शान्तं भवति। वाणी अपि नियन्त्रिता भवति। ईदृशे काले किञ्चित् पुस्तकं गृहीत्वा पठेम। कोपात् सर्वदा आत्मानं रक्षेम। [*All India 2016*]

**प्रश्नाः– I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **1 × 2 = 2**

(*i*) क्रोधे आगते किं धारणीयम्?

(*ii*) क्रुद्धः जनः केषां हितवचनानि न शृणोति?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) मनुष्यस्य महान् शत्रुः कः?

(*ii*) मौनेन वाणी कीदृशी भवति?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'क्रुद्धः' इति कस्य पदस्य विशेषणम्?

(क) गुरोः (ख) जनस्य (ग) शत्रोः (घ) ज्येष्ठस्य

(*ii*) 'भवेम' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम्?

(क) जनः (ख) वाणी (ग) क्रोधः (घ) वयम्

(*iii*) 'सर्वस्मिन् काले' इत्यर्थे किम् अव्ययपदं गद्यांशे प्रयुक्तम्?

(क) सर्वदा (ख) नियन्त्रिता (ग) तस्मिन् एव (घ) अपि

(*iv*) 'असावधानाः' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) नियन्त्रिता (ख) सर्वदा (ग) सावधानाः (घ) शान्तम्

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## 5

कस्मिंश्चित् ग्रामे कदाचन अशीतिवर्षीयः एको वृद्धः मार्गे आम्रवृक्षान् आरोपयति स्म। तं दृष्ट्वा महानगरात् आगच्छन् कश्चन युवा पृष्टवान्–भो महानुभाव! तव अवस्था प्रायशः अशीतिवर्षीया प्रतीयते। एतत् च स्वाभाविकं यदा एते वृक्षाः फलानि दास्यन्ति, तदा त्वं जीवितो न भविष्यसि। अतः किमर्थम् इमं निष्फलं प्रयासं करोषि? स वृद्धः उक्तवान्–मया साम्प्रतम् इतरैः आरोपितानां वृक्षाणां फलानि खाद्यन्ते। एवं मयापि आरोपितानाम् एतेषां वृक्षाणां फलानि आगामिभविष्यत्काले लोकाः खादेयुः–इत्येतदर्थम् अहम् एतेषाम् आरोपणं करोमि। वस्तुतः मनुष्येण केवलं स्वार्थचिन्तनं न कर्तव्यम्। [*CBSE 2018*]

**प्रश्नाः– I. एकपदेन उत्तरत** (एक पद में उत्तर दीजिए। Answer in one word.) **½ × 4 = 2**

(*i*) कश्चन युवा कुतः आगच्छति स्म? (*ii*) मनुष्येण केवलं किं न कर्तव्यम्?

(*iii*) 'तरुः' इत्यर्थे कः पर्यायशब्दः अत्र प्रयुक्तः? (*iv*) 'मृतः' इत्यस्य विपरीतार्थकं पदं किम्?

**II. पूर्णवाक्येन उत्तरत** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) **2 × 2 = 4**

(*i*) वृद्धः किं विचार्य वृक्षाणाम् आरोपणं करोति स्म? (*ii*) युवा तं वृद्धं किम् अपृच्छत्?

**III. भाषिककार्यम्** (भाषा संबंधी कार्य। Work of Language.) **½ × 4 = 2**

(*i*) 'आरोपयति स्म' इति क्रियापदस्य कर्तृपदं किम्?

(क) युवा (ख) वृद्धः (ग) वृक्षाः (घ) लोकाः

(*ii*) 'प्रयासम्' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम्?

(क) प्रायशः (ख) निष्फलम् (ग) युवा (घ) साम्प्रतम्

(*iii*) 'अधुना' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(क) स्वाभाविकम् (ख) साम्प्रतम् (ग) एवम् (घ) युवा

(*iv*) 'वृद्धः' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(क) जीवितः (ख) लोकाः (ग) युवा (घ) मया

**IV. उपरिलिखितस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **2 × 1 = 2**

(इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए। Write the appropriate title for this passage in Sanskrit.)

## उत्तराणि

1. **I.** (*i*) भारतीयजनाः (*ii*) विदेशम् (*iii*) स्वज्ञानस्य (*iv*) उत्तमा।

**II.** (*i*) विचारणीयः विषयः तु अयमेव अस्ति यत् किमर्थं जनाः पाश्चात्यं प्रति आकर्षिताः भवन्ति? किं स्वदेशे सर्वसुविधाः न सन्ति? किं कारणम् अत्र?

(*ii*) यदा जनाः विदेशगमनस्य इच्छां त्यक्त्वा स्वदेशे एव तिष्ठन्तः स्वज्ञानस्य प्रयोगं करिष्यन्ति तदा ते देशम् उन्नेष्यन्ति।

**III.** (*i*) (क) जनाः (*ii*) (ग) महत् (*iii*) (ग) आगमिष्यति (*iv*) (घ) अस्ति

**IV.** जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

2. **I.** (*i*) श्रीरामस्य (*ii*) चतुर्विंशति-साहस्री-संहिता

**II.** (*i*) रामायणस्य सप्तकाण्डानि सन्ति–बालकाण्डम्, अयोध्याकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम्, उत्तरकाण्डम् च।

(*ii*) कविना रामायणं नारदमुनेः प्रेरणया ब्रह्मणः वचनेन च रचितम्।

**III.** (*i*) (घ) कविना (*ii*) (ग) रामायणाय (*iii*) (क) वाल्मीकिः (*iv*) (घ) विद्वांसः

**IV.** आदिकाव्यम् रामायणम्।

3. **I.** (*i*) मनः (*ii*) मनसः

**II.** (*i*) अभावात्मकचिन्तनकर्त्ता जीवने सर्वत्र कष्टानि अनुभवति।

(*ii*) यदि मनः प्रसन्नम् अस्ति तर्हि वयं सर्वाणि कार्याणि सम्यक् कर्तुं शक्नुमः।

**III.** (*i*) (ग) वयम् (*ii*) (ख) वा (*iii*) (घ) भवति (*iv*) (ग) जनेभ्यः

**IV.** मन एव मनुष्याणां कारणं बन्धमोक्षयोः।

4. **I.** (*i*) मौनम् (*ii*) ज्येष्ठानाम्

**II.** (*i*) मनुष्यस्य महान् शत्रुः क्रोधः।

(*ii*) मौनेन वाणी नियन्त्रिता भवति।

**III.** (*i*) (ख) जनस्य (*ii*) (घ) वयम् (*iii*) (क) सर्वदा (*iv*) (ग) सावधानाः।

**IV.** 'क्रोधस्य दुष्परिणामः' अथवा 'क्रोधः मनुष्यस्य महान् शत्रुः'।

5. **I.** (*i*) महानगरात् (*ii*) स्वार्थचिन्तनम् (*iii*) वृक्षः (*iv*) जीवितः

**II.** (*i*) ''मया... ..... करोमि।''

(*ii*) भो महानुभाव! तव अवस्था प्रायशः अशीतिवर्षीया प्रतीयते।

**III.** (*i*) (ख) वृद्धः (*ii*) (ख) निष्फलम् (*iii*) (ख) साम्प्रतम् (*iv*) (ग) युवा।

**IV.** स्वार्थचिन्तनम्/कर्त्तव्यपालनम् अथवा अन्य उपयुक्त शीर्षक।

# क अपठित-अवबोधनस्य विचारबिन्दवः

**विषयः— अपठित-अवबोधनम्** **उपविषयः— प्रश्नोत्तराणि**

❑ **क्रियाकलापः—1 : अनुच्छेद-आधारितानि प्रश्नानि तेषाम् च उत्तराणि।**

➢ **उद्देश्यम्** : गद्यांशस्य समुचितं पठन-पाठनम्, अर्थबोधनम्, तदाधारितानाञ्च दत्तानां प्रश्नानाम् उत्तराणि दातुं क्षमतायाः विकासः रुचेः संवर्धनञ्च।

➢ **सहायक-साधनानि** : गद्यांशात् सम्बद्धं चित्रम्, मार्जनी, सुधाखण्डाः सङ्केतयष्टिः श्यामपट्टादयः।

➢ **कौशल-विकासः** : संस्कृतभाषायाः ज्ञानेन सह अर्थग्रहण क्षमता-उत्पत्तिः, रचनात्मकं चिन्तनं एवम् आत्म-विश्लेषणस्य संवर्धनम्।

➢ **समयः** : होरार्धम् (30 मिनट)

➢ **शिक्षण-विधिः**

1. सर्वप्रथमं शिक्षकमहोदयाः सम्पूर्णं गद्यांशं स्वमेव पठेयुः।
2. पश्चात् एकम् एकं कृत्वा छात्रान् पठितुं प्रेरयन्तु।
3. पुनः समस्तं गद्यखण्डं वैयाकरणिक-दृष्ट्या अवबोधयेयुः।
4. ततः तदाधारितानां दत्तानां प्रश्नानामुत्तराणि दातुम् छात्रान् प्रेरयन्तु यत् ते गद्यांशे स्थितानि उत्तराणि यच्छेयुः।
5. यदा छात्राः कठिनतायाः अनुभूतिं कुर्युः तदा शिक्षकाः तेषां सहायतामपि कुर्वन्तु।
6. यथानिर्देशम् एकपदेन पूर्णवाक्येन च सम्यक्तया एव उत्तराणि स्युः एतस्य ध्यानम् अवश्यमेव भवेत्।
7. एवमेव व्याकरणस्य (भाषिककार्यस्य) इति उत्तराणि अतीव धैर्येण शान्त्या च यच्छेयुः। सर्वप्रथमम् क्रिया-विशेष्य-पर्याय-विलोमानां (विपर्ययानां) च सम्यक्तया ज्ञानं प्रतीतं च कुर्यात्। पुनः प्रश्नोत्तराणि कुर्यात्।

❑ **शिक्षकाय निर्देशाः**

1. शिक्षकाः यथासम्भवं प्रथमं श्यामपट्टे अनुच्छेदम् **अथवा** प्रश्नानि लिखेयुः।
2. पुनः शिक्षकाः प्रश्नानि पृष्ट्वा छात्रान् तेषाम् उत्तरार्थं प्रेरयेयुः। यदि छात्राः उत्तराणि न दातुं शक्नुवन्ति तर्हि स्वयमेव कथयन्तु।
3. ततः परं व्याकरणिक-प्रश्नान् अपि पृष्ट्वा उत्तरार्थं छात्रान् अनुच्छेदं द्रष्टुं प्रेरयन्तु।
4. कठिनं **अथवा** अस्पष्ट उत्तराणि श्यामपट्टे लेखयेयुः।

❑ **कक्षाकार्यम्**

1. अनुच्छेदस्य पाठं कृत्वा तस्य उपरि एकं प्रश्नं अध्यापकः पृच्छेत्।
2. अनुच्छेदस्य एकं पदं नीत्वा तस्य लकारं, वचनं पुरुषञ्च पृच्छेत्।

**❑ गृहकार्यम्**

छात्राः एवमेव अस्य अनुच्छेदस्य उपरि प्रश्नोत्तराणि लेखिष्यन्ति—

1. छात्राः अनुच्छेदं पठित्वा सरलप्रश्ननिर्माणं कृत्वा तस्य एकपदेन उत्तरं लिखतु।
2. ते पूर्णवाक्येन अपि प्रश्नानामुत्तराणि लिखन्तु।

**❑ मौखिकप्रश्नाः**

1. छात्रान् अध्यापकः सरलप्रश्नं पृच्छतु।
2. ते कर्त्ता-क्रिया-अन्वितिं चापि पृच्छन्तु।

**❑ निर्दिष्टः क्रियाकलापः**

कर्त्ता-क्रियायाः अन्वितिः एवं पर्यायः विपर्ययश्च कथं ज्ञातं भवेत्। एतस्य कृते छात्रः प्रयत्नं कुर्यात्।

---

## विषयः— अपठित-अवबोधनम् उपविषयः— प्रश्नोत्तराणि

**❑ क्रियाकलापः—2 : अनुच्छेदस्य प्रश्नोत्तरैः सह व्याकरणिकम् अपि ज्ञानम्।**

**➢ उद्देश्यम्**

1. छात्राः समस्तं गद्यांशं पठितुं शक्याः (समर्थाः) भवन्तु।
2. गद्यांशे स्थितं भावमपि ज्ञातुं छात्राः शक्नुयुः।
3. सामान्य व्याकरणिक ज्ञानेन 'भाषिककार्यम्' इति शीर्षकान्तर्गतानां प्रश्नानाम् उत्तराणि अपि ते दातुं समर्थाः भवेयुः।

**➢ सहायक-साधनानि** : गद्यांशात् सम्बद्धं चित्रम्, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिः श्यामपट्टादयः।

**➢ कौशल-विकासः** : गद्यांशस्य अर्थज्ञानेन सह अभिव्यक्तेः कौशलमपि विकसितं भवेत्। शब्दानाम् उत्पत्तिः, प्रकृतिः, समविषय-पदानां निर्माणम् तेषां चयनञ्चापि ज्ञातुं समर्थः करणम्।

**➢ समयः** : होरार्धम् (30 मिनट)

**➢ शिक्षण-विधिः**

1. शिक्षकाः छात्रान् अपठितं गद्यांशं पठितुं प्रेरयन्तु। पुनः यथासम्भवं स्वसहायतामपि यच्छेयुः।
2. मध्ये-मध्ये कठिन शब्दानां पङ्क्तिनाञ्च भावम्, अर्थं सारं च छात्रान् अवबोधयेयुः।
3. यदि सम्भवं भवेत् तर्हि श्यामपट्टे अपि वर्तनी शोधयितुं शब्दान् लिखित्वा छात्रान् अवबोधयेयुः।
4. उत्तराणि प्रश्ननिर्देशानुसारमेव भवेयुः एतस्यापि ध्यानम् आवश्यकमस्ति।
5. व्याकरणिकप्रश्नाः अधिकतरं सामान्यज्ञाने आधारिताः भवन्ति। अतः सामान्यव्याकरणस्य ज्ञानम् अतीव आवश्यकं वर्तते।

**❑ शिक्षकाय निर्देशाः**

1. गुरुजनाः छात्रान् गद्यांशं बोधयित्वा पाठयित्वा च निर्देशानुसार प्रश्नान् तेषाम् च उत्तराणि लेखितुं प्रेरयिष्यन्ति।
2. ध्यातव्यम् यत् उत्तराणि निर्देशानुसारमेव भवेयुः। अधिकं न्यूनं वा उत्तरम् अशुद्धं भविष्यति।
3. 'भाषिककार्यम्' इत्यस्य प्रश्नोत्तराणां कृते शिक्षकाः छात्रान् व्याकरणं प्रति प्रेरयन्तु; यथा—वाक्ये कः कर्त्ता अस्ति का क्रिया? कस्य शब्दस्य पर्यायः विलोमः च कः कः भवितुं शक्नोति। इत्यस्य ज्ञानं दत्वा तेषां प्रश्नानाम् दातुं प्रेरयिष्यन्ति।

❑ कक्षाकार्यम्

छात्राः परस्परं विचारं कृत्वा प्रश्नानाम् निर्माणं करिष्यन्ति। ते न्यूनतमं द्वि-त्रि प्रश्नान् लेखिष्यन्ति।

❑ गृहकार्यम्

छात्राः अनेन प्रकारेण एव अन्यानि प्रश्नोत्तराणि अपि कृत्वा आनेष्यन्ति। छात्राः पञ्च-सप्त प्रश्नानाम् उत्तराणि अवश्यमेव लिखेयुः।

❑ मौखिकप्रश्नाः

कक्षायां छात्राः अन्यानपि प्रश्नान् करिष्यन्ति—

1. एकपदेन पूर्णवाक्येन च।
2. भाषिककार्यम् अपि पृच्छेयुः।
3. अस्य अनुच्छेदस्य शीर्षकः किम्?

❑ निर्दिष्टः क्रियाकलापः

1. अनेन प्रकारेण अन्यमपि गद्यांशम् अन्वेष्टुं छात्रेभ्यः शिक्षकाः प्रेरयन्तु। येन छात्राः तेषां प्रश्नानां निर्माणेऽपि समर्थाः भवेयुः।
2. छात्रैः अतीतं कार्यं दृष्ट्वा गुरवः तेषां कृते उत्साहवर्धनार्थं तालिका वादनमपि कारयन्तु।
3. यथासम्भवं च स्वपक्षतः प्रश्ननिर्माणं कृत्वा छात्रान् उत्तराणि दातुं प्रेरयन्तु अपि।

---

## विषयः— अपठित-अवबोधनम् उपविषयः— प्रश्नोत्तराणि

❑ **क्रियाकलापः—3 : गद्यांशाधारिताः प्रश्नोत्तराणि**

➢ उद्देश्यम्

1. छात्राणां रुचिं संस्कृतं प्रति वर्धनम्।
2. छात्राः संस्कृतस्य पठनं, श्रवणं भाषणञ्च कर्तुं समर्थाः भवेयुः।
3. वार्तालापेऽपि ते समर्थाः भवेयुः।
4. गद्यांशे व्याकरणबिन्दुम् अपि ज्ञातुं शक्नुयुः।

➢ **सहायक-साधनानि** : गद्यांशात् सम्बद्धं चित्रम्, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिः श्यामपट्टादयः।

➢ कौशल-विकासः

1. अनुच्छेदस्य अर्थं ज्ञात्वा तस्य विषयस्य ज्ञानं प्राप्तुं छात्राः समर्थाः भविष्यन्ति।
2. अनुच्छेदात् स्वजीवनपरकं मूल्यम् अपि ते ग्रहीष्यन्ति।

➢ **समयः** : होरार्धम् (30 मिनट)

➢ शिक्षण-विधिः

1. प्रथमं कक्षायाः विभाजन द्वि-त्रि वा वर्गेषु कुर्यात्। तत्पश्चात् वारं-वारं यथाक्रमं प्रत्येकं छात्राणाम् उच्चारणस्य परीक्षणं कुर्यात्।
2. अनुच्छेदात् पर्यायस्य विपर्ययस्य (विलोमस्य) च चयनं गृहे सम्यक् स्थित्वा एव कुर्यात्।
3. सहैव विशेषण-विशेष्य, कर्ता-क्रिया-चयनम् अपि कर्तव्यम्।

4. प्रश्नानाम् उत्तराणि गद्यांशे एव भवन्ति। अत: ध्यानं दत्वा एकम्-एकं शब्दं पठेत्।

5. यदा प्रश्नानाम् उत्तराणि स्पष्टानि भवेयुः तदैव उत्तरपुस्तिकायाम् तानि लिखेयुः।

❑ शिक्षकाय निर्देशा:

1. शिक्षकमहोदया: सर्वप्रथमम् अनुच्छेदस्य वाचनं छात्रै: कारयेयु:। मध्ये-मध्ये च स्वसहायतया छात्राणाम् उत्साहं रुचिं च वर्धयेयु:।

2. तत्पश्चात् दत्तानां प्रश्नानां निर्देशानुसारेण उत्तरदातुं छात्रान् प्रेरितान् ते कुर्वन्तु। येन छात्रा: निर्विघ्नं तानि उत्तरन्तु।

3. 'भाषिककार्यम्' इति प्रश्नानाम् उत्तरदातुम् अपि शिक्षका: छात्राणाम् सामान्यरुचिं जाग्रीयेयु:; यथा-पर्याय:, विलोम: (विपर्यय:), कर्ता-क्रिया-अन्विति: विशेषण-विशेष्य-चयने च ते समर्था: भवेयु:। सुष्ठुरूपेण उत्तराणि दातुम् अपि ते समर्था: भवेयु:।

4. छात्रा: शिक्षकस्य सहायतया कक्षायाम् एवं प्रश्ननिर्माणं कृत्वा प्रक्ष्यन्ति।

❑ कक्षाकार्यम्

कक्षायां छात्रा: प्रश्ननिर्माणं करिष्यन्ति; यथा—

1. छात्रा: एकं वाक्यं नीत्वा तस्य एकपदेन पूर्णवाक्येन वा प्रश्नोत्तराणि निर्माण लेखिष्यन्ति।

2. भाषिककार्यम् अपि ते भवेयु:।

❑ गृहकार्यम्

एवमेव छात्रा: अस्य अनुच्छेदस्य उपरि प्रश्नोत्तराणि करिष्यन्ति; यथा—

1. एकं क्रियापदं नीत्वा तस्य मूलधातु:/पुरुष:/वचनं लकारञ्च लिखन्तु।

2. स्वयमेव प्रश्ननिर्माणं कृत्वा तस्य उत्तरम् अपि लिखन्तु।

❑ शीर्षक-प्रदानम्

अनुच्छेदं पूर्णरूपेण शान्तया (शान्तिपूर्वकं) पठित्वा यस्य विषयस्य वर्णनं तस्मिन् गद्यांशे अस्ति तत् एव शीर्षकं भविष्यति।

❑ मौखिकप्रश्ना:

छात्रा: शिक्षकस्य सहायतया कक्षायाम् एवं प्रश्ननिर्माणं कृत्वा प्रक्ष्यन्ति; यथा—

1. छात्रा: एकं पदं नीत्वा तस्यार्थे प्रश्नवाचकं पदं लिखन्तु।

2. एकं वाक्यं नीत्वा तस्य उत्तरमपि लिखन्तु।

❑ निर्दिष्ट: क्रियाकलाप:

1. एवमेव अन्य-गद्यांशस्य अपि अभ्यासाय प्रयत्नं कुर्यात्।

2. स्वज्ञान-कौशलाभ्याम् अन्य: गद्यांशोऽपि रचयन्तु।

---

## विषय:— अपठित-अवबोधनम् उपविषय:— प्रश्नोत्तराणि

❑ क्रियाकलाप:—4 : अनुच्छेदस्य प्रश्नोत्तरै: सह व्याकरणिकम् अपि ज्ञानम्।

➢ **समय:** : होरार्धम् (30 मिनट)

➢ उद्देश्यम्

1. छात्राणां पठन-पाठन-शैल्याः परिमार्जनम्।

2. संस्कृतस्य स्वयमेव पठनं कृत्वा अर्थम् अपि जानीयात्।

3. भाषाकौशलस्य अपि विकासः।

➢ **सहायक-साधनानि** : श्यामपट्टः, सुधाखण्डाः, सङ्केतयष्टिः, मार्जनी, गद्यांशात् सम्बद्धं चित्रम् इत्यादयः।

➢ **कौशल-विकासः** :

1. लेखनशैल्याः विकासः भविष्यति।

2. वाक्यविन्यासस्य योग्यता अपि भविष्यति।

➢ **शिक्षण-विधिः**

1. सर्वप्रथमं छात्रान् त्रि-चतुर्-पञ्च वा वर्गेषु विभाजनं कुर्यात्। ततः दत्ते गद्यांशे ध्यानं दत्वा चिन्तनं कुर्यात्। प्रत्येकं शब्दस्य अर्थचिन्तनं कृत्वा प्रश्नानाम् उत्तराणि लिखेत्।

2. प्रयत्नं कुर्यात् यत् प्रश्नानाम् उत्तराणि क्रमबद्धानि भवन्तु।

3. शिक्षकमहोदयः सर्वप्रथमम् अनुच्छेदस्य वाचनं कारयेत् तत्पश्चात् तस्य अर्थ ज्ञातुं छात्रान् प्रोत्साहितान् करोतु।

4. ततः ''एकपदेन उत्तरत'' इति निर्देशानुसारेण उत्तराणि एकपदे एव भवेत् इति कार्याय छात्रान् प्रेरयेत्। द्वि-त्रि-चतुर् वा पदेषु न दद्यात्।

5. पुनः ''पूर्णवाक्येन उत्तरत'' इत्यनयोः प्रश्नयोः उत्तरेऽपि पूर्णवाक्ये एव दद्यात्। शीघ्रतावशात् एकपदे न लिखेत् अन्यथा पूर्णाङ्कः न प्राप्स्यति।

6. ''भाषिककार्यम्'' इत्यस्य प्रश्नस्य अपि उत्तरं दानात् पूर्वं प्रश्नं सुष्ठुरूपेण पठेत् तथा प्रश्नानुसारेण एवं उत्तराणि लिखेत्।

## ❑ शिक्षकाय निर्देशाः

1. एवमेव द्वि-त्रि-वा अनुच्छेदस्य संग्रहं कर्तुं छात्रेभ्यः कथयेत्। ते तानि पठित्वा अवबोध्य च तेषां उपरि प्रश्नानाम् निर्माणं करिष्यन्ति।

2. एवमेव तेषां प्रश्नानाम् उत्तराणि लिखित्वा अपि नेष्यन्ति।

3. शिक्षकाः तान् अवलोकयिष्यन्ति।

4. छात्राः यत् कार्यं कृत्वा कक्षायां आनेष्यन्ति तस्य अवलोकनं शिक्षकाः विद्यालये अवश्यमेव करिष्यन्ति। एवं स्वहस्ताक्षरमपि कृत्वा छात्रान् प्रोत्साहितम् अपि करिष्यन्ति।

## ❑ कक्षाकार्यम्

1. अनुच्छेदं पाठयित्वा छात्रान् सरलप्रश्नमपि शिक्षकाः पृच्छन्तु।

2. ते एकं पदं चित्त्वा तस्य लिङ्गम्/वचनम्/कारकं पृच्छन्तु।

## ❑ गृहकार्यम्

1. छात्राः वाक्येषु स्थितान् पदान् नीत्वा तेषामुपरि प्रश्ननिर्माणं करिष्यन्ति।

2. ते द्वि-त्रि वा पदानां पर्यायः/विपर्ययः वापि लिखन्तु।

❑ शीर्षक-लेखनम्

अनुच्छेदस्य विषयस्य अनुसारेण एव शीर्षकम् अपि लिखेत्। यस्य विषयस्य वर्णनम् अनुच्छेदे वर्तते सः एव तस्य शीर्षकः भविष्यति; यथा—छात्रजीवनस्य उपरि दत्तस्य अनुच्छेदस्य शीर्षकः—छात्र जीवनम्/छात्र जीवनस्य वर्णनम्/छात्र जीवनस्य महत्त्वम् आदयः भवितुं शक्नुवन्ते।

❑ मौखिकप्रश्नाः

छात्राः यथारुचिलिखितस्य अनुच्छेदस्य विषये शिक्षकैः सह वार्तालापमाध्ययेन सविनयं प्रश्नोत्तरेभ्यः अनुरोधं कृत्वा मौखिक प्रश्ननिर्माणम् अपि करिष्यन्ति। एवमेव तेषाम् उत्तराणि अपि दास्यन्ति।

❑ निर्दिष्टः क्रियाकलापः

1. शिक्षकाः एवमेव अन्य लघु-मध्यम-बृहत् वा अनुच्छेदानाम् संग्रहार्थं छात्रान् प्रेरयन्तु।
2. छात्राः अन्य अनुच्छेदस्य रचनाम् अपि कुर्युः।

# खण्डः 'ख'–रचनात्मकं कार्यम्

## अङ्क-विभाजनम्

| | |
|---|---|
| (ख1) सङ्केताधारितम् औपचारिकम्/अनौपचारिकपत्रम् | 05 अङ्काः |
| (ख2) सङ्केताधारितम् लघुकथा/अनुच्छेदलेखनम् | 05 अङ्काः |
| अथवा | |
| चित्राधारितम् वर्णनम् | |
| (ख3) संस्कृत भाषायाम् अनुवाद कार्यम् | 05 अङ्काः |

- सङ्केताधारितम् संवादलेखनम्

(ध्यातव्यम्—इदं केवलं छात्राणाम् अभ्यासार्थम् एव दीयते, अधुना एतत् परीक्षायाः कृते नास्ति।)

# ख 1 सङ्केताधारितम् औपचारिकम् / अनौपचारिकपत्रम्

5 अङ्काः

प्राचीन काल में पत्र-लेखन की प्रणाली आज की लेखन-प्रणाली से पूर्णतया भिन्न थी। उस समय पत्र-लेखन का आरम्भ 'स्वस्ति' या 'शुभमस्तु' से किया जाता था और प्रथम वाक्य में लिखने के स्थान (लेखक के स्थान) की सूचना देते हुए पत्र लेखक जहाँ और जिसके पास अपना पत्र भेजना चाहता था, उसका उल्लेख करते हुए अपना परिचय (नाम) भी लिखता था।

परन्तु वर्तमान समय में हिन्दी भाषा में लिखे जाने वाले पत्रों के समान संस्कृत भाषा में भी पत्र लिखे जाने लगे हैं।

यदि हिन्दी भाषा में लिखे पत्रों का संस्कृत भाषा में अनुवाद कर लिया जाए तो भी ठीक रहेगा क्योंकि अब तो संस्कृत में पत्र-लेखन का सारा स्वरूप ही हिन्दी के पत्रों की ही भाँति हो गया है।

**वर्तमान समय की शैली—**

1. पत्र के दाईं ओर भेजने वाले का पूरा पता व उसके नीचे दिनांक (तिथि) लिखी जाती है; जैसे—

शिशु निकेतन विद्यालयः,<br>
दिल्लीतः।<br>
तिथि: 18.07.20........

2. स्थान के नाम के साथ पंचमी विभक्ति के स्थान पर 'तसिल्' प्रत्यय का भी प्रयोग किया जा सकता है; जैसे—
   गुरुग्रामात् के स्थान पर गुरुग्रामतः
   दिल्लीनगरात् के स्थान पर दिल्लीतः
   चण्डीगढ़नगरात् के स्थान पर चण्डीगढ़तः आदि।
3. वर्तमान समय में स्थान के साथ पंचमी विभक्ति व 'तसिल्' प्रत्यय की जगह नपुं० लि०/ प्रथमा विभक्ति, एकवचन का प्रयोग भी होने लगा है; जैसे—
   फरीदाबादम्, दिल्लीनगरम्, चण्डीगढ़नगरम् आदि।
4. तिथि/दिनांक लिखने में भी हिन्दी की शैली अपनाई जाती है; जैसे—
   4.8.2004, 10.5.2005, 30.7.2006 और 27.8.200X आदि। अन्य जानकारी निम्न सारणी (Table) देखकर प्राप्त की जा सकती है—
5. प्रत्येक परीक्षा में केवल दस रिक्त स्थानों की पूर्ति ही करने का निर्देश दिया जाएगा तथा उसी के आधार पर अंकों का विभाजन भी होगा।

## पत्र-लेखन विधि की सारणी

| | सम्बन्ध (नमस्कार वाचक शब्द) | आरम्भ में | अन्त में |
|---|---|---|---|
| 1. | पुत्र पिता को (सादरं नमोनमः, चरणारविन्देषु सादरं प्रणामम्, सादरं प्रणामम्) | (क) पूज्यपाद पितः। (ख) आदरणीय पितृपाद! (ग) पूज्यपाद पितृमहोदय! (घ) पूज्यपादपितृमहोदयाः! | (क) भवदाज्ञाकारी पुत्रः (ख) भवतः विनीतः बालः (ग) भवदीयः प्रियः सुतः (घ) भवत्प्रियसूनुः |
| 2. | पिता पुत्र के लिए (शुभाशीर्वादम्) | प्रिय पुत्र सुरेश, चिरञ्जीव | त्वदीयः शुभचिन्तकः |

| | | | |
|---|---|---|---|
| 3. | मित्र–मित्र को<br>(सप्रेम नमोनमः) | (क) प्रियमित्र दिनेश<br>(ख) प्रियसुहृद् देव | (क) भवदीयं मित्रम्<br>(ख) तव स्निग्धं मित्रम्<br>(ग) भवद्बन्धुः<br>(घ) स्नेहाङ्कितः |
| 4. | छोटे भाई को<br>(शुभाशीर्वादम्) (प्रसीदतु) | (क) प्रिय भानो<br>(ख) प्रियभ्रातृवर सुरेश | (क) भवदीयो भ्राता<br>(ख) त्वदीयो भ्राता |
| 5. | बड़े भाई को<br>(सादरं नमस्कारम्) | (क) आदरणीय भ्रातृपाद<br>(ख) आदरणीय भ्रातः | (क) भवदीयो भ्राता<br>(ख) भवदाज्ञाकारी |
| 6. | बहन, बड़े भाई के लिए<br>(नमस्कारम्) | आदरणीय भ्रातः | भवदीया स्नेहाधीना भगिनी<br>भवदीया भगिनी |
| 7. | बहन–छोटे भाई के लिए<br>(शुभाशीर्वादम्) | प्रिय भ्रातः | भवदीया भगिनी |
| 8. | भाई, बहन के लिए<br>(शुभाशीर्वादम्) | (क) आदरणीये भगिनि (बड़ी बहन)<br>(ख) प्रिये भगिनि (छोटी बहन) | (क) भवदीयः प्रियः भ्राता बड़ी<br>(ख) त्वदीयः प्रियः भ्राता छोटी |
| 9. | प्रकाशक आदि के लिए<br>(नमोनमः) (व्यावहारिक पत्रों में) | (क) श्रीमन् प्रकाशक महोदयः | (क) भवदीयः, भवदीया<br>(ख) भावकः, निवेदकः |

**उदाहरणार्थम्**

**1. स्वविद्यालयस्य वर्णनं कुर्वन् अनुजं प्रति पत्रम्।**

(अपने विद्यालय का वर्णन करते हुए छोटे भाई को पत्र।)

(A letter to younger brother describing about your school.)

परीक्षाभवनम्,
सोनीपत, हरियाणा।
तिथिः 3.3.20........

प्रिय अनुज राम,

शुभमस्तु।

अत्र कुशलम् तत्रास्तु। अहम् अधुना निजविद्यालयस्य वर्णनं कर्तुम् इच्छामि। मम विद्यालयस्य भवनम् अतीव विशालम् अतीव सुन्दरम् चास्ति। एषः विद्यालयः अति प्रसिद्धः अस्ति। अस्य परीक्षा परिणामः अत्युत्तमः आगच्छति। सर्वे अध्यापकाः परिश्रमशीलाः सन्ति। छात्राः अपि अत्र अनुशासनप्रियाः सन्ति। अतिकथनेन किम्, सर्वम् एव अत्र शोभनम्।

तव अग्रजः,
कर्णः

**2. परीक्षासाफल्याय मित्राय वर्धापनपत्रम्।**

(परीक्षा में सफल होने पर मित्र को बधाई-पत्र।)

(A letter of congratulation to a friend on his success in the exam.)

4/10, जयदेव पार्क,
दिल्ली–26
तिथिः 26.8.20........

प्रियमित्र प्रवीर,

सप्रेम नमोनमः।

परीक्षायां तव सफलतायाः पत्रम् अधिगत्य अहम् अमन्दम् आनन्दम् अन्वभवम्। त्वया कृतस्य कठोरपरिश्रमस्य एव अयं परिणामः

यत् त्वम् प्रथमां श्रेणीं लब्ध्वा उत्तीर्णवान्। त्वम् मम पित्रोरपि च साधुवादान् अर्हसि। आशासे भवान् आगामिनि वर्षे अतोऽपि अधिकतरं प्रशस्तं परीक्षाफलं लप्स्यते।

पुनरपि भूयोभूयः वर्धापनं कामयमानः,

तव अभिन्नम् मित्रम्,
कुणालः

**3. स्वविद्यालयस्य वार्षिकोत्सववर्णनपरं मित्रं प्रति पत्रम्।**

(अपने विद्यालय के वार्षिकोत्सव का वर्णन करते हुए मित्र को पत्र।)

(A letter to a friend describing about annual function of your school.)

9, नवयुवकछात्रावासः,
गीताविद्यालयः,
कुरुक्षेत्रम्।
दिनाङ्कः 28.3.20........

प्रियमित्र प्रमोद,
सप्रेम नमः।

अत्र कुशलं तत्रास्तु। अस्माकं विद्यालयस्य वार्षिकोत्सवः गतमङ्गलवासरे आयोजितः। अस्मिन् अवसरे अस्माकं विद्यालयः विविधरङ्ग-मयीभिः पत्रलताभिः वधूरिव विभूषितः आसीत्। दोधूयमानाभिः ध्वजाभिः सर्वत्र चाकचक्यम् आसीत्। मण्डलशिक्षाधिकारिणा उत्सवस्य अध्यक्षता कृता। शंखध्वनिभिः बिगुलबैण्डवाद्यैश्च अध्यक्षमहाभागानां स्वागतं कृतम्। रङ्गमंचीयकार्यक्रमः अपूर्वः आसीत्। महाराणाप्रतापविषयकम् छात्रैरभिनीतं रूपकं दृष्ट्वा सर्वे मन्त्रमुग्धाः जाताः। वार्षिकप्रतिवेदने विद्यालयस्य प्रगतिं श्रुत्वा अध्यक्षमहोदयेन विद्यालयस्य भृशं प्रशंसा कृता। अन्ते तस्य हस्ताभ्यां पारितोषिकानि वितीर्णानि।

शेषम् उत्तमं वर्तते।

तव मित्रम्,
अर्जुनः

**4. विदेशगतं मित्रं प्रति राष्ट्रियप्रेमविषयकं पत्रम्।**

(विदेश गए हुए मित्र को राष्ट्रीय-प्रेम के विषय में पत्र।)

(A letter about patriotism to a friend who has gone abroad.)

20, धर्मपुरा,
चावड़ी बाजार, दिल्ली।
दिनाङ्कः 15.8.20........

प्रियमित्र स्वदेश,
सप्रेम नमः।

अत्र कुशलं तत्रास्तु। अमेरिकादेशे निवसन् अपि भवान् तत्रस्थानां भारतीयानां संघटनां विधातुं कृतप्रयत्नोऽस्ति इति विदित्वा मम चेतः अतीव प्रसीदति। अधुना तु ये जनाः विदेशान् गच्छन्ति ते स्वदेशं विस्मरन्ति इति अतीव दुःखावहो वर्तते। विदेशगतेषु जनेषु भारतीयसंस्काराणाम् अभिरुचिः नित्यं वर्धेत इति लक्ष्यं युष्माकं समक्षे दृष्ट्वा अतीव सन्तोषः जायते। आशासे यद् विदेशगतेषु जनेषु निजराष्ट्रहितं दुर्लक्ष्यं न भवेत् इति भावनां भवान् दृढी करिष्यति।

भवदीयं मित्रम्,
रमणः

**5. पर्वतयात्रानिमंत्रणविषयकं मित्रं प्रति पत्रम्।**

(पर्वतीय यात्रा के लिए मित्र को निमन्त्रण-पत्र।)

(A letter to a friend to accompany on a hilly tour.)

प्रयाग भवनम्,
महाराणा प्रताप मार्गः,
झाँसीतः।
तिथिः 10.4.20........

प्रियमित्र सोहन!
सप्रेम नमोनमः।
अत्र कुशलं तत्रास्तु। अप्रैलमासस्य पञ्चदशतिथौ अस्माकं परीक्षा समाप्ता भविष्यति। तदनन्तरम् अप्रैलमासस्य विंशतिदिनाङ्कात् आरभ्य पञ्चविंशतिदिनाङ्क यावत् पञ्चदिनपरिमितम् पर्वतीयभ्रमणम् अस्माकं मित्रैः आयोजितम्। अयं कार्यक्रमः अतीव रुचिकरः आनन्ददायकः शिक्षाप्रदश्च भविष्यति। अस्मिन् अवसरे वयं सर्वे भवदीयसङ्गतिम् अपि कामयामहे। आशासे भवान् अस्य प्रस्तावस्य अनुमोदनम् अवश्यमेव करिष्यति। अहम् अतीव उत्सुकतया भवदीयपत्रस्य प्रतीक्षां करिष्यामि।

भवदीयं मित्रम्,
कार्तिकः

6. **मित्राय भगिनीविवाहस्य निमन्त्रणपत्रम्।**
(मित्र को बहन के विवाह के लिए निमन्त्रण-पत्र।)
(An invitation letter to a friend on the occassion of sister's marriage.)

938, सेक्टर-4,
अरबन इस्टेट, गुरुग्रामः।
तिथिः 20.8.20........

प्रियमित्र राहुल!
सप्रेम नमोनमः।
अत्र कुशलं तत्रास्तु। इदं प्रीतिदायकं वृत्तं भवन्तं सूचयित्वा अहम् अतीव आनन्दम् अनुभवामि यत् मम भगिन्याः विवाहः अग्रिममासस्य दशम्यां तारिकायां, बुधवासरे निश्चितः जातः। वरयात्रा लक्ष्मणपुरात् आगमिष्यति। अहं त्वां प्रेमपूर्वकं पूर्वतः एव ज्ञापयामि येन त्वम् अत्र त्रिचतुर्दिनानि पूर्वतः एव प्राप्तः स्याः। भवता पितृभ्यां सह अत्र अवश्यमेव आगन्तव्यम्। भवतां स्निग्धां सङ्गतिं साहाय्यं च अहं कामये। आदरणीयाभ्यां पितृभ्यां सस्नेह नमोनमः।

तत्र पत्रोत्तरं प्रतीक्षमाणः,

तव मित्रम्,
कुशलः

7. **पितुः पदोन्नतेः विषयकं मित्रं प्रति पत्रम्।**
(पिता जी की पदोन्नति के विषय में मित्र को पत्र।)
(A letter to a friend informing him about the promotion of your father.)

1, प्रेमनगरम्,
यमुनानगरम्।
तिथिः 5.10.20........

प्रियमित्र सुधीर!
सस्नेहं नमोनमः।
अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवच्चेतः प्रसादम् अधिगमिष्यति यत् मम पूज्याः पितृपादाः अधुना विद्यालयस्य प्राचार्यपदम् अलङ्कुर्वन्ति। तेषाम् इयं पदोन्नतिः सेवायां सानुमत्ता (सीनियरिटी) कारणात्, लोकप्रियताकारणात्, स्वविषये नैपुण्यकारणाच्च सञ्जाता। अतः आगामिनि रविवासरे अस्माभिः निमन्त्रिताः सर्वेऽपि प्राध्यापकाः जलपानार्थं मम गृहम् आगमिष्यन्ति। अस्मिन् अवसरे भवताऽपि अवश्यमेव आगन्तव्यम्। इदम्मम निवेदनमस्ति।

भवदीयं मित्रम्,
प्रमोदकुमारः

8. **पित्रे रक्तदानशिविरविषयकं पत्रम्।**
(पिता जी को रक्तदान शिविर के विषय में पत्र।)
(A letter to father about Blood Donation Camp.)

परीक्षाभवनम्,
गाजियाबादतः।
दिनाङ्कः 11.11.20........

पूज्य पितृमहोदय!

चरणवन्दनम्।

अत्र कुशलं तत्रास्तु। अद्याहं भवन्तं निवेदयामि यत् अस्माकं विद्यालये गतसप्ताहे रक्तदानशिविरम् आयोजितम्। अस्माकं कक्षाध्यापकः श्रीमान् रामचन्द्रः शिविरस्य प्रमुखः आयोजकः आसीत्। सः प्रथमं स्वरक्तं प्रायच्छत्। तदनन्तरम् दशमकक्षायाः पञ्च छात्राः एतस्मिन् शुभकार्ये अग्रेसराः अभवन्। तेषाम् उत्साहं दृष्ट्वा मम मनसि अपि रक्तदानस्य भावना सञ्जाता तथा च मयाऽपि स्वरक्तम् प्रदत्तम्। आशासे यद् भवान् मम एतां भावनां दृष्ट्वा प्रसन्नो भविष्यति। अहं पूर्णतया सकुशलोऽस्मि। चिन्तया अलम्।

भवदाज्ञाकारी पुत्रः,<br>
क०ख०ग०

**9. मातृनिधनशोकग्रस्तं मित्रं प्रति पत्रम्।**

(माता के निधन से शोकग्रस्त मित्र को पत्र।)

(A letter of condolence to a bereaved friend on the death of his mother.)

परीक्षाभवनम्,<br>
तिरुअनन्तपुरम्।<br>
तिथिः 5.7.20........

प्रियमित्रम्,

सप्रेम नमः।

तव पत्रे मातृपादानां निधनविषयिकीं दुःखदां वार्ताम् अधिगत्य अहम् अतीव दुःखितोऽस्मि। तव पितुः साम्प्रतं न जाने का दशा वर्तते? भवान् न केवलम् आत्मानम् एव, अपितु पितरमपि समाश्वासयतु। प्रलापैः रोदनेन च किमपि न भवति। भगवान् पूज्य मातृपादेभ्यः सद्गतिं प्रदद्यात्। युष्मभ्यम् च दुःखसहनक्षमतां दद्यात् इति प्रार्थना।

भवदीयं मित्रम्,<br>
राकेशः

**10. भवतः नाम महीधरोऽस्ति। भवान् जलवायु परिवर्तनम् इति विषयमधिकृत्य 'पैरिस समिति सहमति' विषयम् उपलक्ष्य स्वमित्रं गंगाधरं प्रति पत्रं लिखति।**

छात्रावासः<br>
देशबन्धु महाविद्यालयः,<br>
कानपुर<br>
तिथिः 10.7.20........

प्रिय सुहृद् गंगाधर!

सप्रेम नमस्कारः।

आशास्ति तव गृहे सर्वे पारिवारिक सदस्याः स्वस्थाः प्रसन्नाः च भविष्यन्ति। मित्रवर! अधुनैव फ्रांस देशस्य राजधान्यां पैरिसनगरे एकां समितिं विश्वस्य अनेके प्रमुखाः देशाः आयोजितवन्तः। तस्यां समित्यां (समितौ) वैश्विके स्तरे कार्बन वायुम् उत्सर्जनेन धरायाः वर्धमाने तापमाने विश्वेन अतीव चिन्ताः प्रकटिताः। अमरीका समेत अनेके प्रमुखाः देशाः पुनः अत्र आगत्य अनिच्छन्नपि स्वदेशैः कार्बन वायु-उत्सर्जनं न्यूनं कर्तुं सहमतिं प्रकटिताः।

अद्य विश्वस्तरे अत्यधिकायां मात्रायां सर्वे सम्पन्नाः देशाः कार्बन वायुम् उत्सर्जन्ति येन धरायाः तापमानम् अत्यधिकरूपेण अवर्धत। येन प्रकृतेः सन्तुलनं विपरीतं जातम्। फलस्वरूपेण जीवानां जीवनमेव धरायाः विनष्टम् अभवत्। यदि ईदृशमेव अग्रेऽपि भविष्यति तदा मानवजीवनमपि धरायाः समाप्तं भविष्यति। अतः एतद् विचार्य सर्वे नेतारः कार्बन वायुं न्यूनम् उत्सर्जनार्थम् सहमतिं प्रकटीकृतवन्तः। येन धरायां जीवनरक्षा भवेत्। एतत् सुखदम् अस्ति।

तव पितृभ्याम् मम नमः।

भवतां मित्रम्<br>
महीधरः

## अभ्यासः

1. भवान् देवव्रतः स्वदेशः विज्ञान-साहित्य-प्रौद्योगिक एवं इतिहास दृष्टौ समृद्धः वर्तते, इति सूचयन् एकं पत्रं स्वपितरं लिखति। मञ्जूषायाः सहायतया भवान् तत्पत्रं समुचितरूपेण सम्पूरयतु– ½ × 10 = 5

श्रीराम जन्मभूमि छात्रावासः
अयोध्यापुरी

तिथिः ......................

प्रतिष्ठायाम्–

पूज्यपादः पितृमहोदयः!

सादरं चरणस्पर्शम्।

भवताम् आशीर्वादेन अत्र सर्वं कुशलं वर्तते। मम (*i*) ......................अपि समुचितं चलति। वाराणसी-नगर्याः मम पार्श्वे (*ii*) ...................... नामात्मिका पत्रिका आगच्छति। सा यत्र साहित्यस्य, विज्ञानस्य प्रौद्योगिकस्य च ज्ञानं यच्छति तत्रैव (*iii*) ................................ धर्मस्य चापि सम्यक्तया ज्ञानं ददाति। तस्यां वैज्ञानिक, प्रौद्योगिकस्य च दृष्ट्या (*iv*) ...................... उत्तमाः लेखाः प्रकाश्यन्ते। यान् पठित्वा विज्ञाने प्रौद्योगिके वा क्षेत्रे अधिकाधिकं ज्ञानं प्राप्यते। विज्ञाने प्रौद्योगिके वा क्षेत्रे यत् नवीनम् (*v*) ...................... सम्पूर्णे विश्वे भवति विज्ञानस्य च क्षेत्रे यासां नवीनानां संस्थानां वा निर्माणं भवति तत्सर्वं तस्यां (*vi*) ...................... प्रकाश्यते। तत्रैव तस्याम् इतिहास विषयकं नवीनं लेखं पठित्वा अपि वयं (*vii*) ...................... परिपूर्णं ज्ञानं प्राप्नुमः।

सम्प्रति इदं श्रूयते यत् अधुना (*viii*) ...................... विषयेऽपि अनुसंधानपरकान् नवीनान् लेखान् अपि इयं पत्रिका प्रकाशितं करिष्यति। सम्पूर्णं सम्मेल्य इयं पत्रिका अतीव (*ix*) ...................... अस्ति अतः मह्यम् अतीव रोचते। यदि भवान् कथयिष्यति तर्हि अहम् एकम् अङ्कं भवद्भ्यः अपि प्रेषयिष्यामि।

मातृचरणयोः मम सादरं प्रणामम्।

(*x*) ......................
देवव्रतः

| |
|---|
| **मञ्जूषा**—भवत्कः सुतः, अर्थशास्त्रस्य, ज्ञानोदधिः, पठनम्, ज्ञानपरका, समसामयिकाः, पत्रिकायां, इतिहासस्य, इतिहासपरकं, अनुसंधानम् |

2. भवान् कमलनयनः दिल्लीनगरस्य जनकपुर्यां वसति। सम्प्रति वर्षायां वर्षाजलस्य निर्गमनं भवतां निवास क्षेत्रे सम्यक्तया न भवति। अतः सम्पूर्णा जलराशिः तत्रैव एकत्री भवति। एतदर्थम् उत्तर दिल्ली नगरनिगमस्य आयुक्तं प्रति एकं पत्रं भवान् मञ्जूषायाः सहायतया लिखतु– ½ × 10 = 5

सी 5/125 जनकपुरी
नवदिल्ली

तिथिः ..................

सेवायाम्–

श्रीमन् (*i*) ......................!

उत्तर दिल्ली नगर निगमः

दिल्ली राज्यम्

**विषय** : मम क्षेत्रात् वर्षायाः जलराशिं (*ii*) ...................... प्रार्थना पत्रम्।

महोदय,

अहम् भवतां क्षेत्रस्य सी. 5/125 जनकपुर्याः एकः (*iii*) ........................ अस्मि। सम्प्रति अस्माकं क्षेत्रे सर्वत्र वर्षा भवति अतः सर्वत्र जलमेव दृश्यते। परं (*iv*) ........................ जलनिस्सारण व्यवस्था सम्यग् नास्ति। स्थाने-स्थाने गर्ताः सन्ति येषु जलं भरितमस्ति। अतः आवागमने (*v*) ........................ अतीव असुविधा भवति। निवासिनाम् आवागमनम् अतीव (*vi*) ........................ अस्ति। अस्माभिः अनेकं वारम् नगरनिगमस्य अधिकारिणां समक्षे निवेदनं कृतम् परम् उचितं (*vii*) ........................ न अभवत्।

अतः भवतां सेवायां निवेदनमस्ति यत् शीघ्रातिशीघ्रम् एतस्याः (*viii*) ........................ समाधानं भवान् कारयतु येन जनानां जीवनम् उचिते मार्गे चलेत्।

आशास्ति भवान् शीघ्रमेव एतस्याः (*ix*) ........................ करिष्यति।

भवताम् अतीव धन्यवादो भविष्यति।

निवेदकः

(*x*) ........................

**मञ्जूषा**—समस्यायाः, कमलनयनः, समाधानम्, आयुक्त महोदय, नगरनिगमस्य, दुष्करम्, समाधानम्, जनान्, निवासी, निष्कासनाय

**3. भवान् राजतिलक शर्मा स्वक्षेत्रस्य विधायकं प्रति एकं पत्रं लेखितुम् इच्छति यत् सः अस्मिन् क्षेत्रे छात्राणां क्रीडार्थम् एकस्य क्रीडाक्षेत्रस्य व्यवस्थां कारयेत्। भवान् मञ्जूषायाः पदानां सहायतया स्वपत्रं सम्पूर्य लिखतु–**

**½ × 10 = 5**

द्वारा–

15/1 लकड़मण्डी, शिमला

(हिमाचल प्रदेशः)

तिथिः ........................

सेवायाम्–

(*i*) ........................!

अपर शिमला क्षेत्रम्

हिमाचल प्रदेश विधानसभा

सप्रेम नमस्कारम्।

**विषय** : स्वक्षेत्रे छात्राणां क्रीडार्थम् एकस्य क्रीडाक्षेत्रस्य (*ii*) ........................

महोदय!

सविनयं निवेदनं वर्तते यत् भवान् अस्माकं (*iii*) ........................ सम्माननीयः विधायकोऽस्ति। अस्माकं क्षेत्रं शिमला महानगरस्य बृहत्तमं (*iv*) ........................ वर्तते। अत्र अतीव सघना जनसंख्या अस्ति। परं बालानां (*v*) ........................ अत्र समुचित-क्रीडाक्षेत्रस्य अभावो विद्यते। येन बालेभ्यः क्रीडासु अतीव (*vi*) ........................ भवति, अस्य क्षेत्रस्य बालकाः इतस्ततः क्रीडनाय गच्छन्ति।

अतः वयं (*vii*) ........................ सेवायां प्रार्थ्यामहे यत् अस्मिन् क्षेत्रेऽपि जनसुविधां पश्यन् भवान् बालानां कृते एकस्य समुचितस्य (*viii*) ........................ व्यवस्थां कारयतु।

भवताम् अति कृपा भविष्यति।

(*ix*) ........................।

भवतां हितेच्छुक:

(*x*) ........................

| |
|---|
| **मञ्जूषा**—राजतिलक शर्मा, श्री विधायक महोदयः, भवताम्, व्यवस्थार्थम्, सधन्यवादम्, क्रीडनाय, क्षेत्रस्य, क्षेत्रम्, क्रीडाक्षेत्रस्य, असुविधा। |

**4. स्वपित्रोः वैवाहिकं वर्षगाठम् अभिलक्ष्य तस्मिन् आगमनार्थं स्वमित्रं पुरुषार्थम् एकं निमन्त्रणपत्रं लिखतु भवान् भाग्योदयः—** ½ × 10 = 5

यमुना विहारः

(*i*) ........................

तिथिः 22.7.20........

सेवायाम्–

प्रिय सुहृद् (*ii*) ........................!

नमस्कारः।

आशास्ति तव गृहे सर्वं कुशलं (*iii*) ........................।

मित्र! भवान् तु जानाति एव यत् आगामी (*iv*) ........................ मम पित्रोः अष्टादशतमं वैवाहिकं वर्षगाठं विद्यते। अतः तमभिलक्ष्य मम गृहे एकः (*v*) ........................ आयोजिष्यते। तदा मम अनेके सम्बन्धिनः, बान्धवाः मित्राणि च आगमिष्यन्ति। सर्वे मिलित्वा गास्यन्ति, नर्तिष्यन्ति नाटकं च (*vi*) ........................। पश्चात् सर्वे मम पितरौ उपवेश्य तिलकं कृत्वा आशीर्वादं (*vii*) ........................ वा दास्यन्ति। तत्पश्चात् प्रीतिभोजः भविष्यति।

अहम् त्वाम् पितृभ्यां सहैव आमन्त्रयामि। आशास्ते यत् त्वम् (*viii*) ........................ सह यथासमयम् अत्रागम्य कार्यक्रमस्य शोभां मम (*ix*) ........................ च वर्धयिष्यसि। अनेन मम उत्साहः द्विगुणो भविष्यति।

सधन्यवादम्।

भवत्कः मित्रम्

(*x*) ........................

| |
|---|
| **मञ्जूषा**—पञ्चदशतिथौ, वर्धापनम्, भाग्योदयः, भविष्यति, करिष्यन्ति, उत्साहं, दिल्ली प्रदेशः, समारोहः, पुरुषार्थ, पितृभ्याम्। |

**5. भवान् राकेशः। भवतः विद्यालयः छात्रान् शिक्षायात्रायै जोधपुरं नेष्यति। पितुः आज्ञाप्राप्त्यर्थम् लिखिते पत्रे मञ्जूषापदानां सहायतया रिक्तस्थानपूर्तिं कुरुत।** ½ × 10 = 5

(आप राकेश हैं। आपका विद्यालय छात्रों को शिक्षा-यात्रा के लिए जोधपुर ले जाएगा। पिता जी की आज्ञा प्राप्ति के लिए लिखे इस पत्र के रिक्त स्थानों को मंजूषा की सहायता से पूर्ण करें। You are Rakesh. Your school will take the students Jodhpur on an educational trip. Complete the letter written to your father to seek his permission by filling up the blanks with the words given in the box.)

8, संस्कृतिः (*i*) ........

दिनाङ्कः 3.8.20........

आदरणीय: (ii) …………… ।
सादरं (iii) …………………… ।
भवताम् पत्रम् प्राप्तम् (iv) …………………… च ज्ञाता। मम विद्यालय: शरदावकाशे छात्रान् (v) …………………… जोधपुरम् नेष्यति। अहम् अपि एतत् (vi) …………………… नगरं द्रष्टुम् इच्छामि। मह्यम् (vii) …………………… पञ्चशतम् रूप्यकाणि प्रेषयन्तु (viii) …………………… । शेषं कुशलम्। (ix) …………………… मम प्रणामा: अनुजाय च स्नेह:।

(x) …………………… पुत्र:
राकेश:

**मञ्जूषा**—यात्राव्ययार्थम्, भवताम्, पितृमहोदय:, छात्रावासत:, भवन्त:, ऐतिहासिकम्, नमोनम:, अम्बायै, कुशलता, शिक्षायात्रायै।

**6. भवान् सोमरत्न:। मातु: स्वास्थ्यं ज्ञातुम् भगिनीं लतां प्रति लिखिते पत्रे मञ्जूषायां दत्तै: पदै: रिक्तस्थानानि पूरयत।**

**½ × 10 = 5**

(आप सोमरत्न हैं। माता जी का स्वास्थ्य जानने के लिए बहन लता को लिखे पत्र में मंजूषा में दिए गए पदों की सहायता से रिक्त स्थानों को भरिए। You are Somratna. Complete the letter written to your sister Lata to know how your mother is by filling up the blanks with the words given in the box.)

(i) ……………
शिमलानगरम्
दिनाङ्क: 23.12.20.......

समादरणीये (ii) …………………… ।
नमोनम: ।
पत्रेण ज्ञातम् यत् माता (iii) ……………………अस्ति। अहम् अतीव (iv) …………………… अस्मि परम् परीक्षाकारणात् गृहम् (v) …………………… सक्षम: नास्मि। भवती (vi) …………………… तस्यै (vii) …………………… यच्छतु। भगवत्कृपया सा शीघ्रम् (viii) …………………… भविष्यति। कृपया पत्रोत्तरम् (ix) …………………… प्रेषयतु।

तव भ्राता
(x) ……………………

**मञ्जूषा**—औषधिम्, सोमरत्न:, आगन्तुं, भगिनि, चिन्तित:, यथासमयम्, ज्वरपीड़िता, छात्रावासत:, शीघ्रम्, स्वस्था।

**7. भवती सुषमा। भवत्या: अनुजा रमा अस्ति। रमां प्रति वार्षिकपरीक्षायै लिखिते पत्रे मञ्जूषापद-सहायतया रिक्तस्थानानि पूरयत।** **½ × 10 = 5**

(आप सुषमा और आपकी छोटी बहन रमा हैं। रमा को वार्षिक परीक्षा हेतु लिखे इस पत्र में मंजूषा के पदों की सहायता से रिक्त स्थानों को भरिए। You are Sushma and your Yonger sister is Rama. Fill up the blanks with the words given in the box to complete the letter written to Rama about her anual examination.)

नवदिल्लीत:
दिनाङ्क: 6.10.20........

प्रिये (i) …………………… रमे!
आशीर्वादा:।
अत्र (ii) …………………… तत्रास्तु। तव मासिक-परीक्षाया: (iii) …………………… मया दृष्ट:। गणितविषये त्वया (iv) …………………… अङ्का: प्राप्ता:। भवती गणितविषयस्य नित्यम् (v) …………………… कुर्यात् येन वार्षिकपरीक्षायाम् गणितविषयेऽपि (vi) …………………… अङ्कान् प्राप्नुयात् (vii) …………………… च उत्तमम् (viii) …………………… लभेत, मम (ix) …………………… अस्ति।

भवत्या: (x) ……………………
सुषमा

**मञ्जूषा**—न्यूना:, अग्रजा, कक्षायां, भगिनि, परिणाम:, उत्तमान्, शुभकामना, कुशलं, अभ्यासम्, स्थानम्।

8. **भवान् रविः अस्ति। भवतः मित्र अशोकस्य सफलतां ज्ञात्वा तस्मै लिखिते अस्मिन् वर्धापने पत्रे मञ्जूषापदानां सहायतया रिक्तस्थानपूर्तिं करोतु।** ½ × 10 = 5

(आप रवि, अपने मित्र अशोक की सफलता को जानकर उसे लिखे बधाई-पत्र में मंजूषा के शब्दों की सहायता से रिक्त स्थानों को भरिए। You are Ravi. Complete the letter written to your friend Ashok when you know about his success by filling up the blanks with the words given in the box.)

नागपुरतः

दिनाङ्कः 1.7.20.........

प्रिय (*i*) ....................... !

नमस्ते।

अहम् (*ii*) ....................... अस्मि। समाचारपत्रेण ज्ञातम् यत् (*iii*) ....................... दशमी-कक्षायाम् दिल्लीराज्ये (*iv*) ....................... स्थानं प्राप्तम्। इदम् ज्ञात्वा अहम् (*v*) ....................... अस्मि। भवता परिश्रमस्य फलं प्राप्तम्, एकम् अपि क्षणम् भवता (*vi*) ....................... न व्यतीतम्। अतः भवान् इदम् स्थानम् प्राप्तुम् (*vii*) ....................... अभवत्। मम (*viii*) ....................... स्वीकरोतु। भविष्येऽपि एवम् एव (*ix*) ....................... लभेत इति एषा मम कामना।

भवतः अभिन्नं मित्रम्

(*x*) .......................

| **मञ्जूषा**—सफलतां, भवता, रविः, अशोक, समर्थः, हर्षितः, प्रथमम्, कुशली, वर्धापनं, व्यर्थम्। |
|---|

9. **स्वमित्रं प्रति लिखते पत्रे मञ्जूषायां प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा उत्तर पुस्तिकायाम् पुनः लिखत।** ½ × 10 = 5

(अपने मित्र को लिखे पत्र में मंजूषा की सहायता से रिक्त स्थानों को भरकर उत्तर पुस्तिका में फिर से लिखिए। Rewrite the letter written to your friend in the answersheet by filling up the blanks with the words given in the box.)

रामकृष्णपुरम्

(*i*) .......................

दिनाङ्कः 25.7.20........

प्रिय (*ii*) ....................... ।

सप्रेम नमोनमः।

(*iii*) ....................... कुशलं तत्रास्तु। परं हर्षस्य विषयोऽयं यत् (*iv*) ....................... भगिन्याः विवाहः सुनिश्चितो जातः। (*v*) ....................... जयपुरतः आगमिष्यति। विवाहस्य कार्यक्रमः (*vi*) ....................... मासे दशम्याम् तारिकायां गृहं समया (*vii*) ....................... सम्पत्स्यते। अतः भवान् अस्मिन् (*viii*) ....................... सपरिवारम् अत्र आगत्य शोभां वर्धयतु। कार्यक्रमः अनुवर्तते। मातृपितृचरणयोः मे (*ix*) ....................... ।

भवदीयं मित्रम्

(*x*) .......................

| **मञ्जूषा**—शान्तनुः, अग्रिमे, प्रणामाञ्जलिः, सुहृद्, अत्र, मम, उद्याने, शुभावसरे, नवदिल्ली, वरयात्रा। |
|---|

10. **भवान् हिमांशुः। स्वविद्यालयस्य वार्षिकोत्सवस्य वर्णनं कुर्वता भवता मञ्जूषायाः पदानां सहायतया रिक्तस्थानपूर्तिः कर्तव्या।** ½ × 10 = 5

(आप हिमांशु हैं। अपने विद्यालय के वार्षिकोत्सव का वर्णन करते हुए आप मंजूषा की सहायता से इस पत्र के रिक्त स्थानों को भरिए। You are Himanshu. Fill up the blanks with the words given in the box to complete the letter describing the annual function of your school.)

(*i*) ...............

विद्यापतिनगरम्

नवदिल्लीत:

दिनाङ्क: 9.3.20........

प्रियमित्र

सप्रेम (*ii*) ........................ ।

अत्र (*iii*) ........................ तत्रास्तु। मित्र! अस्माकं (*iv*) ........................ वार्षिकोत्सव: (*v*) ........................ मासस्य पञ्चदश तारिकायाम् महता (*vi*) ........................ मानित:। अस्माकं प्रदेशस्य (*vii*) ........................ मुख्यातिथि: आसीत्। अस्मिन् अवसरे अनेके कार्यक्रमा: आयोजिता:। मुख्यातिथि: (*viii*) ........................ विशेषेण प्राशंसत् प्रधानाचार्य: कार्यक्रमस्य अन्ते स्वविद्यालयस्य प्रगतिवेदनम् अपठत्। अन्ते योग्येभ्य: (*ix*) ........................ पारितोषिकानि अयच्छत्।

भवदीयम् मित्रम्

(*x*) ........................

| मञ्जूषा—छात्रेभ्य:, नमो नम:, उत्साहेन, अक्टूबर, परीक्षाभवनम्, कुशलम्, विद्यालये, मुख्यमंत्री, संस्कृतकार्यक्रमम्, हिमांशु:। |
|---|

**11. मित्रं प्रति लिखिते निम्नपत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत।** **½ × 10 = 5**

**(मित्र को लिखे नीचे के इस पत्र में रिक्त स्थानों को मंजूषा में दिए गए पदों की सहायता से पूर्ण कीजिए। Complete the following letter written to your friend by filling up the blanks with the words given in the box.)**

द्वारका

(*i*) ........................

दिनाङ्क: 20.12.20........

(*ii*) ........................ अजय

(*iv*) ...................... कलिकानाम् सौन्दर्यं अपूर्वं वर्तते। (विकसन्ती)

(*v*) ...................... बालकाय वस्त्रं दीयते। (याचत्)

**उत्तराणि–** (*i*) पठन्त्याः (*ii*) हसन्तीं (*iii*) गच्छद्भिः (*iv*) विकसन्तीनाम् (*v*) याचते

**4. उदाहरणमनुसृत्य शतृशानच्प्रत्ययौ प्रयुज्य वाक्यानि संयोजयत–**

**यथा–** बालिका गच्छति/सा क्रीडति।

गच्छन्ती बालिका क्रीडति।

(*i*) बालकः पठति। सः पाठं स्मरति।

(*ii*) शिशुः चलति। सः पाठं स्मरति।

(*iii*) रमा पठति। सा लिखति।

(*iv*) साधुः उपदिशति। / सः ज्ञानवार्तां करोति।

(*v*) याचकः याचते। सः मार्गे चलति।

**उत्तराणि–** (*i*) पठन् बालकः पाठं स्मरति।

(*ii*) चलन् शिशुः हसति।

(*iii*) पठन्ती रमा लिखति।

(*iv*) उपदिशन् साधुः ज्ञानवार्तां करोति।

(*v*) याचन् याचकः मार्गे चलति।

**5. क्तक्तवतुप्रत्ययसंयोजनेन पदानि रचयित्वा वाक्यपूर्तिं कुरुत–**

(*i*) बालकेन ...................... (हस् + क्त)

(*ii*) बालकः ...................... (हस् + क्तवतु)

(*iii*) शिक्षकेण छात्रः पठनाय ...................... (कथ् + क्त)

(*iv*) शिक्षकाः छात्रान् पठनाय ...................... (कथ् + क्तवतु)

(*v*) पुत्री पितरम् पुस्तकम् ...................... (याच् + क्तवतु)

(*vi*) मम जनकेन भिक्षुकाय रूप्यकाणि ...................... (दा + क्त)

(*vii*) छात्रेण ऋषेः ज्ञानोपदेशः ...................... (श्रु + क्त)

**उत्तराणि–** (*i*) हसितम् (*ii*) हसितवान् (*iii*) कथितः (*iv*) कथितवन्तः (*v*) याचितवती (*vi*) दत्तानि (*vii*) श्रुतः

**6. स्तम्भयोः यथोचितं योजयत–**

| अ | ब |
|---|---|
| अहम् जलम् | पठितानि |
| सा पुस्तकम् | पचितवन्तः |
| त्वम् पाठम् | पीतवान्/पीतवती |
| मया पुस्तकानि | पठितवती |
| यूयम् भोजनं | लिखितवान् |

**उत्तराणि–**

| अ | ब |
|---|---|
| अहम् जलम् | पीतवान्/पीतवती |
| सा पुस्तकम् | पठितवती |
| त्वम् पाठम् | लिखितवान् |
| मया पुस्तकानि | पठितानि |
| यूयम् भोजनं | पचितवन्तः |

**7. उदाहरणमनुसृत्य भूतकालिकक्रियाणां स्थाने क्तवतुप्रत्ययप्रयोगेण वाक्यपरिवर्तनं कुरुत–**

**यथा–** अध्यापकः उद्दण्डं छात्रम् अदण्डयत्।

अध्यापकः उद्दण्डं छात्रं दण्डितवान्।

(*i*) छात्रः कक्षायाम् उच्चैः अहसत्।

(*ii*) माता भोजनम् अपचत्।

(*iii*) काकः घटे पाषाणखण्डानि अक्षिपत्।

(*iv*) छात्राः बसयानस्य प्रतीक्षायाम् अतिष्ठन्।

(*v*) कन्याः उद्याने अक्रीडन्।

**उत्तराणि–** (*i*) हसितवान् (*ii*) पक्तवती (*iii*) क्षिप्तवान् (*iv*) स्थितवन्तः/स्थितवत्यः (*v*) क्रीडितवत्यः

**8. उदाहरणमनुसृत्य भूतकालिकक्रियाणां स्थाने वाक्यपरिवर्तनं कुरुत–**

**यथा–** अध्यापकः छात्रम् पठनाय अकथयत्।

अध्यापकेन छात्रः पठनाय कथितः।

(*i*) वानरः मकराय जम्बूफलानि अयच्छत्।

(*ii*) मकरः वानरं गृहं चलितुम् अकथयत्।

(*iii*) नकुलः सर्पम् अमारयत्।

(*iv*) श्यामः लेखम् अलिखत्।

(*v*) रमा कथाम् अपठत्।

**उत्तराणि–** (*i*) वानरेण मकराय जम्बूफलानि दत्तानि।
(*ii*) मकरेण वानरः गृहं चलितुम् कथितः।
(*iii*) नकुलेन सर्पः मारितः।
(*iv*) श्यामेन लेखः लिखितः।
(*v*) रमया कथा पठिता।

**9. उदाहरणमनुसृत्य अशुद्धवाक्यानि शुद्धीकृत्य लिखत–**

**यथा–** बालकेन जलं पीतवान् — (*i*) बालकः जलं पीतवान्। (*ii*) बालकेन जलं पीतम्।

(*i*) मोहनेन पुस्तकं नीतवान्। — (*i*) ........................ (*ii*) ........................

(*ii*) गीता पाठं पठितम्। — (*i*) ........................ (*ii*) ........................

(*iii*) आचार्येण शिष्य उपदिष्टवान्। — (*i*) ........................ (*ii*) ........................

(*iv*) कन्या गृहे क्रीडितम्। — (*i*) ........................ (*ii*) ........................

(*v*) सः भोजनम् कृतम्। — (*i*) ........................ (*ii*) ........................

**उत्तराणि–** (*i*) मोहनः पुस्तकं नीतवान्।
मोहनेन पुस्तकं नीतम्।
(*ii*) गीता पाठं पठितवती।
गीतया पाठः पठितः।
(*iii*) आचार्यः शिष्यम् उपदिष्टवान्।
आचार्येण शिष्यः उपदिष्टः।
(*iv*) कन्या गृहे क्रीडितवती।
कन्यया गृहे क्रीडितम्।
(*v*) सः भोजनं कृतवान्।
तेन भोजनं कृतम्।

**10. कोष्ठके दत्तान् प्रकृतिप्रत्ययान् संयुज्य रिक्तस्थानानि पूरयत–**

(*i*) रामस्य चरित्रं सर्वैः ........................ (अनु + कृ + अनीयर्)
(*ii*) बालैः कन्दुकम् ........................ (क्रीड् + तव्यत्)
(*iii*) अस्माभिः गुरूपदेशः ........................ (श्रु + तव्यत्)
(*iv*) मया नौका ........................ (आ + रुह् + अनीयर्)
(*v*) कः अत्र आगत्य ........................ (लिख् + तव्यत्) लेखं लेखिष्यति?

**उत्तराणि–** (*i*) अनुकरणीयम् (*ii*) क्रीडितव्यम् (*iii*) श्रोतव्यः (*iv*) आरोहणीया (*v*) लेखितव्यम्

11. कृ – कर्तव्यम्, करणीयम् इति उदाहरणमनुसृत्य अधोलिखिताभिः धातुभिः द्वे द्वे पदे रचयत–

(*i*) गम् ...................... ......................

(*ii*) स्मृ ...................... ......................

(*iii*) नी ...................... ......................

(*iv*) दृश् ...................... ......................

(*v*) दा ...................... ......................

उत्तराणि–

| | |
|---|---|
| (*i*) गन्तव्यम् | गमनीयम् |
| (*ii*) स्मर्तव्यम्/स्मरितव्यम् | स्मरणीयम् |
| (*iii*) नेतव्यम् | नयनीयम् |
| (*iv*) द्रष्टव्यम् | दर्शनीयम् |
| (*v*) दातव्यम् | दानीयम् |

12. स्तम्भयोः यथोचितं योजयत–

| अ | ब |
|---|---|
| दुग्धम् | रक्षणीयाः |
| पुस्तकानि | आरोहणीया |
| ईश्वरः | पातव्यम् |
| नौका | अध्येतव्याः |
| वृक्षाः | पठितव्यानि |
| कथा | स्मरणीयः |
| ग्रन्थाः | लेखितव्याः |
| लेखाः | श्रवणीया |

उत्तराणि–

| अ | ब |
|---|---|
| दुग्धम् | पातव्यम् |
| पुस्तकानि | पठितव्यानि |
| ईश्वरः | स्मरणीयः |
| नौका | आरोहणीया |
| वृक्षाः | रक्षणीयाः |
| कथा | श्रवणीया |
| ग्रन्थाः | अध्येतव्याः |
| लेखाः | लेखितव्याः |

13. यथास्थानं प्रकृतिप्रत्यययोगं विभागं वा कुरुत–

(*i*) पेयम् ....................................

(*ii*) दा + यत् ....................................

(*iii*) सेव्यम् ....................................

(*iv*) कृ + ण्यत् ....................................

(*v*) कर्त्तव्यः ..........................................

(*vi*) प्र + आप् + तव्यत् ..........................................

(*vii*) स्मरणीयः ..........................................

(*viii*) हस् + अनीयर् ..........................................

(*ix*) लेखनीयम् ..........................................

(*x*) प्रच्छ् + तव्यत् ..........................................

**उत्तराणि–** (*i*) पा + यत् (*ii*) देयम् (*iii*) सेव् + यत् (*iv*) कार्यम् (*v*) कृ + तव्यत् (*vi*) प्राप्तव्यम् (*vii*) स्मृ + अनीयर् (*viii*) हसनीयम् (*ix*) लिख् + अनीयर् (*x*) प्रष्टव्यम्

**14. शुद्धपदेन वाक्यपूर्तिं कुरुत–**

(*i*) जलम् ........................ (पातव्यम्/पीतव्यम्)

(*ii*) पाठः ........................ (पठितव्यः/पठितव्यम्)

(*iii*) शत्रुः ........................ (जेतव्यः/जितव्यः)

(*iv*) असत्यवचनम् ........................ (त्याज्यम्/त्याज्यः)

(*v*) अपेयं जलम् ........................ (त्याग्यम्/त्याज्यम्)

(*vi*) धनम् ........................ (लभ्यम्/लभियम्)

**उत्तराणि–** (*i*) पातव्यम् (*ii*) पठितव्यः (*iii*) जेतव्यः (*iv*) त्याज्यम् (*v*) त्याज्यम् (*vi*) लभ्यम्

**15. उदाहरणमनुसृत्य पदेषु प्रयुक्तान् प्रकृतिप्रत्ययान् लिखत–**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| **उदाहरण–** | गतिः | गम् | क्तिन् |
| | (*i*) हसनम् | ........................ | ........................ |
| | (*ii*) पाठकः | ........................ | ........................ |
| | (*iii*) खाद्यः | ........................ | ........................ |
| | (*iv*) दृश्यः | ........................ | ........................ |
| | (*v*) भक्तिः | ........................ | ........................ |
| | (*vi*) सौभाग्यशालिन् | ........................ | ........................ |
| | (*vii*) नेता | ........................ | ........................ |
| | (*viii*) गायकः | ........................ | ........................ |

**उत्तराणि–** (*i*) हस्, ल्युट् (*ii*) पठ्, ण्वुल् (*iii*) खाद्, यत् (*iv*) दृश्, यत् (*v*) भज्, क्तिन् (*vi*) सौभाग्यशाला, इव् (*vii*) नी, तृच् (*viii*) गै, ण्वुल्

16. अधोलिखितप्रत्ययानां प्रयोगेणं पञ्च, पञ्च पदानि रचयित्वा स्वपुस्तिकासु लिखत–

तृच्, क्तिन, ण्वुल्, ल्युट्, यत्।

उत्तराणि–

| धातवः | तृच् | क्तिन् | ण्वुल् | ल्युट् | यत् |
|---|---|---|---|---|---|
| गम् | गन्तृ | गतिः | गतिकः | गमनम् | गम्यम् |
| चल् | चलितृ | बुद्धिः | चालकः | चलनम् | चल्यम् |
| पठ् | पठितृ | दृश्–दृष्टिः | पाठकः | पठनम् | पठ्यम् |
| धाव् | धावितृ | धृ–धृतिः | धावकः | धावनम् | धाव्यम् |
| लिख् | लेखितृ | मन्–मतिः | लेखकः | लेखनम् | लेख्यम् |

17. अधोलिखितवाक्येषु स्थूलपदेषु कः प्रत्ययः प्रयुक्तः इति कोष्ठकेभ्यः चित्वा लिखत–

(*i*) सज्जनानाम् **उक्तिः** पालनीया। (ल्युट/क्तिन्) ..........................................

(*ii*) **सेचकः** क्षेत्रं सिञ्चति। (ल्युट/ण्वुल्) ..........................................

(*iii*) **श्रावकः** कथां श्रावयति। (ल्युट्/ण्वुल्) ..........................................

(*iv*) भक्तः **भक्ति** करोति। (ण्वुल्/क्तिन्) ..........................................

उत्तराणि– (*i*) क्तिन् (*ii*) ण्वुल् (*iii*) ण्वुल् (*iv*) क्तिन्

18. शुद्धरूपं चित्वा लिखत–

(*i*) गम् + क्तिन् – गतिः / गमतिः ..........................................

(*ii*) दा + तृच् – दातृ / दानी ..........................................

(*iii*) नी + ण्वुल् – नाविकः / नायकः ..........................................

(*iv*) नृत् + ल्युट् – नर्तकः / नर्तनम् ..........................................

(*v*) दृश् + ल्युट् – दृश्यम् / दर्शनम् ..........................................

उत्तराणि– (*i*) गतिः (*ii*) दातृ (*iii*) नाविकः (*iv*) नर्तनम् (*v*) दर्शनम्

19. निम्नलिखितप्रयोगान् ध्यानेन पठित्वा स्थूलपदेषु प्रकृति-प्रत्यय विभागं कुरुत–

(*i*) कालिदासः **कीर्तिमान्** आसीत्। ..........................................

(*ii*) एतौ बालकौ **बलवन्तौ** स्तः। ..........................................

(*iii*) एते जनाः **गुणवन्तः** सन्ति। ..........................................

(*iv*) धनी सर्वत्र **समादरं** प्राप्नोति। ..........................................

(*v*) बलिनौ **अन्यायं** न सहतः। ..........................................

(*vi*) **गुणिनः** आत्मश्लाघां न कुर्वन्ति। ..........................................

(*vii*) पिता आकाशात् **श्रेष्ठतरः**। ..........................................

(*viii*) धरित्री मातुः अपि **गंभीरतरा।** ..........................................

(*ix*) कदलीफलम् आम्रात् **मधुरतमम्।** ..........................................

(*x*) हिमालयः भारतस्य **उच्चतम्** पर्वतः अस्ति। ..........................................

**उत्तराणि–** (*i*) कीर्ति + मतुप् (*ii*) बल + मतुप् (*iii*) गुण + मतुप् (*iv*) सम् + आदृ + अण् (*v*) अन्याय + अण् (*vi*) गुण + इन् (*vii*) श्रेष्ठ + तरप् (*viii*) गंभीर + तरप् (*ix*) मधुर + तमप् (*x*) उच्च + तमप्

**20. प्रत्ययं संयुज्य पदनिर्माणं कुरुत–**

(*i*) श्री + मतुप् ..........................................

(*ii*) शक्ति + मतुप् ..........................................

(*iii*) धन + वतुप् ..........................................

(*iv*) बल + वतुप् ..........................................

(*v*) गुरु + तल् ..........................................

(*vi*) सुन्दर + मयट् ..........................................

(*vii*) पटु + तमप् ..........................................

(*viii*) मृत् + मयट् ..........................................

(*ix*) वसुदेव + अण् ..........................................

(*x*) धर्म + ठक् ..........................................

(*xi*) मित्र + तल् ..........................................

(*xii*) विद्वस् + त्व ..........................................

**उत्तराणि–** (*i*) श्रीमान् (*ii*) शक्तिमान् (*iii*) धनवान् (*iv*) बलवान् (*v*) गुरुता (*vi*) सुन्दरमयम् (*vii*) पटुतमः (*viii*) मृण्मयः (*ix*) वासुदेवः (*x*) धार्मिकः (*xi*) मित्रता (*xii*) विद्वत्वम्

**21. कोष्ठके दत्तैः पदैः रिक्तस्थानानि पूरयत–**

(*i*) धर्मेन्द्रः बालाभ्याम् ........................। (प्रशस्यतरः/प्रशस्यतमः)

(*ii*) ........................ राज्ञः दशरथस्य राजगुरुः आसीत्। (वाशिष्ठः/वशिष्ठः)

(*iii*) बालिकासु माया ........................ (चतुरतरा / चतुरतमा)

(*iv*) पाण्डवानाम् ........................ दर्शनीयम् आसीत्। (युद्धकौशलम्/युद्ध कुशलम्)

(*v*) ........................ आभूषणम् बहुमूल्यं भवति। (स्वर्णमयः/स्वर्णमयम्)

(*vi*) रावणः ........................ आसीत्। (दानवः/दनुजः)

(*vii*) ........................ जनः औषधिं सेवते। (व्याधितः/व्याधिः)

(*viii*) बालिकासु चंद्रकला ........................ वदति (मधुरतरम्/मधुरतमम्)

(*ix*) बालकेषु विजयस्य अङ्कणगतिः ........................ (तीव्रतरा/तीव्रतमा)

**उत्तराणि–** (*i*) प्रशस्यतरः (*ii*) वशिष्ठः (*iii*) चतुरतमा (*iv*) युद्धकौशलम् (*v*) स्वर्णमयम् (*vi*) दानवः (*vii*) व्याधितः (*viii*) मधुरतमम् (*ix*) तीव्रतमा

**22. विशेष्यविशेषणे परस्परं योजयत–**

(*i*) कीर्तिमान् – मञ्जूषा

(*ii*) उत्तमम् – पुरुष:

(*iii*) उच्चतम: – कार्यम्

(*iv*) लौहमयी – पर्वत:

**उत्तराणि–** (*i*) पुरुष: (*ii*) कार्यम् (*iii*) पर्वत: (*iv*) मञ्जूषा

**23. उदाहरणमनुसृत्य प्रकृतिप्रत्ययविभागं कुरुत–**

**यथा** – धीमान् = धी + मतुप्

(*i*) मधुरतम: .................... ....................

(*ii*) तीव्रतर: .................... ....................

(*iii*) वासुदेव: .................... ....................

(*iv*) कार्मिक: .................... ....................

(*v*) दन्त्यम् .................... ....................

(*vi*) मृण्मय: .................... ....................

(*vii*) पिपासित: .................... ....................

(*viii*) लघुता .................... ....................

(*ix*) वीरतम: .................... ....................

(*x*) नदीत: .................... ....................

**उत्तराणि–** (*i*) मधुर + तमप् (*ii*) तीव्र + तरप् (*iii*) वसुदेव + अण् (*iv*) कर्म + ठक् (*v*) दन्त + त्व (*vi*) मृत् + मयट् (*vii*) पिपाता + इतच् (*viii*) लघु + तल् (*ix*) वीर + तमप् (*x*) नदी + तसिल्

**24. अधोलिखितेषु शब्देषु तसिल्प्रत्ययं संयुज्य वाक्यरचनां कुरुत–**

| पर्वत:, नगरम्, भूमि:, भानु:, नदी |
|---|

(*i*) गंगा नदी हिमालय **पर्वतत:** निर्गच्छति।

(*ii*) कमला स्व **नगरत:** निर्गत्य हरिद्वारं प्रति गच्छति।

(*iii*) अन्नानि **भूमित:** जायन्ते।

(*iv*) **भानुत:** उष्मा प्राप्यते।

(*v*) **नदीत:** जना: जीवनं प्राप्यन्ते।

**उत्तराणि–** (*i*) पर्वतत: (*ii*) नगरत: (*iii*) भूमित: (*iv*) भानुत: (*v*) नदीत:

**25. कोष्ठकेषु प्रदत्तेषु शब्देषु तसिल्प्रत्ययं संयुज्य रिक्तस्थानानि पूरयत–**

(*i*) छात्र: .................... आगच्छति। (विद्यालय)

(*ii*) देवदत्त: .................... काशीं गच्छति। (मथुरा)

(*iii*) वयं ...................... जलम् आहराम:। (नदी)

(*iv*) स: ...................... गत:। (देवालय)

**उत्तराणि–** (*i*) विद्यालयत: (*ii*) मथुरात: (*iii*) नदीत: (*iv*) देवालयत:

**26. निर्देशानुसारं लिङ्परिवर्तनं कुरुत–**

(*i*) बालक ...................... (स्त्री.)

(*ii*) आराध्या ...................... (पु.)

(*iii*) प्रथमा ...................... (पु.)

(*iv*) साधक ...................... (स्त्री.)

(*v*) आचार्य ...................... (पु.)

(*vi*) धातृ ...................... (स्त्री.)

**उत्तराणि–** (*i*) बालिका (*ii*) आराध्य (*iii*) प्रथम: (*iv*) साधिका (*v*) आचार्य: (*vi*) धात्री

## शेमुषी पाठ्यपुस्तकात्

**निम्न रेखाङ्कितानां पदानां प्रकृति प्रत्ययौ विभज्य लिखत–**

### पाठ–1 (शुचिपर्यावरणम्)

1. दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।
2. महानगरमध्ये चलत् अनिशं कालायसचक्रम्।
3. मन: शोषयत् तनु: पेषयत्।
4. स्थान्नैव जनग्रसनम्।
5. वाष्पयानमाला संधावति वितरन्ती ध्वानम्।
6. वायुमण्डलं भृशं दूषितम्।
7. कुत्सितवस्तुमिश्रितं भक्ष्यम्।
8. करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्।
9. एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्।
10. हरितरुणां ललितलतानां माला रमणीया।
11. कुसुमावलि: समीर चालिता स्यान्मे वरणीया।
12. नवमालिका रसालं मिलिता रुचिरं संगमनम्।
13. पुर-कलरव सम्भ्रमित जनेभ्यो धृत सुखसन्देशम्।
14. पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा।
15. मानवाय जीवनं कामये नो जीवन्मरणम्।

### पाठ–2 (बुद्धिर्बलवती सदा)

16. तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितु: गृहं प्रति चलिता।
17. सा व्याघ्रं आगच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ प्रहृत्य जगाद।
18. अयम् एक: तावत् विभज्य भुज्यताम्।
19. निजबुद्ध्या विमुक्ता सा भयात् व्याघ्रस्य भामिनी।
20. अन्योऽपि बुद्धिमान् लोके।
21. कश्चिद् धूर्त: शृगाल: हसन् आह।
22. या शास्त्रे श्रूयते तयाहं हन्तुम् आरब्ध:।
23. व्याघ्र! त्वया महत्कौतुकम् आवेदितम्।
24. मया सात्मपुत्रावेकैकशो माम् अत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।
25. यत्रास्ते सा धूर्ता तत्र गम्यताम्।
26. तर्हि त्वया अहं हन्तव्य: इति।
27. शृंगाल! यदि त्वम् मां मुक्त्वा यासि।
28. यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्।
29. शृंगालेन सहितं पुन: आयान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती।
30. परं प्रत्युत्पन्नमति: सा जम्बुकम् आक्षिपन्ती अङ्गुल्या तर्जयन्ती उवाच।
31. विश्वास्याद्यैकम् आनीय कथं यासि वदाधुना।
32. इति उक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा।

### पाठ–3 (व्यायाम: सर्वदा पथ्य:)

33. स्थिरत्वं लाघवं मृजा।

34. श्रमक्लमपिपासोष्ण–शीतादीनां सहिष्णुता।
35. न चास्ति सदृशं तेन किञ्चितस्थौल्यापकर्षणम्।
36. न च व्यायामिनं मर्त्य मर्दयन्त्यरयो बलात्।
37. न चैनं सहसा आक्रम्य जरा समधिरोहति।
38. व्यायामस्विन्नगात्रस्य पद्भ्याम् उद्वर्तितस्य च।
39. व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।
40. व्यायामो हि सदा पथ्यः।
41. बलिनां स्निग्ध भोजिनाम्।
42. स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः।
43. हृदिस्थानास्थितः वायुः यदा वक्त्रं प्रपद्यते।
44. समीक्ष्य कुर्याद् व्यायामम्।

## पाठ–4 ( शिशुलालनम् )

45. रामस्य समीपम् उपसृत्य प्रणम्य च।
46. अहो हृदयग्राही स्पर्शः।
47. न युक्तम् अध्यासितुम्।
48. गुणमहतामपि लालनीय एव।
49. पशुपति-मस्तक-केतकच्छदत्वम्।
50. एष भवतोः सौन्दर्यावलोक जनितेन कौतूहलेन पृच्छामि।
51. कथमस्मत् समानाभिजनौ संवृत्तौ?
52. कुशं निर्दिश्य।
53. अहो! उदात्तरम्यः समुदाचारः।
54. अहमत्र भवतोः जनकं नामतो वेदितुम् इच्छामि।
55. किं कुपिता एवं भणति, उत प्रकृतिस्था?
56. एतयोर्जननी तेन अवमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति।
57. सा तपस्विनी मत्कृतेनापराधेन स्वापत्यम् एवं निर्भर्त्सयति।
58. विदूषकम् अवलोक्य।
59. कुतूहलेन आविष्टः मातरमनयोः नामतः वेदितुम् इच्छामि।
60. न युक्तम् च स्त्रीगतम् अनुयोक्तुम्।
61. किं नामधेया युवयोः जननी?
62. तपोवनवासिनः देवी इति नाम्ना आह्वयन्ति।
63. भगवान् वाल्मीकिः वधूः इति।
64. इयती वेला सञ्जाता।
65. भवन्तौ गायन्तौ कविरपि पुराणः।
66. गिरां सन्दर्भः अयं प्रथमम् अवतीर्णो वसुमतीम्।
67. अहमपि एतयोश्चिरासनपरिखेदं विहरणं कृत्वा अषनयामि।

## पाठ–5 ( जननी तुल्यवत्सला )

68. कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन् आसीत्।
69. तयोः एकः जवेन गन्तुम् अशक्तः आसीत्।
70. कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।
71. सः वृषभः हलम् ऊढ्वा गन्तुमशक्तः क्षेत्रे पपात।
72. क्रुद्धः कृषीवलः तम् उत्थापयितुम् बहुबारम् यत्नमकरोत्।
73. तथापि वृषः न उत्थितः।
74. भूमौ पतिते पुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्याम् अश्रूणि आविरासन्।
75. सः दीन इति जानन् अपि कृषकः तं बहुधा पीडयति।
76. इतरमिव धुरं वोढुं सः न शक्नोति।
77. इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्।
78. दीनस्य तु सतः शक्र! पुत्रस्य अभ्यधिका कृपा।
79. सर्वेषु अपत्येषु जननी तुल्यवत्सला एव।
80. पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः।
81. कृषकः हर्षातिरेकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात्।

## पाठ–6 ( सुभाषितानि )

82. कृत्वा यं नावसीदति।
83. गुणी गुणं वेत्ति न वेति निर्गुणः।
84. निमित्तम् उद्दिश्य हि यः प्रकुप्यति।
85. अकारण द्वेषि मनस्तु यस्य वै।
86. उदीरितः अर्थः पशुनापि गृह्यते।
87. तयाश्च नागाश्च वहन्ति बोधिताः।
88. अनुक्तम् अपि ऊहति पण्डितो जनः।
89. देहस्थितः देहविनाशाय।
90. यथास्थितः काष्ठगतः हि वह्निः।
91. सेवितव्यः महावृक्षः फलच्छाया समन्वितः।
92. संपत्तौ च विपत्तौ च महताम् एकरूपता।
93. अश्वश्चेद् धावने वीरः भारस्य वहने खरः।

## पाठ–7 ( सौहार्द प्रकृतेः शोभा )

94. समीपे एव एका नदी वहति।
95. तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति।
96. क्रुद्धः सिंह तं प्रहर्तुम् इच्छति।
97. परं वानरः तु कूर्दित्वा वृक्षम् आरूढः।
98. अपरः वानरः सिंहस्य कर्णम् आकृष्य पुनः वृक्षोपरि आरोहति।
99. वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा कलरवं कुर्वन्ति।
100. क्रोधेन गर्जन्।

101. किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?
102. किं न श्रुता त्वया पञ्चतन्त्रोक्तिः?
103. यो न रक्षति वित्रस्तान् पीड्यमानान् परैः सदा।
104. आम्। सत्यं कथितं त्वया।
105. वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।
106. (उपहसन्) कथं त्वं योग्यः वनराजः भवितुम्?
107. मम सत्यप्रियता तु जनानां कृते उदाहरण स्वरूपा।
108. अस्माकं परिश्रमः ऐक्यं च विश्व प्रथितम्।
109. अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।
110. वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।
111. अहम् यदि तव संततिं न पालयामि।
112. समीपतः एव आगच्छत्।
113. सर्वाः वार्ताः श्रृण्वन् एव अहम् अत्रागच्छन्।
114. अहम् विशालकायः, बलशाली पराक्रमी च।
115. वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि।
116. शीघ्रमेव गजस्य पुच्छं विधूय वृक्षोपरि आरोहति।
117. गजः तं वृक्षमेव स्वशुण्डेन आलोडयितुम् इच्छति।
118. एवम् गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंहः अपि हसति।
119. सिंहं गजं वा पराजेतुं समर्था अस्माकं जातिः।
120. अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुम् अर्हति।
121. योजनां निर्माय च स्वसभायां विविधपदम् अलंकुर्वाणैः जन्तुभिः मिलित्वा रक्षोपायान् कारयिष्यामि।
122. बलकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि।
123. तव कारणात् सर्वं पक्षिकुलमेव अपमानितं जातम्।
124. मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहम् पक्षिराजः कृतः।
125. पिच्छान् उद् ाट्य नृत्यमुद्रायां स्थितः सन्।
126. नृत्यातिरिक्तं का तव विशेषता?
127. सर्वथा सम्यक् उक्तम् सिंहमहोदयेन।
128. परम् अधुना तु कोऽपि पक्षी राजेति निश्चेतव्यम्।
129. तैः सर्वैः गहननिद्रायां निश्चितं स्वपन्तम् उलूकं वीक्ष्य विचारितम्।
130. स्वभावरौद्रमत्युग्रं क्रूरम् अप्रिय वादिनम्।
131. यूयम् सर्वे एव मे सन्ततिः।
132. सर्वे प्राणिनः समवेतस्वरेण।
133. कथयति तु भवती सर्वथा सम्यक्।
134. अहम् प्रकृतिः युष्माकं सर्वेषां जननी।
135. सर्वेषामेव मत्कृते महत्त्वं विद्यते यथासमयम्।
136. अपितु मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्।
137. अगाधजल सञ्चारी न गर्वं याति रोहितः।
138. प्राणिनां जायते हानिः परस्पर विवादतः।

**पाठ–8 ( विचित्रः साक्षी )**

139. कश्चन निर्धनोजनः भूरि परिश्रम्य किञ्चिद् वित्तम् उपार्जितवान्।
140. तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः।
141. तत् तनयः तत्रैव निवसन् अध्ययने संलग्नः समभूत्।
142. एकदा सः पिता तनूजस्य रुग्णताम् आकर्ण्य व्याकुलः जातः।
143. पुत्रं द्रष्टुं च सः प्रस्थितः।
144. परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।
145. पदातिक्रमेण संचलन् सायं समये अपि असौ गन्तव्याद् दूरे आसीत्।
146. निसान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा।
147. एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थम् उपागतः।
148. करुणापरः गृही तस्मै आश्रयं प्रायच्छत्।
149. विचित्रा दैवगतिः।
150. कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।
151. तत्र स निहिताम् एकां मञ्जूषाम् आदाय पलायितः।
152. प्रबुद्धः अतिथिः चौरशङ्कया तमन्वधावत्।
153. चौरः एव उच्चैः क्रोशितुम् आरभत।
154. तस्य तारस्वरेण प्रबुद्धः ग्रामवासिनः स्वगृहात् निष्क्रम्य तत्रागच्छत्।
155. वराकमतिथिम् एव च चौरं मत्वा अभर्त्सयन्।
156. रक्षापुरुषः तदा तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्रक्षिपत्।
157. सः आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्।
158. किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्।
159. ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्।
160. तौ न्यायालये स्व-स्व-पक्षं पुनः स्थापितवन्तौ।
161. इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः।

162. आदिश्यतां किं करणीयम् इति।
163. न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुम् आदिष्टवान्।
164. तौ तं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ।
165. भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्।
166. तस्य क्रन्दनं निशम्य मुदितः आरक्षी तमुवाच।
167. इति प्रोच्य उच्चैः अहसत्।
168. आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत्।
169. सः शवः प्रावारकम् अपसार्य न्यायाधीशम् अभिवाद्य निवेदितवान्।
170. मान्यवर! एतेन आरक्षिणा अध्वनि यद् उक्तं तद् वर्णया. मि।
171. त्वया अहं चोरितायाः मञ्जूषायाः गृहणात् वारितः।
172. तं जनं सम्मानं न्यायाधीशः मुक्तवान्।
173. नीतिं युक्तिं समालम्ब्य लीलया एव प्रकुर्वते मतिवैभव शालिनः।

## पाठ–9 ( सूक्तयः )

174. पिताऽस्य किं तपस्तेपे इति उक्तिः तत् कृतज्ञता।
175. अवक्रता यथा चित्ते तथा वाचि भवेत् यदि।
176. तदेवाहुः महात्मानः समत्वम् इति तथ्यतः।
177. त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
178. परित्यज्य फलं पक्वम्।
179. विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
180. यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
181. कर्तुं शक्यो भवेद्येन स विवेक इति ईरितः।
182. वाक्पुटः धैर्यवान् मन्त्री सभायामप्यकातरः।
183. तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।

## पाठ–10 ( भूकम्पविभीषिका )

184. तदाकस्मादेव गुर्जरराज्यं क्रन्दनविकलं विपन्नञ्च जातम्।
185. भूकम्पस्य दारुण-विभीषिका कच्छजनपदं ध्वंसावशेषु परिवर्तितवती।
186. कालद्वये विभक्ता भूमिः।
187. भूमिगर्भात् उपरि निस्सरन्तीभिः दुर्वार जलधाराभिः महाप्लावनदृश्यम् उपस्थितम्।
188. प्राणिनः तु क्षणेनैव मृताः।
189. ध्वस्तभवनेषु सम्पीडिताः सहस्रशोऽन्ये सहायतार्थं क्रन्दन्ति स्म।
190. केचन शिशवस्तु द्वित्राणि दिनानि जीवनं धारितवन्तः।
191. कश्मीर प्रान्ते पाकिस्तान देशे च धरायाः महत् कम्पनं जातम्।
192. पृथिव्याः अन्तर्गर्भे विद्यमानाः बृहत्यः पाषाणशिलाः यदा त्रुट्यन्ति।
193. येन महाविनाश दृश्यम् समुत्पद्यते।
194. तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या बहिर्निष्क्रामति।
195. धूम भस्मावृतं जायते तदा गगनम्।
196. ज्वालाम् उद्गिरन्तः एते पर्वताः भीषणं भूकम्पं जनयन्ति।
197. प्रकृति-समक्षमद्यापि विज्ञान गर्वितः मानवः वामनकल्पः एव।
198. वस्तुतः शान्तानि एव पञ्चतत्त्वानि कल्पन्ते।

## पाठ–11 ( प्राणेभ्योऽपि प्रियः सुहृद् )

199. वत्स! मणिकार श्रेष्ठिनं चन्दनदासम् इदानीं द्रष्टुमिच्छामि।
200. निष्क्रम्य चन्दनदासेन सह प्रविश्य।
201. (उपसृत्य) उपाध्याय! अयं श्रेष्ठी चन्दनदासः।
202. अत्यादरः शङ्कनीयः।
203. आर्यस्य प्रसादेन अखण्डिता मे वाणिज्या।
204. आर्य! अनुगृहीतः अस्मि।
205. इति भवता प्रष्टव्याः स्मः।
206. कर्णौ पिधाय।
207. त्वम् अद्यापि राजापथ्यकारिणः अमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।
208. केनापि अनार्येण आर्याय निवेदितम्।
209. भीताः पूर्वराजपुरुषाः देशान्तरं व्रजन्ति।
210. गृहेषु गृहजनं निक्षिप्य भीताः राजपुरुषाः देशान्तरं व्रजन्ति।

## पाठ–12 ( अन्योक्तयः )

211. न सा बकसहस्रेण परितः तीरवासिना।
212. भुक्ता मृणालपटली भवता निपीता।
213. न्यम्बूनि यत्र नलिनानि निषेवितानि।
214. कृत्येन केन भवितासि कृतोपकारः।
215. भवता या तरोरस्य पुष्टिः।
216. सा किं शक्या जनयितुम्।
217. धारासारानपि विकिरता विश्वतो वारिदेव।
218. मीनो नु हन्त कतमां गतिम् अभ्युपैतु।
219. एक एक खगो मानी वने वसति चातकः।
220. आश्वास्य पर्वतकुलं तपनोष्णतप्त।
221. नानानदीनदशतानि च पूरयित्वा।

# बोर्ड परीक्षायाः प्रश्नाः

**1. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत–**

1. एतस्यां दुर्घटनायाम् अर्धदग्धाः जनाः रक्षणीयाः। *[CBSE 2012]*
2. अस्माभिः अग्रजानाम् आदेशपालनं कृ + तव्यत्। *[CBSE 2012]*
3. क्रीड् + शतृ बालिकां कथय। *[Delhi 2011]*
4. मुद् + शानच् बालकाय मोदकं यच्छ। *[Delhi 2011]*
5. गम् + शतृ बालकः कुत्रापि न पश्यति। *[All India 2011]*
6. सेव् + शानच् जनाः स्वकर्तव्यं निर्वहन्ति। *[All India 2011]*
7. पठ् + शतृ बालकः शनैः शनैः वदति। *[All India 2011]*
8. गम् + शतृ बालिका गायति। *[All India 2012]*
9. गुरुं सेव् + शानच् छात्रः प्रसन्नः भवति। *[All India 2012]*
10. पठ् + शतृ बालकः शनैः-शनैः गच्छति। *[Delhi 2015]*
11. वृध् + शानच् बालिकायै दुग्धं यच्छ। *[Delhi 2015]*
12. चल् + शतृ बालकः सर्वत्र पश्यति। *[All India 2015]*
13. मुद् + शानच् बालिकायै पारितोषिकं यच्छ। *[All India 2015]*
14. त्रैलोक्यं दह् + शतृ इव प्रचण्डज्वालः अग्निः सर्वत्र प्रसरति। *[Delhi 2016]*
15. सेवमाना बालिका राधा अस्ति। *[Delhi 2016]*
16. गच्छन्तं बालकं पश्य। *[All India 2016]*
17. गुरुं सेव् + शानच् छात्रः प्रसन्नः अस्ति। *[All India 2016]*
18. छात्रैः कक्षायां ध्यानेन पठनीयम्। *[CBSE 2012]*
19. एतेषां स्थलानां यात्रा कर्तव्या। *[CBSE 2012]*
20. 'प्रगतिमैदान' क्षेत्रे प्रदर्शनी दृश् + अनीयर्। *[CBSE 2014]*
21. मात्रा वस्त्राणि क्षाल् + अनीयर्। *[CBSE 2014]*
22. अनुजेन सदैव पिता नम् + तव्यत्। *[CBSE 2014]*
23. शिक्ष् + शतृ शिक्षकः फलं दर्शयति। *[All India 2012]*
24. प्रच्छन्नभाग्यः मार्गे क्रीड् + शतृ बालकान् अपश्यत्। *[Delhi 2013]*
25. शीताधिक्येन कम्पमानः वानरः वृक्षे तिष्ठति। *[Delhi 2013]*
26. शीताधिक्येन मार्गे कम्प् + शानच् विदुषां वचः श्रोतव्यः। *[All India 2013]*
27. मार्गे क्रीडन्तः छात्राः समयं यापयन्ति। *[All India 2013]*
28. तौ मार्गे क्रीड् + शतृ बालकान् अपश्यताम्। *[Delhi 2014]*
29. प्रयतमानाः जनाः साफल्यं प्राप्नुवन्ति। *[Delhi 2014]*
30. त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः। *[All India 2014]*
31. गुरुं सेव् + शानच् शिष्यः प्रसन्नः भवति। *[All India 2014]*
32. प्रकृतेः रमणीय + तल् मनोरमा भवति। *[Delhi 2011]*
33. परिश्रमस्य महत् + त्व सर्वे जानन्ति। *[Delhi 2011, All India 2012, 2016]*
34. क्रूरता सदैव निन्दनीया एव। *[All India 2011]*

35. बालानां चपल + त्व कः न जानाति? [All India 2011]

36. मानवता एव मानवस्य भूषणम् अस्ति। [Delhi 2015]

37. वानरस्य चपल + त्व बालेभ्यः रोचते। [Delhi 2015]

38. उपवनस्य रमणीयता मनोहरा अस्ति। [All India 2015]

39. सत्यभाषणस्य महत् + त्व कः न जानाति? [All India 2015]

40. परिश्रमस्य महत्त्वं को न जानाति? [Delhi 2016]

41. दुष्टानां मूर्ख + तल् दृष्ट्वा सर्वे उपहसन्ति। [Delhi 2016]

42. मनसः चञ्चल + तल् कः निरोद्धुं क्षमः? [All India 2016]

43. श्रद्धा + मतुप् लभते ज्ञानम्। [CBSE 2014]

44. कर्णः दानी आसीत्। [CBSE 2012]

45. अस्माकम् अर्धवर्ष + ठक् परीक्षा सितम्बरमासे भविष्यति। [CBSE 2014]

46. अधुना सामाजिकाः जनाः कति सन्ति। [CBSE 2012]

47. त्वम् आयुस् + मतुप् भव। [CBSE 2012]

48. योगिनां जीवनं धन्यम्। [CBSE 2014]

49. सदा नीति + ठक् आचरणं कुरु। [CBSE 2014]

50. मम साप्ताहिकः अवकाशः श्वः भविष्यति। [CBSE 2014]

51. ग्रामवासी स्वभावेन सरलः भवति। [CBSE 2014]

52. हनुमान् श्रीरामस्य अद्वितीयः भक्तः आसीत्। [CBSE 2014]

53. सुकरातः महान् दार्शनिकः अभवत्। [CBSE 2014]

54. श्रीकृष्णः एकः गुण + इन् नृपः महापुरुषः च आसीत्। [CBSE 2012]

55. मनसः चञ्चल + तल् निरोद्धुं कः क्षमः? [All India 2012]

56. क्रूर + तल् सदैव निन्दनीया एव भवति। [Delhi 2013]

57. परिश्रमस्य महत्त्वं सर्वे जानन्ति। [Delhi 2013, All India 2014]

58. प्रकृतेः रमणीय + तल् मनोरमा अस्ति। [Delhi 2014]

59. काव्यस्य मधुरत्वम् सहृदयाः एव जानन्ति। [Delhi 2014]

60. कविना प्रकृतेः सुन्दरतायाः वर्णनं कृतम्। [All India 2014]

61. मयूरस्य मनोहारिणी शोभा सर्वेभ्यः रोचते। [Delhi 2011]

62. सा स्वभावेन सरल + टाप् अस्ति। [Delhi 2011]

63. गायिका मधुरं गीतं गायति। [All India 2011]

64. अजा क्षेत्रं गच्छति। [All India 2011]

65. तपस्विन् + ङीप् गीतं गायति। [Delhi 2015]

66. प्रातःकालस्य मनोहारिन् + ङीप् गीतं गायति। [All India 2015]

67. एषा मम पुत्र + ङीप् विद्यालयं गच्छति। [Delhi 2016]

68. एषा मम पुत्री क्रीडति। [All India 2016]

69. कुमार + ङीप् वन्दना पुष्पगुच्छैः स्वागतं करोति। [Delhi 2013]

70. कीदृशी इयं रमणीया सृष्टिः। [All India 2013]

71. अस्याः अनुज + टाप् दीपिका अस्ति। [Delhi 2014]

72. एषा मम पुत्र + ङीप् क्रीडति। [All India 2014]

73. फल + इन् तरवः उद्याने सन्ति। [CBSE 2012]

74. दुःखिनाम् दुःखं ईश्वरः हरति। [CBSE 2016]

75. बालैः बसयानात् हस्तः बहिः न कर्तव्यः। [CBSE 2016]

76. सर्वे बालाः स्नेहेन पाल् + अनीयर्। [CBSE 2016]

77. मुख + ठक् कार्यम् शीघ्रं कुरु। [CBSE 2016]

78. श्रीमत्या बहुकार्यम् कृतम्। [CBSE 2016]

**2. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखित–** [CBSE 2018]

(क) आपद्गतेनापि एतद् अस्त्रं मानवेषु न प्र + युज् + तव्यत्।

(*i*) प्रयोजनीयम् (*ii*) प्रयोक्तव्यम् (*iii*) प्रयुक्तम्

(ख) भवान् जानाति द्रौणेः चपलाम् प्रकतिम्।

(*i*) चपल + टाप् (*ii*) चपल + ला (*iii*) चपल + आम्

(ग) यथासमयं सर्वेषां महत्त्वं विद्यते।

(*i*) महत् + त्व (*ii*) महान् + त्वम् (*iii*) महत् + तु

(घ) धैर्यवान् जनः लोके पराभवं न प्राप्नोति।

(*i*) धैर्य + मतुप् (*ii*) धैर्य + क्तवतु (*iii*) धैर्य + शानच्

❑❑

# ग4 अव्ययाः

**अव्यय शब्द** वे शब्द होते हैं जो सदा एक जैसे ही रहते हैं अर्थात् **जो शब्द तीनों लिंगों में, सभी वचनों में और सभी विभक्तियों में एक से बने रहते हैं, उन्हें 'अव्यय' शब्द कहते हैं;** जैसे–उच्चैः (ऊँचे), नीचैः (नीचे), शनैः (धीरे) इत्यादि। इनका रूप कभी नहीं बदलता। यह निम्नलिखित श्लोक से स्पष्ट है–

**सदृशं त्रिषु लिंगेषु, सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु, यन्नव्येति तदव्ययम्॥**

यद्यपि संस्कृत में अव्यय शब्दों की संख्या बहुत है, लेकिन **हम यहाँ पर केन्द्रीय माध्यमिक शिक्षा बोर्ड द्वारा पाठ्यक्रम में निर्धारित किए गए अव्ययों का ही अध्ययन करेंगे।**

| अव्यय | अर्थ |
|---|---|
| अचिरम् | शीघ्र ही |
| यावत् | जब तक |
| तावत् | तब तक |
| सहसा | अचानक |
| श्वः | आने वाला कल |
| ह्यः | बीता हुआ कल |
| शनैः शनैः | धीरे-धीरे |
| सम्प्रति/साम्प्रतम्/अधुना/इदानीम् | इस समय |
| अत्र | यहाँ |
| अत्यन्तम् | बहुत |
| अथ | आरम्भ या इसके बाद |
| अलम् | निषेधार्थक (योगे तृतीया वि.) पर्याप्त, समर्थ (योगे चतुर्थी वि.) |
| अद्य | आज |
| अथवा | या |
| अपि | भी |
| अन्यथा | नहीं तो |
| अतः | इसलिए |

| | |
|---|---|
| अतीव | बहुत अधिक |
| आम् | हाँ |
| इतस्ततः | इधर-उधर |
| इति | समाप्त, ऐसा |
| उच्चैः | जोर-जोर से, ऊँचे |
| एव | ही |
| एकदा | एक बार |
| एवम् | इस प्रकार, ऐसे |
| किम् | क्या |
| किन्तु | परन्तु, लेकिन |
| कदा | कब |
| कुतः | कहाँ से |
| कुत्र/क्व/क्वचित् | कहाँ |
| च | और |
| अभितः | दोनों ओर |
| परितः | चारों ओर |
| सर्वतः | सभी ओर |
| उभयतः | दोनों ओर |
| चेत् | यदि |
| चिरम् | देर से, देर तक |
| तत्र | वहाँ |
| इतः | इधर से, यहाँ से |
| ततः | उसके बाद, वहाँ से |
| तथापि | फिर भी |
| तदा, तदानीम् | तब |
| तर्हि | तो |
| तु | तो |
| तावत् | तब तक |
| तूष्णीम् | चुप |
| दिवा | दिन |
| न | नहीं |

| | |
|---|---|
| नीचैः | नीचे |
| नूनम् | निश्चय ही |
| नो चेत् | नहीं तो |
| पुनः | फिर |
| प्रातः | सवेरे |
| पश्चात् | बाद |
| प्रभृति | से, लेकर |
| परन्तु | किन्तु, लेकिन |
| पुरा | पुराने समय में, पहले |
| सायम् | शाम |
| श्वः | कल (आने वाला) |
| ह्यः | कल (बीता हुआ) |
| सह | साथ |
| स्वयम् | अपने आप |
| सहसा | अचानक |
| स्म | था, थी, थे |
| सर्वत्र | सब जगह |
| अथ किम् | और क्या |
| तथा | वैसे |
| परस्परम् | आपस में |
| बहिः | बाहर |
| बहुधा | अक्सर |
| बाढम् | हाँ |
| मा | नहीं |
| मुहुर्मुहुः, भूयः, वारं, वारम् | बार-बार |
| यत् | कि |
| यत्र | जहाँ |
| यदि | अगर |
| यद्यपि | अगर |
| यावत् | जब तक |
| यतः | जहाँ से |

| | |
|---|---|
| यदा | जब |
| वा | या/ अथवा |
| विना | बिना |
| वृथा | व्यर्थ |
| शनैः | धीरे |
| सर्वदा, सदा, सदैव | नित्य |
| हि/यतः/यतोहि | क्योंकि |
| खलु | निश्चय ही |
| ईषत् | थोड़ा ही |
| जातु | कभी |
| धिक् | धिक्कार |
| नक्तम् | रात |
| प्रसह्य | बलात् |
| नमः | नमस्कार, प्रणाम |
| पुरः, पुरस्तात्, पुरतः | सामने |

**वाक्येषु केषाञ्चित् अव्ययपदानां प्रयोगान् पश्यत–**

कच्छपः **शनैः शनैः** चलति।

**अचिरं** गृहं गच्छ।

अहं **श्वः** वाराणसीं गमिष्यामि।

**ह्यः** मम गृहे उत्सवः आसीत्।

**सहसा** निर्णयः न करणीयः।

**इदानीम्** अहं संस्कृतं पठामि।

**यद्यपि** अद्य अवकाशः अस्ति तथापि अहं कार्यमुक्तः नास्मि।

**अथ** रामायणकथा आरभ्यते।

**अत्र** आगच्छ।

अहम् **कुत्रापि** न गमिष्यामि।

कुक्कुरः **इतस्ततः** भ्रमति।

**यत्र-यत्र** धूमः **तत्र-तत्र** अग्निः।

**अधुना** गल्पं न करणीयम्।

**नक्तम्** दधि न भुञ्जीत।

कक्षायां **तूष्णीम्** तिष्ठ।

**पुरा** अशोकः राजा आसीत्।

तौ **परस्परम्** आलपतः।

**अद्य प्रभृति** अहं धूम्रपानं न करिष्यामि।

**शीघ्रं** कार्यं समापय **अन्यथा** विलम्बः भविष्यति।

**वृथा** कलहम् **मा** कुरु।

**यदा** अहं गमिष्यामि तदा सः **अत्र** आगमिष्यति।

**ईषत्** हसित्वा सः तस्य उपहासं कृतवान्।

अहम् त्वाम् **भूयोभूयः** नमामि।

सः **मुहुर्मुहुः** किम् पश्यति?

यहाँ यह भी ध्यान देने योग्य है कि यकार एवं तकार वाले, जैसे कि–यद्यपि तथापि, यथा-तथा, यदि-तर्हि, यत्र-तत्र, यावत्-तावत्, यदा-तदा इत्यादि अव्ययों का वाक्यों में प्रयोग करते हुए अधिकतर प्रयोग एक साथ ही करना चाहिए, अन्यथा वाक्य अपूर्ण ही रहता है।

## व्याकरण वीथिः पुस्तकात्

**1. समुचितैः अव्ययैः ( मञ्जूषातः गृहीत्वा ) रिक्तस्थानानि पूरयत–**

(*i*) सः ................................ वनं गतवान्।

(*ii*) सः ................................ गच्छति?

(*iii*) गजः ................................ चलति।

(*iv*) सः ................................ स्वपिति।

(*v*) सिंहः ................................ गर्जति।

(*vi*) सः ................................ विजेष्यते।

(*vii*) परिश्रमं कुरु, ................................ अनुत्तीर्णः भविष्यसि।

(*viii*) गृहात् ................................ मा गच्छ।

(*ix*) सः ................................ माम् उद्वेजयति।

(*x*) कोलाहलं ................................ कुरु।

**मञ्जूषा–**

| |
|---|
| मा, बहिः, मुहुर्मुहुः, अन्यथा, एकदा, शनैः शनैः, चिरम्, नूनम्, उच्चैः, कुत्र |

**उत्तराणि–** (*i*) एकदा (*ii*) कुत्र (*iii*) शनैः शनैः (*iv*) चिरम् (*v*) उच्चैः (*vi*) नूनम् (*vii*) अन्यथा (*viii*) बहिः (*ix*) मुहुर्मुहुः (*x*) मा

2. अधोलिखितेषु वाक्येषु अव्ययपदं चित्वा लिखत–

(*i*) यावत् परीक्षाकालः नायाति तावत् परिश्रमं कुरु। ..............................

(*ii*) अस्माभिः सर्वदा सत्यं वक्तव्यम्। ..............................

(*iii*) कालः वृथा न यापनीयः। ..............................

(*iv*) अहम् सम्प्रति गृहं गन्तुम् इच्छामि। ..............................

(*v*) त्वम् कुतः समायातः? ..............................

(*vi*) अहम् श्वः ग्रामं गमिष्यामि। ..............................

(*vii*) तौ परस्परम् आलपतः। ..............................

(*viii*) अद्यप्रभृति अहं धूम्रपानं न करिष्यामि। ..............................

(*ix*) धनं विना जीवनं वृथा भवति। ..............................

(*x*) अथ रामायणकथा आरभ्यते। ..............................

**उत्तराणि–** (*i*) यावत्, तावत् (*ii*) सर्वदा (*iii*) वृथा (*iv*) सम्प्रति (*v*) कुतः (*vi*) श्वः (*vii*) परस्परम् (*viii*) अद्य प्रभृति (*ix*) विना, वृथा (*x*) अथ

3. कोष्ठकेभ्यः शुद्धम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत–

(*i*) अहम् .............................. भ्रमणाय गमिष्यामि। (श्वः / ह्यः)

(*ii*) त्वम् कस्य .............................. गच्छसि? (परितः / पुरतः)

(*iii*) विद्यालयम् .............................. उद्यानम् अस्ति। (परितः/एव)

(*iv*) सः यदा आगमिष्यति .............................. अहं गमिष्यामि। (तदैव / तथैव)

(*v*) परिश्रमं कुरु .............................. अनुत्तीर्णः भविष्यसि। (सर्वदा / अन्यथा)

(*vi*) त्वम् .............................. कुत्र गच्छसि? (जातु / साम्प्रतम्)

(*vii*) यूयम् .............................. ध्यानेन पठत। (बाढम्/नूनम्)

(*viii*) श्यामः .............................. पठति श्यामा न। (एव/विना)

(*ix*) छात्राः पुस्तकम् .............................. न शोभन्ते। (यदि / विना)

(*x*) यथा वप्स्यसि .............................. फलं प्राप्स्यसि। (तदा / तथा)

**उत्तराणि–** (*i*) श्वः (*ii*) पुरतः (*iii*) परितः (*iv*) तदैव (*v*) अन्यथा (*vi*) साम्प्रतम् (*vii*) नूनम् (*viii*) एव (*ix*) विना (*x*) तथा

## अभ्यासः

1. प्रदत्तेषु उत्तरेषु यत् उत्तरम् शुद्धम् अस्ति तत् विकल्पात् चीयताम्।
(दिए गए उत्तरों में से जो उत्तर शुद्ध है उसे विकल्प से चुनिए। Choose the appropriate answer from the options given below.)

1. अहम् तं जानामि। एषः मालाकारः ........ अस्ति।
(क) अपि (ख) एव (ग) कदा (घ) पुरा।
2. पश्य, उपवने बालाः ........ धावन्ति।
(क) शनैः (ख) नीचैः (ग) शीघ्रम् (घ) इतस्ततः।
3. अहम् पश्यामि यद् वृद्धाः तु ........ चलन्ति।
(क) शनैः (ख) शीघ्रम् (ग) नीचैः (घ) नूनम्।
4. पश्य, तत्र महिलाः ........ भ्रमन्ति।
(क) अपि (ख) एव (ग) न (घ) वृथा।
5. त्वम् ........ कुक्कुरो भव।
(क) सदा (ख) पुनः (ग) कदापि (घ) अपि।
6. तत्र वृक्षेषु वानराः ........ कूर्दन्ति।
(क) इतस्ततः (ख) सर्वत्र (ग) इत्यत्र (घ) इदानीम्।
7. मूर्खाः जनाः संसारे ........ जल्पन्ति।
(क) एव (ख) बहुधा (ग) अपि (घ) वृथा।
8. पश्य, ........ मयूराः अपि नृत्यन्ति परं तत्र शुकाः वदन्ति।
(क) कदा (ख) अत्र (ग) तदा (घ) यथा।
9. वृक्ष शाखासु कोकिलाः ........ मधुरं गायन्ति।
(क) अपि (ख) नैव (ग) ह्यः (घ) एव।
10. ........ गृहं गच्छावः श्वः पुनः आगमिष्यावः।
(क) ह्यः (ख) श्वः (ग) अधुना (घ) वृथा।
11. यत्र कमलानि ........ भ्रमराः।
(क) तत्र (ख) यत्र-तत्र (ग) अत्र-तत्र (घ) यथा।
12. यथा राजा ........ प्रजा।
(क) यथा-तथा (ख) तथा (ग) तथा-यथा (घ) यत्र।
13. अहम् ........ तत्र गमिष्यामि।
(क) कदा (ख) अपि (ग) ह्यः (घ) पुरा।
14. अहम् ........ तत्र न अगच्छम्।
(क) श्वः (ख) अधुना (ग) इव (घ) सहसा।
15. ते ........ एव अत्रागमिष्यन्ति।
(क) अधुना (ख) ह्यः (ग) श्वः (घ) नूनम्।
16. ........ एकं विशालं भवनम् अस्ति।
(क) तत्र (ख) उपरि (ग) नीचैः (घ) अत्र-तत्र।

17. .............. एक: जलाशय: आसीत्।
(क) उपरि (ख) नीचै: (ग) अत्र (घ) पुरा।

18. त्वम् .............. पठ।
(क) अपि (ख) तदा (ग) न (घ) नूनम्।

19. अहम् विद्यालयम् .............. गमिष्यामि।
(क) न (ख) कदा (ग) किम् (घ) नूनम्।

20. छात्रा: .............. किं करिष्यन्ति?
(क) ह्य: (ख) सहसा (ग) इदानीम् (घ) वृथा।

21. .............. अशोक: नाम महान् सम्राट् आसीत्।
(क) पुरा (ख) अधुना (ग) तदा (घ) कदा।

22. .............. ईश्वरभक्ता: तादृशा: न सन्ति।
(क) ह्य: (ख) अधुना (ग) श्व: (घ) शनै:।

23. .............. वर्षा भवति तथा एव कृषका: मोदन्ते।
(क) प्रात: (ख) यदा (ग) सदा (घ) यथा।

24. यथा देश: .............. वेश:।
(क) तदा (ख) यदा (ग) तथा (घ) तत्र।

25. ते पर्वतात् .............. न सन्ति।
(क) उपरि (ख) तत्र (ग) अध: (घ) उच्चै:।

26. विद्यालयस्य छात्रा: कथम् .............. धावन्ति?
(क) यथा-तथा (ख) बिना (ग) इतस्तत: (घ) अपि।

27. दुष्टा: .............. एव जल्पन्ति।
(क) वृथा (ख) इतस्तत: (ग) तत्र (घ) शनै:।

28. त्वमपि रामम् .............. भव।
(क) अधुना (ख) सहसा (ग) पुरा (घ) इव।

29. वृद्धा .............. स्वकार्याणि करोति।
(क) नूनम् (ख) शनै: (ग) एव (घ) इदानीम्।

30. संस्कारात् .............. जन: द्विज: उच्यते।
(क) एव (ख) अपि (ग) इव (घ) अत्र-तत्र।

31. राम: .............. एव तिष्ठति परं मोहन: तत्र गच्छति।
(क) यथा (ख) तथा (ग) अत्र (घ) तत्र।

32. .............. त्रेतायुगे क: मर्यादापुरुषोत्तम: बभूव?
(क) उच्चै: (ख) सहसा (ग) अपि (घ) पुरा।

33. चन्द्रगुप्त: सम्राट् चाणक्यं .............. किमपि न अकरोत्।
(क) पुरा (ख) विना (ग) इतस्तत: (घ) सहसा।

34. रात्रौ कुक्कुर: .............. धावन्ति।
(क) इतस्तत: (ख) विना (ग) पुरा (घ) नूनम्।

35. वेदमन्त्राणाम् उच्चारणम् .................... कर्तव्यम्।

(क) इव (ख) अपि (ग) एव (घ) उच्चैः।

36. यथा पिता पुत्रोऽपि .................... एव दृश्यते।

(क) तदा (ख) इतस्ततः (ग) तथा (घ) इदानीम्।

37. .................... त्वम् स्वकार्यं कुरु।

(क) विना (ख) इदानीम् (ग) वृथा (घ) शनैः।

38. इदं कार्यं त्वया .................... कर्तव्यम्।

(क) एव (ख) विना (ग) नूनम् (घ) वृथा।

39. अभिमन्युः तदा .................... अवदत्।

(क) एव (ख) कथम् (ग) इव (घ) अधुना।

40. दुष्टैः सह समयं .................... न करणीयम्।

(क) विना (ख) अधुना (ग) सहसा (घ) वृथा।

41. अहम् .................... तव स्वामी अतः ममाज्ञा पालनीया।

(क) अपि (ख) सहसा (ग) एव (घ) वृथा।

42. चिकित्सालये .................... न वक्तव्यम्।

(क) उच्चैः (ख) वृथा (ग) एव (घ) सम्प्रति।

43. मम मातामही .................... वृद्धा अस्ति।

(क) शनैः (ख) अपि (ग) उच्चैः (घ) वृथा।

44. दुष्टानां जन्म .................... वृथा भवति।

(क) एव (ख) शनैः (ग) इव (घ) सहसा।

45. .................... मया पित्राज्ञा पालनीया।

(क) इदानीम् (ख) पुरा (ग) यथा (घ) तत्र।

46. जगति .................... पितरौ कुरुतः .................... एव सन्ततयः कुर्वन्ति।

(क) यथा-तथा (ख) अत्र-तत्र (ग) कुत्र-यत्र (घ) कुतः-ततः।

47. .................... विदधीत न क्रियाम्।

(क) वृथा (ख) सहसा (ग) इतस्ततः (घ) पुरा।

48. कीर्तनं कदापि .................... न करणीयम्।

(क) पुरा (ख) एव (ग) शनैः (घ) अधुना।

49. ईश्वरः यत् करोति .................... शोभनं करोति।

(क) वृथा (ख) शनैः (ग) सहसा (घ) नूनम्।

50. .................... मनुः महर्षिः यत् कथितम् तत् एव मनुस्मृतिः कथ्यते।

(क) पुरा (ख) अधुना (ग) शनैः (घ) नूनम्।

51. .................... तु परं शान्तिः .................... च कोलाहलम् एव श्रूयते।

(क) यथा-तथा (ख) अत्र-तत्र (ग) यत्-तत् (घ) यादृशं-तादृशं।

52. जीवः जीवस्य .................... भोजनं भवति।

(क) एव (ख) विना (ग) अपि (घ) वृथा।

53. पुत्र! ........................ उत्थाय पठ।
(क) इतस्ततः (ख) कदापि (ग) अधुना (घ) वृथा।

54. छात्राणां कृते ........................ कार्यं नोचितम्।
(क) उच्चैः (ख) शनैः (ग) अधुना (घ) सहसा।

55. सर्वे जीवाः मिलित्वा ........................ मोदन्ते।
(क) इदानीम् (ख) पुरा (ग) शनैः (घ) उच्चैः।

56. तस्य बदनं चन्दनम् ........................ सुगन्धितम्।
(क) वृथा (ख) शनैः (ग) इव (घ) नूनम्।

57. छात्राः सम्प्रति ........................ कथं भ्रमन्ति?
(क) अधुना (ख) इतस्ततः (ग) पुरा (घ) शनैः।

58. द्वारपालः ........................ अपि तत्र तिष्ठति।
(क) अधुना (ख) नीचैः (ग) शनैः (घ) उच्चैः।

59. ईश्वरेण दत्तम् इदं जीवनं ........................ न कर्तव्यम्।
(क) शनैः (ख) उच्चैः (ग) नूनम् (घ) वृथा।

60. अलङ्कारैः विभूषितः ........................ गुणहीनः न शोभते।
(क) अपि (ख) एवम् (ग) पुरा (घ) एव।

61. ........................ तुभ्यं रोचते त्वं तथैव कुरु।
(क) तत्र (ख) अत्र (ग) यथा (घ) परम्।

62. जनानां समृद्धिः ........................ संवर्धिता वर्तते।
(क) अधुना (ख) ह्यः (ग) पुरा (घ) इव।

63. यात्रायां ........................ कोलाहलं न कर्तव्यम्।
(क) सहसा (ख) वृथा (ग) इव (घ) शनैः।

64. ........................ भारतम् अतीव समृद्धम् आसीत्।
(क) अधुना (ख) इतस्ततः (ग) पुरा (घ) शनैः।

65. वर्तमानकाले ........................ सर्वत्र विलासिता एव दृश्यते।
(क) यथा-तथा (ख) सम्प्रति (ग) अत्र-तत्र (घ) शनैः।

66. त्वम् ........................ बन्धुः च सखा त्वमेव।
(क) एव (ख) अपि (ग) नूनम् (घ) सहसा।

67. धनाभावे रोदनं ........................ भवति।
(क) वृथा (ख) एव (ग) नूनम् (घ) इतस्ततः।

68. शनैः कन्थाः ........................ पन्थाः शनैः पर्वत लङ्घनम्।
(क) अधुना (ख) उच्चैः (ग) विना (घ) शनैः।

69. कर्मणः परस्तात् ........................ समृद्धिः आगच्छति।
(क) सम्प्रति (ख) नूनम् (ग) वृथा (घ) पुरा।

70. दैत्यानाम् ........................ पर्वताः दूरतः एव भयातुरम् कुर्वन्ति।
(क) शनैः (ख) सहसा (ग) इव (घ) इदानीम्।

71. मधुरा दिव्या वाणी .................. गीर्वाण कथ्यते।

(क) एव (ख) नूनम् (ग) पुरा (घ) इव।

72. भारतभूमि: .................. दर्शनीया अस्ति।

(क) सम्प्रति (ख) इतस्ततः (ग) नूनम् (घ) विना।

73. .................. कृतं कार्यं नूनं कष्टकरं भवति।

(क) शनैः (ख) सहसा (ग) इव (घ) पुरा।

74. श्रीरामम् उपेत्य भरतः .................. अवदत्।

(क) अपि (ख) वृथा (ग) उच्चैः (घ) इदानीम्।

75. लङ्लकारस्य प्रयोगः भूतकाले .................. भवति।

(क) अधुना (ख) विना (ग) एव (घ) अपि।

76. श्रीरामः यथा आदर्शपुत्रः आसीत् .................. एव आदर्शः पिता अपि।

(क) तत्र (ख) तथा (ग) यत्र (घ) सहसा।

77. संसारे सूर्यः .................. जीवनाधारः वर्तते।

(क) अधुना (ख) एव (ग) पुरा (घ) अपि।

78. .................. सूर्यः जगत् प्रकाशयति .................. चन्द्रः अपि।

(क) अत्र-तत्र (ख) यथा-तथा (ग) यत्र-तत्र (घ) इतः - ततः।

79. त्वया .................. कोलाहलं परित्यज्य सुप्तव्यम्।

(क) अधुना (ख) शनैः (ग) उच्चैः (घ) सहसा।

80. .................. सतयुगे के महापुरुषाः अभवन् वयं न जानीमहे।

(क) अधुना (ख) इदानीम् (ग) नूनम् (घ) पुरा।

81. प्राणं .................. कथं जीवनम्?

(क) शनैः (ख) विना (ग) इदानीम् (घ) वृथा।

82. क्रीडाङ्गणे .................. रामः तत्र कृष्णः वर्तते।

(क) तथा (ख) यथा (ग) यथा-तथा (घ) यत्र।

83. स्वर्णशलाकाम् .................. तत् विभाति।

(क) इव (ख) पुरा (ग) इदानीम् (घ) नूनम्।

84. रात्रौ कुक्कुराः .................. भषन्ते।

(क) पुरा (ख) इतस्ततः (ग) इदानीम् (घ) विना।

85. .................. कलियुगस्य सप्तविंशतितमा चतुर्युगी वर्तते।

(क) पुरा (ख) यथा (ग) तथा (घ) इदानीम्।

86. वर्षायां मेघाः .................. गर्जन्ति।

(क) नीचैः (ख) उच्चैः (ग) अधुना (घ) इव।

87. छात्रैः वृद्धाः इव .................. न चलनीयम्।

(क) वृथा (ख) शनैः (ग) इदानीम् (घ) विना।

88. .................. त्वम् बुद्धिमान् असि।

(क) नूनम् (ख) शनैः (ग) उच्चैः (घ) पुरा।

89. .................... श्रीकृष्णः .................... एव बलरामोऽपि आसीत्।

(क) यत्र-तत्र (ख) तत्र-यत्र (ग) यथा-तथा (घ) यावत्-तावत्।

90. अर्जुनेन सह कृष्णः .................... आसीत्।

(क) अपि (ख) नूनम् (ग) वृथा (घ) विना।

91. परीक्षाकाले .................... शीतः भविष्यति एव।

(क) अधुना (ख) इतस्ततः (ग) अपि (घ) इव।

92. रात्रौ तु चन्द्रः वर्तते .................... न।

(क) एव (ख) नूनम् (ग) इदानीम् (घ) सम्प्रति।

93. त्वाम् .................... को उद्धरिष्यति माम्?

(क) एव (ख) विना (ग) इतस्ततः (घ) पुरा।

94. प्रातः उद्याने .................... न चलितव्यम्।

(क) उच्चैः (ख) नूनम् (ग) शनैः (घ) इदानीम्।

95. धरायाम् .................... सर्वे जीवाः संवसन्ति।

(क) अपि (ख) एव (ग) अत्र-तत्र (घ) इदानीम्।

96. सहसा उत्थाय भीमः .................... अवदत्।

(क) शनैः (ख) एव (ग) उच्चैः (घ) विना।

97. केनचिदपि समयं .................... न कर्तव्यम्।

(क) नूनम् (ख) वृथा (ग) विना (घ) सहसा।

98. ईश! .................... त्वमेव मम पिता वर्तसे।

(क) वृथा (ख) पुरा (ग) अपि (घ) नूनम्।

99. .................... वृथा भ्रमतां छात्राणां संस्काराः हसन्ति।

(क) इतस्ततः (ख) नूनम् (ग) सहसा (घ) शनैः।

100. .................... देवासुरसंग्रामोऽभवत्।

(क) सम्प्रति (ख) इदानीम् (ग) पुरा (घ) अधुना।

101. .................... तु जीवो एव जीवानां भोजनं वर्तते।

(क) अधुना (ख) पुरा (ग) इतस्ततः (घ) सहसा।

102. त्वम् .................... एव कुरु यथा तव आचार्यः वदति।

(क) तथा (ख) यत्र (ग) तत्र (घ) यावत्।

**2. मञ्जूषायां प्रदत्तैः अव्ययैः सहायतया वाक्यानां रिक्तस्थानानि पूरयत।**

**(मञ्जूषा में दिए गए अव्ययों की सहायता से वाक्यों के रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with the help of indeclinables given in the box.)**

1. (क) तस्याः मुखम् चन्द्रम् इव .................... न प्रतीयते। (ख) .................... रामकथा समाप्यते।

(ग) रामः श्यामः च .................... पठतः? (घ) .................... कः तिष्ठति?

(ङ) वृथा .................... वद। (च) तेन .................... स्वपरीक्षा उत्तीर्णा? ज्ञायताम्।

| **मञ्जूषा**—बहिः, कदा, मा, कुत्र, कदापि, इति। |
|---|

2. (क) त्वम् .................... यत् कथयसि तत् एव अहम् करिष्यामि। (ख) .................... रामः अवदत्।

(ग) .................... असत्यं मा वद। (घ) सः .................... एवात्र आगच्छति।

(ङ) सः .................. अत्र आगमिष्यति? (च) त्वम् इतस्ततः .................. गच्छ।

**मञ्जूषा**—कदा, कदापि, मा, इति, सम्प्रति, यदा-कदा।

3. (क) त्वम् .................. तेन सह गच्छ। (ख) तस्य मुखम् कमलम् इव .................. नास्ति।

(ग) त्वम् दिल्लीनगरम् .................. गमिष्यसि? (घ) यत् वस्तु लाभदायकम् .................. तत् एव आनय।

(ङ) अहम् .................. पठिष्यामि। (च) त्वम् .................. गच्छ।

**मञ्जूषा**—सम्प्रति, इति, बहिः, कदा, कदापि, श्वः।

4. (क) सः .................. एव अत्र आगच्छत्।

(ख) .................. अहम् आगमिष्यामि तावत् त्वम् अत्र उपविश।

(ग) अहम् तु पठामि परं त्वम् .................. न पठसि?

(घ) श्यामः अवदत् .................. त्वं यत् पश्यसि तत् एव वद।

(ङ) त्वम् .................. पठिष्यसि?

(च) .................. आगमनम् अत्र भवताम्?

**मञ्जूषा**—किमर्थम्, यावत्, कुतः, ह्यः, यत्, कदा।

5. (क) कुम्भं करोति .................. कुम्भकारः। (ख) असत्यं .................. वद।

(ग) त्वया .................. आयातः? (घ) अहम् .................. आगच्छम्? इति न जानामि।

(ङ) .................. अहम् लिखामि तावत् त्वम् पठ। (च) पयः ददाति .................. पयोदः।

**मञ्जूषा**—इति, मा, यावत्, कदा, कुतः, इति।

6. (क) सः आत्मानम् रामः .................. मानयति। (ख) एषः सिंहः .................. आगच्छत्?

(ग) विद्यालयात् .................. मा गच्छ। (घ) .................. त्वम् कुत्र आसीः?

(ङ) .................. इतस्ततः भ्रमणं मा कुरु। (च) सभायाम् .................. वक्तव्यम्।

**मञ्जूषा**—इति, सम्प्रति, कुतः, बहिः, ह्यः, मा।

7. (क) अहम् .................. विद्यालयं न आगमिष्यामि। (ख) .................. अवकाशः भविष्यति।

(ग) मृषा .................. वद। (घ) धनात् विना .................. सुखम्?

(ङ) त्वम् तत्र .................. गच्छसि? (च) मम मित्रं .................. आगच्छत्।

**मञ्जूषा**—किमर्थम्, श्वः, कुतः, मा, ह्यः, श्वः।

8. (क) सः .................. आगमिष्यति। (ख) त्वं .................. मृषा मा वद।

(ग) ग्रामात् .................. देवालयः अस्ति। (घ) त्वम् असत्यं .................. वद।

(ङ) ………… मम अध्यापक: न अपाठयत्। (च) सोऽवदत् ………… पुरा रक्तदुर्गं भव्यम् आसीत्।

**मञ्जूषा**—श्वः, कदापि, ह्यः, यत्, मा, बहिः।

9. (क) विद्यालये ………… वनमहोत्सव: मान्यते।
(ख) छात्रै: गृहेभ्य: ………… एक: पादप: आनीत:।
(ग) छात्रै: आनीतेषु पादपेषु फलिन: वृक्षा: विद्यायलयात् ………… रोपणीया:।
(घ) ………… वृक्षा: सन्ति तत्र दुर्दिवसा: …………?
(ङ) एतेषु वृक्षेषु फलानि ………… न आगमिष्यन्ति।
(च) ………… केचन अन्ये एव छात्रा: अपि पादपान् आनेष्यन्ति।

**मञ्जूषा**—यदा-कदा, कदापि, श्वः, ह्यः, यत्र-कुत्र, बहिः।

10. (क) ………… मम मातुल: काश्मीरात् आगमिष्यति।
(ख) असत्यं ………… वद।
(ग) ………… स्थास्यन्ति गिरय: तावत् रामायणी कथा प्रचरिष्यति।
(घ) कच्छप: ………… न धावति।
(ङ) अस्माकं जीवनं ………… वर्तते?
(च) ………… अवश्यं चिन्तनीयम्।

**मञ्जूषा**—यावत्, श्वः, मा, कदापि, इति, किमर्थम्।

11. (क) त्वम् एवं ………… वद। (ख) स: ………… असत्यं न अवदत्।
(ग) ………… शीतकालो वर्तते। (घ) ………… मम परीक्षा भविष्यति।
(ङ) स: क्रोशं ………… अचलत्। (च) स: ………… पठति इति न ज्ञायते।

**मञ्जूषा**—यावत्, कदापि, कदा, श्वः मा, सम्प्रति।

(क) सा (ख) तत् (ग) ता: (घ) ते

43. त्वया सह तव पिता अपि **गच्छन्ति**।

(क) गच्छसि (ख) गच्छामि (ग) गच्छथ (घ) गच्छति

44. किम् त्वम् तत्र श्व: **गच्छति**?

(क) गमिष्यति (ख) गमिष्यन्ति (ग) गमिष्यसि (घ) गमिष्यथ

45. स: अपि जलं **पास्यसि**।

(क) पास्यति (ख) पास्यत: (ग) पास्यथ: (घ) पास्यन्ति

46. कुतुबमीनारे वयम् बहून् **जना:** अपश्याम।

(क) जनान् (ख) जनै: (ग) जन: (घ) जनम्

47. तेषु **अनेका:** उपरि गच्छन्ति स्म।

(क) अनेकान् (ख) अनेके (ग) अनेक: (घ) अनेकेन

48. वयम् एकस्य छायायुक्तस्य वृक्षस्य अध: भोजनं **अकुर्वन्**।

(क) अकरवम् (ख) अकरवाव (ग) अकरवाम (घ) अकरो:

49. **माम्** कुतुबमीनार: अतीव अरोचत।

(क) मम (ख) मत् (ग) मया (घ) मह्यम्

50. अहम् पत्रवाहक: **अस्ति**।

(क) असि (ख) अस्मि (ग) स्थ (घ) स्त:

**2. वाक्येषु स्थूलपदानि शुद्धानि कृत्वा वाक्यनि पुन: लिखत–**

(निम्न वाक्यों में मोटे शब्दों को शुद्ध करके वाक्य फिर से लिखिए। Correct the bold words in the following sentences.)

1. जनेभ्य: प्रतिदिनम् **आगता:** पत्राणि वितरामि।
2. ते पत्रेषु **साक्षात्कारपत्र:**, परीक्षाफलं, नियुक्तिपत्रम् अपि आप्नुवन्ति।
3. अहम् **स्वकर्मं** सदा निष्ठया करोमि।
4. ता: बालिका: **गृहस्य** बहि: क्रीडन्ति।
5. वयम् सर्वे प्रात: उद्यानं **गच्छन्ति**।

6. तत्र **अनेकाः** पुष्पाणि भवन्ति।
7. पुष्पैः वायुः **सुरभिताः** भवति।
8. केचन **जनः** तत्र व्यायामम् अपि कुर्वन्ति।
9. एकस्य श्रेष्ठिनः कोषे रत्नानि दृष्ट्वा अभ्यागतः संन्यासी अवदत्—भोः! धनस्य **उपयोगाः** जनहिताय भवेत्।
10. भवान् निर्धनेभ्यः धनं **यच्छन्तु,** अशिक्षितानां कृते।
11. **अनेकानि** विद्यालयान् चालय येन।
12. सर्वे जनाः **शिक्षितः** भवेयुः।
13. एकस्मिन् ग्रामे रामः च श्यामः च द्वे **मित्रौ** आस्ताम्।
14. तयोः रामः बहूनां दीनानां सहायतां **कुर्वन्ति स्म**।
15. श्यामः च **तस्य** सह सहयोगं करोति स्म।
16. तयोः **अपूर्वं** मैत्रीं दृष्ट्वा जनाः कथयन्ति स्म—अहो धन्यौ एतौ सुहृदौ।
17. वयम् नित्यम् अग्रजानां चरणौ **स्पृशन्ति**।
18. तेषाम् च आशीर्वादाः अस्मान् **रक्षति**।
19. ये **शिष्यौ** गुरुजनानां चरणौ स्पृशन्ति।
20. तेषाम् आयुः **वर्धन्ते**।
21. अहम् प्रतिदिनं मातापितरौ **प्रणमति**।
22. तौ च **माम्** आशीर्वादं यच्छतः।
23. भवान् सुखी **भवन्तु**।
24. सर्वेषां **दीनजनस्य** सेवां करोतु इति।
25. रात्रौ सर्वे निद्रामग्नाः **आसीत्**।
26. **एकं** शब्दः श्रुतः ढम्ढम् इति। कश्चित् चौरः भवेत् इति।
27. वयम् **भीतः** परन्तु वस्तुतः पाकशालायाम्।
28. **एकः** बिडाली पात्रम् अपातयत्।
29. वयम् प्रतिदिनं भ्रमणाय **गच्छन्ति**।
30. उद्याने **अनेकाः** जनाः व्यायामं कुर्वन्ति।
31. मम **मित्रः** प्रतिदिनं-
32. **रुग्णान्** तत्र निश्शुल्कम् औषधं प्रयच्छति।
33. ताः बालिकाः कुत्र **गच्छति**?
34. अहम् अपि पत्रं **लिखसि**।
35. किम् यूयम् श्वः तत्र **पठथ**?
36. सा **बालः** समाचारपत्रं पठति।
37. ते अत्र वृक्षसेचनम् **अभिनयति**।
38. **ताः** च नाटकस्य कथां शृणुतः।
39. निदेशकः पूर्वमेव मञ्चस्य निर्माणम् **अकरोः**।
40. वयम् दर्शकाः/द्रष्टारः **भविष्यामि**।

41. वृक्षे **चतस्रः** फलानि सन्ति।

42. **द्वे** बालकौ पठतः।

43. वयम् श्वः प्रदर्शनीं **गच्छामः**।

44. यूयम् तस्मै फलानि **यच्छिष्यथ**।

45. सा कन्या **आयुष्मान्** भवतु।

46. छात्रः **श्वः** स्वपाठम् अपठत्।

**3. विकल्पेभ्यः शुद्धम् उत्तरं चित्वा रिक्तस्थानानि सम्पूरयत।**

(विकल्पों से शुद्ध उत्तर चुनकर खाली स्थान भरें। **Fill in the blanks by correct words whoose given below.**)

1. एकः पथिकः ह्यः नगरम् ...................... ।

 (क) गच्छन्ति (ख) गमिष्यति (ग) अगच्छत् (घ) गच्छतु

2. तत्र सः बहूनि ...................... दृष्ट्वा चकितः जातः।

 (क) भवनानि (ख) भवनं (ग) भवनान् (घ) भवनः

3. तस्य ...................... अपि तत्र तेन सह गतवान्। सः अवदत् –

 (क) मित्राणि (ख) मित्रम् (ग) मित्रे (घ) मित्रेण

4. अहो विडम्बना! नगरेषु एकतः धनप्रदर्शनम् अस्ति अपरतः नग्नाः दरिद्राः क्षुधया पीडिताः च ...................... ।

 (क) स्थः (ख) अस्मि (ग) सन्ति (घ) स्मः

5. अहम् एकः पत्रवाहकः ...................... ।

 (क) अस्मि (ख) असि (ग) सन्ति (घ) स्मः

6. जनेभ्यः प्रतिदिनम् ...................... पत्राणि वितरामि।

 (क) आगतान् (ख) आगता (ग) आगतानि (घ) आगताः

7. ते पत्राणि प्राप्य न केवलं निजवृत्तानि ......................;

 (क) अवागच्छत् (ख) अवगच्छन्ति (ग) अवागच्छः (घ) अवागच्छतम्

8. अपितु साक्षात्कारपत्रम्, नियुक्तिपत्रं, परीक्षाफलम् अपि ...................... ।

 (क) प्राप्तुवन् (ख) प्राप्नुताम् (ग) प्राप्नोत् (घ) प्राप्नुवन्ति

9. अहम् स्वकर्म सदा निष्ठया ...................... ।

 (क) करोमि (ख) करोति (ग) करोषि (घ) कुर्वन्ति

10. जन्त्वागारे बहवः ...................... आसन्।

 (क) सिंहः (ख) सिंहम् (ग) सिंहाः (घ) सिंहान्

11. तत्र ...................... अपि वृक्षात् वृक्षं कूर्दन्ते स्म।

 (क) वानरं (ख) वानरान् (ग) वानरैः (घ) वानराः

12. एक: दुष्ट: बालक: ...................... वानरान् अताडयत्।

(क) पाषाण-खण्डै: (ख) पाषाण-खण्डेभ्य: (ग) पाषाण-खण्डा: (घ) पाषाण-खण्ड:

13. तदैव तत्र रक्षक: आगत्य अवदत्—भो:! एतेषु अपि प्राणा: सन्ति अत: त्वम् एतान् मा ......................।

(क) ताडय (ख) ताडयत (ग) ताडयतु (घ) ताडयानि

14. अहम् ...................... पञ्चाशत् वर्षीया महिला अस्मि।

(क) एकम् (ख) एकाम् (ग) एक: (घ) एका

15. अहम् किञ्चित् संस्कृतम् ......................।

(क) अवगच्छामि (ख) अवगच्छति (ग) अवगच्छसि (घ) अवगच्छन्ति

16. इदानीं यदा ...................... अपि संस्कृतभाषां वदन्ति।

(क) बाल: (ख) बालम् (ग) बाला: (घ) बालै:

17. तदा अहम् अति ...................... भवामि।

(क) प्रसन्न: (ख) प्रसन्ना (ग) प्रसन्नं (घ) प्रसन्ना:

18. **राधिका**—अयि ...................... अद्य मम विद्यालये वार्षिकोत्सव: अस्ति।

(क) लता: ! (ख) लते! (ग) लताम्! (घ) लता!

19. अत: अहम् ...................... सह विद्यालयं गमिष्यामि।

(क) स्वपितु: (ख) स्वपित्रा (ग) स्वपित: (घ) स्वपिता

20. **लता**—राधिके! किम् तत्र तव ...................... अपि भविष्यन्ति?

(क) मित्रम् (ख) मित्रा: (ग) मित्राणि (घ) मित्रै:

21. **राधिका**—आम्। तत्र अहम् पुरस्कारम् अपि ......................।

(क) लप्स्यते (ख) लप्स्यन्ते (ग) लप्स्यते (घ) लप्स्ये

**4. कोष्ठकेषु प्रदत्तानाम् मूल पदानाम्/धातूनाम् उचितानि पदानि निर्मित्य वाक्यपूर्तिं कुरुत–**
(कोष्ठक में दिए गए मूल पदों/धातुओं के उचित पद बनाकर वाक्यों की पूर्ति कीजिए।)

1. **लता**—शोभनम्, प्रतीक्षस्व तावत्। सज्जीभूय अहम् अपि ......................। (आ + गम्)
2. जन्तुशालायाम् ...................... पशव: वसन्ति। (अनेक)
3. ...................... सह मृगा: चरन्ति। (मृग)
4. धूर्ता: बालका: ...................... वानरान् ताडयन्ति। (पाषाणखण्ड)
5. केचन बालका: खगेभ्य: चणकान् ......................। (दा-लट्लकार:)
6. अद्य पर्यावरणदिवस: ......................। (अस्-लट्लकार:)
7. अत: '...................... न छेत्स्याम:' इति प्रतिज्ञा सर्वै: छात्रै: कृता। (वृक्ष)

8. प्लास्टिकस्यूतानां बहिष्कारार्थम् अपि ते सङ्कल्पं ........................ कृतवन्तः। (तत्)

9. 'अवकरः जले न क्षेप्तव्यः' इत्यादि घोषणां ते ........................ । (कृ + क्तवतु)

10. ........................ मम विद्यालयः अस्ति। (एतत्)

11. ........................ विद्यालये पञ्चाशत् अध्यापकाः अध्यापिकाः च पाठयन्ति। (इदम्)

12. किम् ........................ पार्श्वे संगणकयन्त्रम् अस्ति? (युष्मद्)

13. अद्यत्वे वयम् सर्वाणि कार्याणि संगणकयन्त्रेण एव ........................ । (कृ-लट्लकारः)

14. ........................ बालकः भोजनं खादति। (तत्)

15. त्वया सह के ........................ ? (गम्-लट्लकारः)

16. किम् सा श्वः ........................ ? (आ + गम्)

17. किम् इदं फलं त्वम् अपि ........................ ? (खाद्-लृट्लकारः)

18. ........................ एका योग्या बालिका अस्ति। (तत्)

19. मया सह मम ........................ अपि गच्छन्ति। (मित्र)

20. किम् त्वम् अपि ........................ ? (पठ्-लृट्लकारः)

21. सः अपि फलानि ........................ । (खाद्-लृट्लकारः)

## ''व्याकरणवीथिः'' पुस्तकात्

**1. कोष्ठकेषु मूलशब्दाः प्रदत्ताः। तेषु उचितविभक्तीः योजयित्वा रिक्तस्थानानि पूरयत–**

(*i*) बालकाः ........................ पृच्छन्ति। (अम्बा)

(*ii*) नास्ति ........................ समः शत्रुः। (क्रोध)

(*iii*) ........................ भीतः बालकः क्रन्दति। (चौर)

(*iv*) शिष्याः ........................ विद्यां गृह्णन्ति। (गुरु)

(*v*) अहम् ........................ प्राक् आगमिष्यामि। (अध्यापक)

(*vi*) अस्माकम् बालिकाः ........................ कुशलाः सन्ति। (गायन)

(*vii*) माता ........................ स्निह्यति। (शिशु)

(*viii*) ........................ क्रोधः जायते। (काम)

(*ix*) ........................ नमः। (सरस्वती)

(*x*) अलम् ........................। (विवाद)

(*xi*) भिक्षुकः ........................ याचते। (भिक्षा)

(*xii*) धिक् देशस्य ....................। (शत्रु)

(*xiii*) वीरः .................... न विरमति। (धर्मयुद्ध)

(*xiv*) दुर्योधन .................... जुगुप्सति स्म। (पाण्डव)

(*xv*) .................... अर्जुनः श्रेष्ठः धनुर्धरः। (भ्रातृ)

(*xvi*) पितरौ .................... सर्वस्वं यच्छतः। (अस्मद्)

(*xvii*) किम् .................... एतत् गीतं रोचते? (युष्मद्)

(*xviii*) .................... परितः वायुमण्डलम् अस्ति। (पृथ्वी)

(*xix*) .................... बहिः छात्राः कोलाहलं कुर्वन्ति? (कक्षा)

(*xx*) अहम् .................... पूर्वं .................... वन्दे। (शयन, ईश्वर)

(*xxi*) परिश्रमिणः .................... स्पृह्यन्ति। (सफलता)

(*xxii*) वाल्मीकिः .................... रचयिता? (रामायणम्)

(*xxiii*) .................... विभाति सरः। (पंकज)

**उत्तराणि–** (*i*) अम्बाम् (*ii*) क्रोधेन (*iii*) चौरात् (*iv*) गुरोः (*v*) अध्यापकात् (*vi*) गायने (*vii*) शिशौ (*viii*) कामात् (*ix*) सरस्वत्यै (*x*) विवादेन (*xi*) भिक्षाम् (*xii*) शत्रुम्/शत्रून (*xiii*) धर्मयुद्धात् (*xiv*) पाण्डवेभ्यः (*xv*) भ्रातृषु (*xvi*) अस्मभ्यम् (*xvii*) तुभ्यम् (*xviii*) पृथ्वीम् (*xix*) कक्षायाः (*xx*) शयनात, ईश्वरं (*xxi*) सफलतायै (*xxii*) रामायणस्य (*xxiii*) पंकजैः

**2. कोष्ठकेभ्यः शुद्धम् उत्तरं चित्वा रिक्तस्थानपूर्तिं कुरुत–**

(*i*) .................... सह सीता वनम् अगच्छत्। (रामस्य/रामेण)

(*ii*) माता .................... स्निह्यति। (माम्/मयि)

(*iii*) .................... मोदकं रोचते। (मोहनम्/मोहनाय)

(iv) सः .................... धनं ददाति। (रमेशम्/रमेशाय)

(*v*) .................... पत्राणि पतन्ति। (वृक्षेण/वृक्षात्)

(*vi*) अध्यापिका .................... पुस्तकं यच्छति। (सुलेखाम्/सुलेखायै)

(*vii*) .................... परितः वृक्षाः सन्ति। (विद्यालयम्/विद्यालयस्य)

(*viii*) .................... नमः। (गुरवे/गुरुम्)

**उत्तराणि–** (*i*) रामेण (*ii*) मयि (*iii*) मोहनाय (*iv*) रमेशाय (*v*) वृक्षात् (*vi*) सुलेखायै (*vii*) विद्यालयम् (*viii*) गुरवे

**3. उचितविभक्तिप्रयोगं कृत्वा अधोलिखितपदानां सहायतया वाक्यरचनां कुरुत–**

| | |
|---|---|
| (*i*) समम् | (*ii*) धिक् |
| (*iii*) उभयतः | (*iv*) विना |
| (*v*) अन्धः | (*vi*) बहिः |
| (*vii*) प्रवीणः | (*viii*) अलम् |
| (*ix*) बिभेति | (*x*) श्रेष्ठः |

**उत्तराणि–** (*i*) सः मात्रा समम् विद्यालयं गच्छति। (*ii*) धिक् दुष्टम्।
(*iii*) गृहस्य उभयतः मार्गौ स्तः। (*iv*) ईश्वरं विना कः माम् उद्धरिष्यति।
(*v*) सः नेत्राभ्याम् अन्धः अस्ति। (*vi*) गृहात् बहिः कुक्कुरः तिष्ठति।
(*vii*) देवः पठने प्रवीणः अस्ति। (*viii*) अलम् कोलाहलेन।
(*ix*) बालः सिंहात् बिभेति। (*x*) श्रीरामः महापुरुषेषु श्रेष्ठः आसीत्।

**4. 'क' स्तम्भे शब्दाः दत्ताः सन्ति 'ख' स्तम्भे च विभक्त्यः। कस्य योगे का विभक्तिः प्रयुज्यते इति योजयित्वा लिखत–**

| 'क' | 'ख' |
|---|---|
| (*i*) 'रुच्' धातु योगे | (क) तृतीया |
| (*ii*) 'सह' शब्द योगे | (ख) चतुर्थी |
| (*iii*) 'नमः' शब्द योगे | (ग) पञ्चमी |
| (*iv*) 'भी' 'त्रा' धातु योगे | (घ) चतुर्थी |
| (*v*) 'दा' धातु योगे | (ङ) प्रथमा |
| (*vi*) कर्तृवाच्यस्य कर्त्तरि | (च) तृतीया |
| (*vii*) कर्मवाच्यस्य कर्त्तरि | (छ) चतुर्थी |
| (*viii*) 'विना' योगे | (ज) तृतीया |
| (*ix*) यस्मिन् अङ्गे विकारः भवति तस्मिन् | (झ) द्वितीया, तृतीया, पञ्चमी |
| (*x*) कर्मवाच्यस्य कर्मणि | (ञ) प्रथमा |

**उत्तराणि–** (*i*) चतुर्थी (*ii*) तृतीया (*iii*) चतुर्थी (*iv*) पञ्चमी (*v*) चतुर्थी (*vi*) प्रथमा (*vii*) तृतीया (*viii*) द्वितीया, तृतीया, पञ्चमी (*ix*) तृतीया (*x*) प्रथमा

**5. 'स्थूलपदानां' स्थाने शुद्धपदं लिखत–**

(*i*) **अध्यापिकायाः** परितः छात्राः सन्ति।
(*ii*) छात्रः **आचार्याय** प्रश्नम् पृच्छति।
(*iii*) सीता **लेखन्याः** लेखं लिखति।
(*iv*) गोपालः **शिवस्य** सह वार्तां करोति।
(*v*) चौराः **आरक्षिणा** बिभ्यति।
(*vi*) **महापुरुषम्** नमः।
(*vii*) **त्वाम्** किम् रोचते?
(*viii*) **कवये** कालिदासः श्रेष्ठः।
(*ix*) सा **गृहकर्मणः** निपुणः।
(*x*) अहम् **रेलयानात्** कालिकातां गमिष्यामि।

**उत्तराणि–** (*i*) अध्यापिकाम् (*ii*) आचार्यम् (*iii*) लेखन्या (*iv*) शिवेन (*v*) अरक्षिणः (*vi*) महापुरुषाय (*vii*) तुभ्यम् (*viii*) कविषु/कवीनाम् (*ix*) गृहकर्मणि (*x*) रेलयानेन

## बोर्ड परीक्षाया: प्रश्ना:

**प्रदत्तेषु पदेषु यत् पदं शुद्धम् अस्ति तत् चीयताम्।**

(दिए गए पदों में से जो पद शुद्ध है उसे चुनिए। Choose the appropriate word from the options given below.)

1. **तौ तत्र किमर्थं गच्छन्ति?** *[Delhi 2011]*
   (क) गच्छति (ख) गच्छथ: (ग) गच्छत: (घ) गच्छसि
2. **यूयम् कुत्र उपविशसि?** *[All India 2011]*
   (क) उपविशथ (ख) उपविशथ: (ग) उपविशन्ति (घ) उपविशाम:
3. **मम समीपे द्वादश पुस्तक: सन्ति।** *[Delhi 2013, All India 2013]*
   (क) पुस्तका: (ख) पुस्तके (ग) पुस्तकानि (घ) पुस्तकेषु
4. **सर्वेषां दीनजनस्य सेवां करोतु।** *[Delhi 2013]*
   (क) दीनजनयो: (ख) दीनजनानाम् (ग) दीनजनेभ्य: (घ) दीनजनेन
5. **सा बालिका: क्रीडन्ति।** *[All India 2013]*
   (क) ते (ख) ता: (ग) स: (घ) तानि
6. **एते सर्वे मम मित्रम् सन्ति।** *[Delhi 2014]*
   (क) मित्रा: (ख) मित्रे (ग) मित्राणि (घ) मित्र:
7. **भवान् गृहं गच्छन्तु।** *[Delhi 2014]*
   (क) भवन्ता: (ख) भवता: (ग) भवन्त: (घ) भवन्तम्
8. **ता: बालिका रामायणं पठति।** *[All India 2014]*
   (क) ते (ख) स: (ग) सा (घ) तानि
9. **भवान् सुखी भवन्तु।** *[All India 2014]*
   (क) भवताम् (ख) भवतु (ग) भव (घ) भवत
10. **यूयम् गृहं गच्छथ:।** *[Delhi 2015]*
    (क) त्वम् (ख) युवाम् (ग) तौ (घ) ते
11. **वानर: कुत्र कूर्दन्ति?** *[Delhi 2015]*
    (क) कूर्दसि (ख) कूर्दति (ग) कूर्दत: (घ) कूर्दिष्यन्ति
12. **द्वे छात्रे अत्र पठन्ति।** *[All India 2015]*
    (क) पठति (ख) पठत: (ग) पठथ: (घ) पठथ
13. **गायिका: गीतानि गायति।** *[Delhi 2016]*
    (क) गास्यामि (ख) गायसि (ग) अगायत् (घ) गायन्ति
14. **ते बालिका: कदा गमिष्यन्ति?** *[Delhi 2011]*
    (क) ता: (ख) सा (ग) तौ (घ) स:
15. **स: बालिका धावति।** *[All India 2011]*
    (क) बाला (ख) बालिके (ग) बालक: (घ) बालकौ

16. सः <u>बालिका</u> क्रीडति। [*All India 2012, 2016*]

(क) बाला (ख) बालिके (ग) बालकः (घ) बालकौ

17. <u>ते</u> फलानि पतन्ति। [*Delhi 2014*]

(क) ताः (ख) सा (ग) सः (घ) तानि

18. एते मम <u>मित्राः</u> सन्ति। [*All India 2014*]

(क) मित्रे (ख) मित्राणि (ग) मित्रः (घ) मित्रम्

19. अस्मिन् पाठ्यपुस्तके एकादश <u>पाठानि</u> सन्ति। [*All India 2014*]

(क) पाठाः (ख) पाठम् (ग) पाठान् (घ) पाठः

20. तौ <u>महिले</u> गच्छतः। [*Delhi 2015*]

(क) महिलाः (ख) पुरुषौ (ग) पुरुषेभ्यः (घ) पुरुषयोः

21. ते <u>बालिकाः</u> कुत्र गमिष्यन्ति? [*All India 2015*]

(क) बालिके (ख) बाले (ग) बालकाः (घ) बालकौ

22. नद्यां <u>जलः</u> नास्ति। [*Delhi 2016*]

(क) जले (ख) जलस्य (ग) जलम् (घ) जलाय

23. श्यामः तव <u>मित्रः</u> अस्ति। [*Delhi 2016*]

(क) मित्रान् (ख) मित्रेण (ग) मित्रस्य (घ) मित्रम्

24. त्वम् मम <u>मित्रः</u> असि। [*All India 2016*]

(क) मित्रम् (ख) मित्रौ (ग) मित्रा (घ) मित्राः

25. पाठ्यपुस्तके द्वादश <u>पाठानि</u> सन्ति। [*All India 2016*]

(क) पाठे (ख) पाठेषु (ग) पाठाः (घ) पाठान्

26. <u>आवाम्</u> न चलथः। [*Delhi 2011*]

(क) तौ (ख) युवाम् (ग) यूयम् (घ) ताः

27. <u>ताः</u> पाठं पठसि। [*All India 2011*]

(क) ते (ख) त्वम् (ग) युवाम् (घ) यूयम्

28. ताः समाचारपत्रं <u>पठसि</u>। [*All India 2012*]

(क) ते (ख) त्वम् (ग) युवाम् (घ) यूयम्

29. त्वम् कदा नाटकं <u>द्रक्ष्यन्ति</u>? [*All India 2012, 2016*]

(क) द्रक्ष्यामि (ख) पश्याव: (ग) पश्यथः (घ) द्रक्ष्यसि

30. त्वम् मम मित्रम् <u>अस्ति</u>। [*Delhi 2013*]

(क) भवति (ख) अस्मि (ग) स्तः (घ) असि

31. वयम् सर्वे प्रातः उद्यानं <u>गच्छन्ति</u>। [*Delhi 2013*]

(क) गच्छावः (ख) गच्छथ (ग) गच्छामः (घ) गमिष्यामि

32. त्वम् कदा नाटकं द्रक्ष्यामः? [All India 2013]

(क) पश्यथ (ख) द्रक्ष्यन्ति (ग) द्रक्ष्यसि (घ) पश्याव:

33. त्वम् पाठम् अपठत्। [Delhi 2014]

(क) अपठताम् (ख) अपठ: (ग) अपठतम् (घ) अपठत

34. अहम् नाटकं द्रक्ष्यन्ति। [Delhi 2014]

(क) पश्याव: (ख) पश्यसि (ग) द्रक्ष्यामि (घ) द्रक्ष्यति

35. मम समीपे पञ्च फलानि स्थ। [All India 2014]

(क) अस्ति (ख) असि (ग) सन्ति (घ) स्म:

36. वानरा: अकूर्द:। [Delhi 2015]

(क) अकूर्दत् (ख) अकूर्दताम् (ग) अकूर्दन् (घ) कूर्दत

37. अहम् सेवफलं खादति। [Delhi 2015]

(क) आवाम् (ख) वयम् (ग) त्वम् (घ) स:

38. यूयम् व्यर्थं न वदाव:। [All India 2015]

(क) वदथ (ख) वदथ: (ग) वदन्ति (घ) वदाम:

39. आवाम् अस्माकं मित्रै: सह गमिष्यत:। [All India 2015]

(क) युवाम् (ख) यूयम् (ग) त्वम् (घ) तौ

40. अहम् गीतां पठिष्याम:। [Delhi 2016]

(क) पठिष्यामि (ख) पठिष्यति (ग) पठिष्याव: (घ) पठिष्यथ

41. ते अत्र भोजनम् अकुर्व:। [Delhi 2016]

(क) अकरोत् (ख) अकरो: (ग) अकुर्वन् (घ) अकुरुताम्

42. जना: नाटकं श्व: पश्यन्ति। [Delhi 2011]

(क) पश्यन्तु (ख) पश्येयु: (ग) अपश्यन् (घ) द्रक्ष्यन्ति

43. आवाम् ह्य: एव मणिपुरत: आगमिष्याव:। [All India 2011]

(क) आगच्छाव (ख) आगच्छाव: (ग) आगच्छतु (घ) आगच्छेत्

44. वयम् ह्य: विज्ञानं पठिष्याव:। [All India 2012]

(क) अपठाम (ख) अपठाव (ग) अपठ: (घ) पठिष्याम:

45. श्व: भवन्त: कुत्र गच्छथ? [All India 2013]

(क) गमिष्यन्ति (ख) अगच्छन् (ग) गच्छन्ति (घ) गमिष्यथ

46. ह्य: अस्माकं विद्यालये वार्षिकोत्सव: भविष्यति। [Delhi 2014]

(क) अभवत् (ख) अभव: (ग) भवेत् (घ) भविष्यत:

47. ते श्व: वाराणसीम् अगच्छन्। [All India 2014]

(क) अगच्छथ (ख) गमिष्यत: (ग) अगच्छताम् (घ) गमिष्यन्ति

48. वयम् जन्तुशालां ह्य: गमिष्याम:। [Delhi 2015]

(क) गमिष्यामि (ख) अगच्छाम (ग) अगच्छाव (घ) गच्छाम:

49. किम् त्वम् श्वः <u>गच्छसि</u>? [*All India 2015*]

(क) गमिष्यति (ख) अगच्छः (ग) गमिष्यसि (घ) गच्छ

50. अहम् ह्यः <u>गच्छामि</u>। [*All India 2015*]

(क) अगच्छम् (ख) गमिष्यामि (ग) गच्छानि (घ) गच्छेयम्

51. जनाः ह्यः आपणं <u>गमिष्यन्ति</u>। [*Delhi 2016*]

(क) गमिष्यावः (ख) अगच्छन् (ग) गच्छानि (घ) अगच्छताम्

52. <u>वृक्षेण</u> पत्राणि पतन्ति। [*Delhi 2013*]

(क) वृक्षम् (ख) वृक्षात् (ग) वृक्षाय (घ) वृक्षे

53. अस्मिन् पुस्तके पञ्चदश <u>पाठं</u> सन्ति। [*All India 2013*]

(क) पाठानि (ख) पाठे (ग) पाठौ (घ) पाठाः

54. द्वौ वानरौ <u>मनुष्यस्य</u> सह गच्छतः। [*Delhi 2016*]

(क) मनुष्यम् (ख) मनुष्येण (ग) मनुष्यान् (घ) मनुष्यात्

55. अहम् <u>नेत्रयोः</u> पश्यामि। [*All India 2016*]

(क) नेत्रेभ्यः (ख) नेत्रैः (ग) नेत्रेषु (घ) नेत्राभ्याम्

अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत। [*CBSE 2018*]

(*i*) द्वे बालिके विद्यालयं <u>गच्छति</u>।

(*ii*) किम् अहं <u>सर्वे</u> पुस्तकानि आदाय गच्छानि?

(*iii*) विजयः भ्रमणार्थं श्वः न <u>गच्छति</u>।

(*iv*) किम् शकुन्तला अध्ययने <u>रतः</u> अस्ति?

# ग अनुप्रयुक्त-व्याकरणस्य विचारबिन्दवः

**विषयः — सन्धिः** **उपविषयः — स्वरसन्धिः**

- **क्रियाकलापः—1 : शब्दानां प्रकृतिः तेषां निर्माणं महत्त्वञ्च ज्ञात्वा वाक्येषु तेषां सम्यक्तया प्रयोगम् करणम्।**

➢ **उद्देश्यम्**

शुद्धाशुद्ध-शब्दानां ज्ञानं तेषां चिह्नीकरणं संशोधनं च ज्ञात्वा भाषायां प्रावीण्यं प्राप्तुं प्रयासं करणम्।

➢ **मूल्याङ्कनम्**

सन्धिप्रकरणं स्वरसन्धिं वा ज्ञात्वा छात्राः स्वराणां विभिन्नरूपाणि ज्ञास्यन्ते तथा वाक्ये तेषां मेलनं कृत्वा भाषायाः सम्यक्तया उच्चारणं लेखनं च करिष्यन्ति।

➢ **समयः**

दशकला परिमितम् (10 मिनट)

➢ **शिक्षणविधिः**

1. सर्वप्रथमं शिक्षकाः कक्षायाः छात्रान् द्वयोः वर्गयोः विभजन्तु। एकस्यनाम-सन्धिः द्वितीयस्य च नाम विच्छेदः कुर्वन्तु।
2. पुनः प्रथमवर्गस्य छात्रेभ्यः स्वरसन्धियुक्तम् शब्दान् दत्वा क्रमशः तेषां विच्छेदं पृच्छन्तु; यथा—
   हिमालयः, गणेशः, वनोत्सवः, महोदधिः, पञ्चामृतम्, भीष्मादयः, वनौषधिः, लघूत्सवः लघ्वपि, नायिकाम्, नायकः, पवनः, पावनम् इत्यादयः।
3. तत्पश्चात् द्वितीयवर्गस्य 'विच्छेदस्य' छात्रेभ्यः स्वरसन्धेः विच्छेदान् दत्वा तेषां सन्धियुक्तं पदं पृच्छन्तु; यथा—
   जल + आशयः, बाल + आदयः, करुणा + ईशः, देव + ऐश्वर्यम्, जन + एकता, दीप + उत्सवः, रामो + अपि, राम + ओषधिः, पौ + अकः आदयः।
4. पुनः शिक्षकाः स्वरसन्धेः प्रत्येकं भागस्य नाम दत्वा तस्य भागस्य उदाहरणं पृच्छेयुः छात्राश्च तस्य उत्तरं दद्युः।
5. एवमेव विच्छेदं दत्वा छात्रान् सन्धियुक्तं पदं पृच्छेयुः छात्राश्चापि तस्य उत्तरं यच्छेयुः। मध्ये-मध्ये तालिकावादनमपि भवेत् येन छात्राणाम् उत्साहं वर्धयेत्।

➢ **सहायक-साधनानि**

सन्धिपरिचयं पाठनार्थं निम्नसाधनानाम् आवश्यकता भवति; यथा—
श्यामपट्टः, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिः तथा सन्धि-विच्छेद-विषयस्य चित्रमयं लेखनम्।

- **गृहकार्यम्**

शिक्षकाः कक्षायाम्, छात्रान्, सन्धिं विच्छेदं वा पाठयित्वा छात्रेभ्यः गृहकार्यमपि दास्यन्ति। गृहकार्यरूपे ते छात्रेभ्यः स्वरसन्धेः दशशब्दाः सन्धेः दश च शब्दाः विच्छेदस्य प्रदास्यन्ति। तत्कार्यं छात्राः परिश्रमेण गृहे करिष्यन्ति।

❑ **कार्यनिरीक्षणं हस्ताक्षरञ्च**

1. छात्रैः कृतं कार्यं कक्षायां शिक्षकाः निरीक्षणं करिष्यन्ति।
2. अशुद्ध कार्ये भवति सति ते छात्रेभ्यः स्वमार्गदर्शनमपि प्रदास्यन्ति।
3. यस्य छात्रस्य कार्यं सन्तोषजनकं शुद्धं वा भविष्यति शिक्षकाः तस्मै साधुवादं प्रदास्यन्ति तालिकावादनञ्च तस्मै कारयिष्यन्ति।
4. तत्पश्चात् छात्राणाम् उत्तरपुस्तिकायां यथास्थानं शिक्षकाः स्वहस्ताक्षरमपि करिष्यति।

❑ **प्रश्नकार्यम् कक्षा-कार्यकलापश्च**

1. शिक्षकाः छात्राणां कार्यं पश्यन्तु तथा मध्ये-मध्ये यथारुचि प्रश्नान् अपि पृच्छन्तु। छात्राः अपि यथामति उत्तराणि प्रदास्यन्ति। अनेन छात्राणां ज्ञानवर्धनं भविष्यति।
2. एवमेव शिक्षकाः छात्रेभ्यः चित्रकर्गदेऽपि सन्धियुक्तपदानां विच्छेदपदानाञ्च रचना कृत्वा आनेतुं कथयन्ति। येन छात्राणाम् उत्साहं वर्धिष्यति।

---

**विषयः — सन्धिः** **उपविषयः — व्यञ्जनविसर्गसन्धिः**

❑ **क्रियाकलापः—2 : पदानां प्रकृतिः, निर्माणं स्वरूपञ्च ज्ञात्वा वाक्येषु सम्यकतया तेषां प्रयोगं करणम्।**

➢ **उद्देश्यम्**

शब्दानां पदानाञ्च ज्ञानं तेषां संशोधनं-प्रयोगम् अर्थञ्च ज्ञात्वा वाक्येषु तेषां सम्यक्तया प्रयोगं कृत्वा तस्य शोभां वर्धनम्।

➢ **कौशल-विकास मूल्याङ्कनम् वा**

सन्धि-विच्छेदं वा विना भाषायां सौन्दर्यं न भवति। सन्ध्याः ज्ञानेन जनाः भाषायाः सम्यक्तया ज्ञानं प्राप्तुं समर्थाः भवन्ति सदैव च तस्याः उच्चारणं लेखनं च सरलं भवति।

➢ **समयः**

दशकला परिमितम् (10 मिनट)

➢ **सहायक-साधनानि**

सन्ध्याः (सन्धेः) अध्यायनार्थं कक्षायां शिक्षकान् निम्नवस्तुनि अपेक्ष्यन्ते यैः ते सम्यक्तया छात्रान् पाठयितुं समर्थाः भवेयुः। तानि सन्ति—मार्जनी, श्यामपट्टः, सुधाखण्डाः सङ्केतयष्टिः एवं चित्रमयं सन्धिविषयस्य लेखनम् आदयः।

➢ **शिक्षणविधिः**

1. शिक्षकाः छात्रान् प्रथमं चतुर्षु वर्गेषु विभजन्तु; यथा—कालिदासः वर्गः, भासः वर्गः, माघः वर्गः बाणभट्टः वर्गश्च।
2. पुनः तेभ्यः क्रमशः व्यञ्जनसन्धिः, विग्रहः, विसर्गसन्धिः विग्रहः च शब्दान् दत्वा पृथक्, उपस्थापयेयुः; यथा—
   - **कालिदासवर्गाय** — रामं याति, जगदीशः, चञ्चल, सज्जनः, वाङ्मयं आदयः।
   - **भासवर्गाय** — जगत् + ईशः, तत् + शक्तिः, विश्वम् + जयति, एतत् + शक्तम्, तत् + लीनः आदयः।
   - **माघवर्गाय** — रामोगच्छति, शनैश्च, हरिरिच्छति, नमस्ते, नरा हसन्ति आदयः।
   - **बाणभट्टवर्गाय** — सेवकः + तरति, हरिः + इच्छति, बालकाः + च, सः + गच्छति, मुनिः + उवाच आदयः।
3. इत्यादीनि कार्याणि दत्वा शिक्षकाः किञ्चित् कालं विरम्य पुनः तान् प्रश्नान् प्रक्ष्यन्ति; यथा—
   भासवर्गाय प्रश्नमिदं **यत् 'तत् + लीनः'** इत्यस्य सन्धिं कृत्वा कः शब्दः जायते ? छात्राः उत्तरंप्रदास्यन्ति यत्—**'तल्लीनः'**। एवमेव कालिदासवर्गाय **'वाङ्मयं'** पदं कथयित्वा तस्य विच्छेदं पृच्छन्तु। अधुना तद्वर्गस्य छात्राः **'वाक् + मयं'** वदिष्यन्ति।
4. एवमेव छात्राः शिक्षकाणां प्रश्नानामुत्तराणि दास्यन्ति शिक्षकाश्च तेषामुत्साहं वर्धनाय मध्ये-मध्ये छात्राणां प्रशंसां साधुवादं च करिष्यन्ति छात्रान् च तालिकावादनाम प्रोत्साहितान् अपि करिष्यन्ति।

➢ गृहकार्यम्

शिक्षकाः कक्षायां, छात्रेभ्यः व्यञ्जन विसर्ग च सन्ध्योः आधारितान् प्रश्नान् गृहे करणाय दास्यन्ति। ते छात्रेभ्यः दश पदान् व्यञ्जनसन्धेः दश च पदाय् विसर्गसन्धेः प्रदान छात्राणाम् उत्साहवर्धयन्तः गृहात् कृत्वा आनेतुं कथयिष्यन्ति। छात्राश्च तत्कार्यं गृहे करिष्यन्ति अपि।

❑ **कार्यनिरीक्षणम्ः**

1. आगामिदिवसे छात्रैः कृतं कार्यं शिक्षकाः द्रक्ष्यन्ति।
2. अशुद्धे कार्ये सति ते छात्रेभ्यः स्वामूल्यं मार्गदर्शनं दास्यन्ति अपि। छात्राः पुनरपि शिक्षकाणां समक्षे एव स्वकार्यं करिष्यन्ति।
3. यस्य छात्रस्य कार्यं सन्तोषप्रदं उत्तमं शुद्धं वा भविष्यति शिक्षकाः तस्मै आशीर्वादं साधुवादं च प्रदास्यन्ति। तस्मै तालिकाः वादनाय छात्रान् प्रेरयिष्यन्ति अपि।
4. छात्रस्य अभ्यास-पुस्तिकायामुपरि ते शिक्षकाः स्वहस्ताक्षरां अपि करिष्यन्ति।

❑ **प्रश्नकार्यम्**

निरीक्षणसमये शिक्षकाः स्वमत्यानुसारमेव छात्रान् प्रश्नान् अपि प्रक्ष्यन्ति येन छात्राः सन्नद्धाः भूत्वा तिष्ठेयुः।

---

**विषयः — समासाः** **उपविषयः — तत्पुरुषः द्वन्द्वश्च**

❑ **क्रियाकलापः—3 : उत्तरपदप्रधानम् सर्वपदप्रधानम् वा पदानाम् संयोजनम् वियोजनम् वा।**

➢ उद्देश्यम्

1. पूर्व अथवा उत्तरपदयोः किं पदं प्रधानम् **अथवा** अप्रधानम् भवति।
2. पूर्व-उत्तरपदयोः कस्मिन् पदे परिवर्तनं भूत्वा नवीनपदस्य निर्माणं भवति।
3. सर्वेषां (द्वयोः त्रयाणां चतुर्णां वा) पदानां कदा संयोजनं भवति।
4. प्रधानम् अर्थात् अपरिवर्तनं पदं परिवर्तितेन सह मिलित्वा किं भवति।
5. समस्तपदानां निर्माणं विग्रहं च कथं भवति। इत्यादीनां सर्वेषां प्रश्नानाम् उत्तराणि ज्ञातुम् एव अस्य उद्देश्यं वर्तते।

➢ **मूल्याङ्कनम् कौशलविकासो वा**

विभिन्नपदानां मेलनं विग्रहो वा भूत्वा तेषां भाषायाम् प्रयोगः कथं भवति। अनेकेषां पदानां मेलनं एव भाषायाः सौंदर्यं वर्धयति एतद् ज्ञानमपि अनेन समासप्रकारणेन ज्ञायते।

➢ **सहायक-साधनानि**

द्वन्द्वतत्पुरुषयोः समासयोः चित्राङ्कनं, मार्जनी, सुधाखण्डाः, श्यामपट्टः सङ्केतयष्टिश्च। एतानि साधनानि कक्षायां सम्यक्तया अध्यापयनार्थं अतीव अपेक्ष्यन्ते।

➢ **समयः**

होरार्धम् (30 मिनट)

➢ **शिक्षणयोजना (विधिः)**

1. शिक्षकमहोदयाः छात्राणाम् षड्वर्गेषु क्रमशः अव्ययः, समयः, सङ्ख्या, व्यञ्जनम्, विसर्गः शब्दाश्च विभजन्तु।
2. पुनः क्रमशः तेषां वर्गाणां पङ्क्तीन् निर्माय क्रमानुसारं छात्रान् प्रश्नान् पृच्छन्तु।
3. अव्ययवर्गस्य छात्राः तत्पुरुष समासस्य वर्गीकरणं कुर्वन्तु; यथा—तत्पुरुषः समासः कस्य पदस्य प्रधान्यो भवति? अधिकरणं किं भवति? समानाधिकरण व्यधिकरण तत्पुरुषयोः को भेदो वर्तते?

4. शिक्षकाः एवमेव समयः वर्गः वदतु—समानाधिकरण तत्पुरुषे कति भेदोऽस्ति? कर्मधारयस्य समासस्य कति भेदो वर्तते? विशेषण-विशेष्य अथवा उपमान उपमेयानां समासो विग्रहो वा कथं भवति?

5. द्विगु समासे कर्मधारयात् किं वैशिष्ट्यं वर्तते? द्विगु समासस्य पूर्वपदं सङ्ख्यावाचकं भवति न वा? किं द्विगु समासस्य अन्ते नपुंसकलिङ्गस्य एकवचनं भवति, द्विवचनं बहुवचनं वा?

6. शिक्षकाः पुनः सङ्ख्यावर्गस्य छात्रान् पृच्छन्तु—

   नेत्रेण, काणः, पाठायशाला, दशरथस्य पुत्राः, न उपयोगी, पठने कुशलाः, जलदः, स्वर्णकारः इत्यादीनां समासो विग्रहो वा कथं जायते? छात्राः सम्यक्तया उत्तराणि दास्यन्ति।

7. ततः शिक्षकाः व्यञ्जनवर्गं प्रश्नान् पृच्छेयुः—भोः छात्राः! द्वन्द्वः कः भवति? एवं द्वन्द्वस्य कति भेदाः भवन्ति?

   छात्राः तेषाम् उत्तराणि सम्यक्तया प्रदास्यन्ति। शिक्षकाः तेषाम् उत्तरेभ्यः प्रसन्नाः भूत्वा तेभ्यः साधुवादं प्रदास्यन्ति।

8. तत्पश्चात् विसर्ग वर्गात् छात्राः शिक्षकस्य निम्नप्रश्नस्य उत्तरं प्रदास्यन्ति; यथा—

   पितरौ, रामकृष्णयोः, सीतारामौ, गवाश्वम् इत्यादीनां पदानां समास नामानि विग्रहञ्च।

9. अन्ते च शब्द इति वर्गस्य छात्राः शिक्षकाणां प्रश्नाम् अवधानेन श्रुत्वा तेषाम् उत्तराणि यथामतिं दातुं प्रयत्नं करिष्यन्ति। प्रश्नाः ईदृशाः भविष्यन्ति—पतिः च पत्नी च, गुडम् च अन्नं च तयोः समाहारः, लवः च कुशः च; इत्यादीनां पदानां समासं कुर्वन्तु।

10. पुनरपि शिक्षकाः छात्रेभ्यः सम्यक् उत्तराणां कृते करतलध्वनिं कारयिष्यन्ति ततः स्वआशीर्वादेन सह साधुवादमपि प्रदास्यन्ति।

### ❑ गृहकार्यम्

शिक्षकाः स्वकक्षायां एतं पाठं पाठयित्वा पुनः छात्रेभ्यः गृहकार्यम् अपि दास्यन्ति।

यत् भो छात्राः! भवन्तः सर्वे द्वन्द्व समासस्य तत्पुरुषस्य च वर्गीकरणं उदाहरणेन सह लिखित्वा तच्च सज्जीकृत्य कक्षायां प्रदर्शनार्थम् आनयन्तु। यस्य छात्रस्य कार्यम् उत्तमं सर्वोत्तमं वा भविष्यति तस्मै पुरस्कारमपि प्रदास्यते।

### ❑ कार्यनिरीक्षणम्

आगामिदिवसे शिक्षकाः छात्राणां गृहकार्यं दृष्ट्वा योग्यछात्राणां सर्वोत्तमम् कार्याय उत्साहं वर्धयिष्यन्ति एवं सर्वेषां कार्याणाम् उपरि स्वहस्ताक्षरं करिष्यन्ति। सहैव सर्वोत्तमं कार्यकर्त्ता छात्रम् आशीर्वादं वदिष्यन्ति। अन्येभ्यः छात्रेभ्यः भविष्ये उत्तमकार्याय स्वमार्गदर्शनम् अपि दास्यन्ति।

### ❑ प्रश्नकार्यम्

शिक्षकाः कक्षायां यथासमयं स्वशिष्यान् प्रश्नान् अपि करिष्यन्ति। क्रीडायाम् कृतस्य प्रश्नस्य उत्तरं प्रसन्नाः भूत्वा छात्राः प्रदास्यन्ति।

### ❑ कक्षाकार्यकलापः

स्वस्य छात्राणां च उदाहरणस्य दत्वा शिक्षकाः एतयोः द्वयोः समासयोः पाठयिष्यन्ति। येन छात्राः शीघ्रमेव पूर्णरूपेण एतौ समासौ ज्ञास्यन्ति।

---

## विषयः — समासाः      उपविषयः — बहुव्रीहिः अव्ययीभावश्च

### ❑ क्रियाकलापः— 4 : अन्यपद प्रधान पूर्व ( अव्यय ) पद प्रधान वा पदानाम् संयोजनं वियोजनं वा करणम्।

➢ **उद्देश्यम्**

1. पूर्वपदं उत्तरपदं वा उत्सृज्य अन्यपदं कदा प्रधानं भवति?
2. अन्यपदप्रधानपदस्य किं लक्षणं वर्तते?

3. पूर्वपदप्रधानं पदं कस्मिन् अव्यये (उपसर्गे वा) परिवर्तनं जायते?

4. पूर्वपदप्रधानशब्दस्य अन्ते नपुंसकलिङ्गस्य एकवचनं भवति; कथम्?

5. विग्रहयुक्तपदानां संयोजनं केन प्रकारेण भवितुं शक्नुयात? इत्यस्य अपि ज्ञानं कर्तव्यम्।

➢ **मूल्याङ्कनं कौशलविकासो वा**

अव्यय (उपसर्ग) युक्तस्य पदस्य निर्माणं केन प्रकारेण भवति अथवा पदानां सङ्केतं अन्यं प्रति केन प्रकारेण भूयते इत्यस्य अपि ज्ञानं कौशलं वा कथं भूयते, इत्येव अस्य क्रियाकलापस्य कौशलमास्ति। अनेन भाषायाः सौन्दर्यं वर्धते। भाषायाः प्रयोगे समुचितं सरलता अपि जायते।

➢ **सहायक-साधनानि**

अस्य पाठस्य पाठनार्थं बहुव्रीहिअव्ययीभावसमासयोः चित्रमयं लेखनम्, श्यामपट्टः, मार्जनी, सुधाखण्डानि सङ्केतयष्टिश्च एतानि वस्तूनि अतीव आवश्यकानि वर्तन्ते। एतैः पाठस्य अध्यापने सरला सुविधा च भवति।

➢ **समयः**

होराधर्म (30 मिनट)

➢ **शिक्षणविधिः**

1. शिक्षकाः कक्षायाः छात्राणां चतुरवर्गेषु विभाजनं कुर्युः तेषां च नामानि व्यासः, कालिदासः, भासः बाणभट्टः वा कृत्वा छात्राणां पङ्क्तीन् रचयेयुः।
2. तत्पश्चात् सर्वप्रथमं ते व्यासवर्गस्य छात्रान् पृच्छन्तु—
   - भो छात्राः! बहुव्रीहिसमासे किं पदं प्रधानं भवति? उदाहरणं दत्वा कथयन्तु।
   - दुष्टबुद्धिः, फुल्लपद्मा, पीतवस्त्रान् इत्येषां पदानां विग्रहं कृत्वा लिखन्तु।
   - यदा छात्राः तेषाम् उत्तराणि यच्छेयुः तदा शिक्षकाः तेभ्यः साधुवादं दत्वा तेषाम् उत्साहं वर्धयेयुः।
3. ततः शिक्षकाः कालिदासवर्गस्य छात्रान् आह्वयन्तु—
   - अव्ययीभावसमासस्य अन्यैः सह कथं भेदो जायते? इत्यस्य विवेचनं क्रियताम्।
4. तत्पश्चात् भासवर्गस्य छात्रान् शिक्षकाः पृच्छेयुः—
   - भोः छात्राः! युजेन युगपत्, रूपस्य सादृश्यम् इत्यनयोः पदयोः समासः कर्तव्यः।
   - छात्राः यथाशक्ति यथामति तेषाम् उत्तराणि प्रदास्यन्ति। शिक्षकाः ततः प्रसन्नाः भूत्वा तेभ्यः साधुवादं प्रदास्यन्ति।
5. पुनः ते बाणभट्टः वर्गं पृच्छन्तु—
   - छात्राः! युष्माकं प्रयत्नानि प्रशंसनीयानि सन्ति परं यूयम् वदेत यत्—उपाश्वम्, निराहारम्, अनुशिष्यम्, यथामति, सानुजम्, प्रतिगृहम् इत्यादीनां पदानां विग्रहो कथं भविष्यति। सम्यक्तया विचिन्त्य वदेत।
   - शिक्षकाणां प्रश्नानाम् उत्तराणि बाणभट्टवर्गस्य छात्राः प्रदास्यन्ति ततः शिक्षकाः तेभ्यः छात्रेभ्यः प्रसन्नतया करतलध्वनिं कारयिष्यन्ति। तेभ्यश्च साधुवादमपि प्रदास्यन्ति।

## ❑ गृहकार्यम्

शिक्षकाः छात्रान् कक्षायां समासप्रकरणं पाठयित्वा तेषां बुद्धिकौशलस्य परीक्षणं कर्तुं प्रत्येकं समासस्य दश-दश उदाहरणानि विग्रह-संयोजनैः सह कृत्वा विद्यालये आनेतुं कथयिष्यन्ति। ते इदमपि परामर्शं प्रदास्यन्ति यत् कस्यचिदपि छात्रस्य कार्यस्य अन्योऽन्यैः सहमेलनं न भवेत् अस्य ध्यानम् अवश्यमेव दद्यात्।

## ❑ कार्यनिरीक्षणम्

छात्रैः गृहे कृत्वा आनीतं कार्यं आगामिदिने शिक्षकाः अवलोकयिष्यन्ति। सुकार्यं दृष्ट्वा ते छात्राणां कृते साधुवादमपि प्रदास्यन्ति। सहैव ते छात्रान् सम्बन्धिते विषये प्रश्नान् अपि करिष्यन्ति।

❑ **प्रश्नकार्यम्**

- कार्यस्य निरीक्षणेन सह शिक्षकाः छात्रान् लघु प्रश्नं निर्माण पृच्छेयुः; यथा—तत्पुरुषस्य प्रमुखरूपेण कति भेदाः भवन्ति? उपपद तत्पुरुषस्य अन्यैः सह किम् अन्तरं भवति?
- गवाजम्, नेत्रज्योतिः, नेत्रान्धः इत्यादीनां पदानां विग्रहो कृत्वां वदन्तुः सर्वे।

❑ **कक्षायाः कार्यकलापः हस्ताक्षरं वा**

छात्राणां कार्याणि अवलोक्य शिक्षकाः प्रसन्नाः भूत्वा तेभ्यः प्रोत्साहं वर्धनाय तालिका वादनं कारयिष्यन्ति। सहैव तेषां अभ्यास-पुस्तिकायां स्वहस्ताक्षरं अपि कारयिष्यन्ति।

---

**विषयः — प्रत्ययाः** **उपविषयः — कृदन्ताः**

❑ **क्रियाकलापः— 5 : धातूभिः क्रिया, क्रियाविशेषणविशेषणानां वा निर्माणम् कृत्वा तेषां भाषायाम् उपयोगं करणम्।**

➢ **उद्देश्यम्**

1. मूल धातुभ्यः क्रियायाः निर्माणम्।
2. धातुभ्यः आवश्यकतानुसारं विशेषणस्य अपि निर्माणम्।
3. अनेन प्रकारेण क्रियाविशेषणस्य अपि निर्माणं कृत्वा एतेषां वाक्येषु प्रयोगम्।
4. भाषायाः प्रयोगे सोद्देश्यं क्रियायाः निर्माणे सरलता भवेत्।
5. केवलं क्रियायाः रूपे धातुरूपाणां प्रयोगं न कृत्वा सरलतया शब्दरूपप्रणाली माध्यमेन वाक्यनिर्माणं करणम्।

➢ **मूल्याङ्कनम्**

धातुभिः सह कृदन्त प्रत्ययानां प्रयोगं कृत्वा सरलतया क्रियायाः निर्माणं कर्तुं शक्नोति। अनेन विधिना धातुरूपाणां कण्ठस्थात् मुक्तिः अपि प्राप्यते। क्रियायाः निर्माणस्य तस्याश्च भाषायां प्रयोगस्य समस्या कठिनता वा दूरी भवति। मात्र कर्त्ता कर्म वा दृष्ट्वा एव क्रियायाः निर्माणं भवितुं शक्यते।

➢ **सहायक-साधनानि**

कृदन्त प्रत्ययानां चित्रम्, श्यामपट्टः, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिश्च। कृदन्त अर्थात् कृत् + अन्त अथवा कृत् अर्थात् धातुः। यः प्रत्ययः धातोः अन्ते संयुज्य क्रियायाः निर्माणं करोति सः प्रत्ययः कृदन्तः उच्यते। एभिः वस्तुभिः प्रत्ययानां शिक्षणे सरलता भवति।

➢ **समयः**

होरार्धम् (30 मिनट)

➢ **शिक्षणविधिः**

1. सर्वप्रथमं शिक्षकाः छात्राणां चतुर्षुवर्गेषु विभाजनं कुर्युः। तेषाञ्च नामानि वसिष्ठः, जमदग्निः, भार्गवः कौशलः च निर्धारितानि कुर्युः।
2. पुनः वसिष्ठवर्गस्य छात्रान् सम्बोध्य वदन्तु—
   - भो छात्राः! कृदन्त प्रत्ययेषु कति के च प्रत्ययाः अपूर्ण कालस्य (Continuous Tense's) निर्माणं कुर्वन्ति। परस्परं विचिन्त्य वदन्तु सर्वे।
   - अस्मिन् वसिष्ठवर्गस्य छात्राः शतृ शानच् च इति प्रत्ययोः नाम्नी कथयिष्यन्ति।
3. शिक्षकाः पुनः जमदग्निः समूहस्य छात्रान् सम्बोध्य कथयन्तु—
   - छात्राः! परस्परं विचारविमर्शं कृत्वा भवन्तः वदन्तु यत् भूतकालार्थं (Past Tense) कति के च प्रत्ययाः प्रयुज्यन्ते?

- छात्राः अस्मिन् वदिष्यन्ति—गुरुवर! क्त क्तवतु च। एतयोः प्रत्यययोः प्रयोगं कृत्वा भाषायां भूतकालस्य क्रियायाः निर्माणं कर्तुं शक्यते।
- एतस्मिन् शिक्षकाः द्वाभ्यां वर्गाभ्याम् साधुवादने सह आशीर्वादमपि प्रदास्यन्ति।

4. पुनः शिक्षकाः भार्गववर्गस्य छात्रान् सम्बोधयन्तु यत् कति प्रत्ययाः अव्ययपदस्य क्रियाविशेषणस्य वा निर्माणं कुर्वन्ति।
   - छात्राः वदिष्यन्ति—त्रयः प्रत्ययाः।
   - शिक्षकाः पुनः कथयिष्यन्ति—ते के सन्ति?
   - छात्राः वदिष्यन्ति—ते क्त्वा, ल्यप् तुमुन् च भवन्ति।
5. पुनः संस्कृतशिक्षकाः कौशलवर्गस्य छात्रान् वदिष्यन्ति—
   - भो छात्राः! विधिलिङ् लकारस्य अर्थे प्रार्थनायाञ्च कति के च प्रत्ययाः भवन्ति?
   - तेषामुत्तरं यच्छन्तः छात्राः वदन्तु यत् तव्यत् अनीयर् च इति द्वौ-प्रत्ययौ विधिलिङ् लकारस्य अर्थे प्रयुज्येते। तौ एव प्रार्थनायामपि संयुज्येते।
6. तेषां उत्तराणि श्रुत्वा शिक्षकाः तेभ्यः प्रोत्साहनं स्वाशीर्वादञ्च यच्छेयुः। ते यथासमयं यथासम्भवं तालिकावादनाय अपि कक्षायाः छात्रान् प्रोत्साहितान् कुर्युः।

❑ **गृहकार्यम्**

1. शिक्षकाः छात्रेभ्यः गृहकार्यमपि प्रदास्यन्ति।
2. ते कतिचिद् छात्रेभ्यः संपठ्य, गच्छन्तः, दृश्यमाणेन, पठित्वा, आनीतम्, नीतवती, करणीयम् श्रोतव्यम् च इत्यादीनां पदानां प्रकृतिप्रत्ययं विभाजनार्थं कथयिष्यन्ति। छात्राः गृहेभ्यः तेषां पदानां प्रकृति-प्रत्ययानां विभाजनं कृत्वा आनेष्यन्ति।
3. कतिचिद् छात्रेभ्यः गम् + शतृ छात्रेभ्यः, कृ + शानच् छात्रस्य, सम् + पठ् + ल्यप्, दा + तव्यत् धनम् इत्यादीन् पदान् दत्वा तेषां रेखाङ्कितपदानां प्रकृति-प्रत्यय-संयोजनार्थं वदिष्यन्ति।

❑ **कार्यनिरीक्षणम्**

1. छात्रैः कृतं कार्यं आगामिदिवसे विद्यालये शिक्षकाः पश्येयुः।
2. ते छात्रेभ्यः उचितं मार्गदर्शनम् अपि यच्छेयुः। येन छात्राः उत्तमानि कार्याणि कुर्युः।

❑ **कक्षायाः कार्यकलापः हस्ताक्षरं वा**

1. शिक्षकाः कार्यनिरीक्षणसमये मध्ये-मध्ये उचितरूपेण छात्रान् प्रश्नान् अपि पृच्छेयुः।
2. छात्राणाम् उचितं कार्यं दृष्ट्वा शिक्षकाः तेषाम् उत्साहं अपि वर्धयन्तु।
3. ते मध्ये-मध्ये तालिकावादनमपि कारयन्तु।
4. पुनः ते छात्राणाम् उत्तरपुस्तिकायां स्वहस्ताक्षरम् अपि कुर्वन्तु।

---

**विषयः — प्रत्ययाः** **उपविषयः — तद्धित एवं स्त्रीप्रत्ययाः**

❑ **क्रियाकलापः— 6 : शब्दैः धातुभिः सह कथं संज्ञा, विशेषणं पुंल्लिङ्गात् स्त्रीलिङ्गस्य च निर्माणं कथं भवेत्; इत्यस्य ज्ञानं करणम्।**

➢ **उद्देश्यम्**

1. मूलशब्दैः विशेषणस्य निर्माणं करणम्।
2. विशेषणस्य सम्यक्तया वाक्येषु भाषायाम् वा प्रयोगः करणम्।

3. पुंल्लिङ्ग पदानाम् स्त्रीलिङ्गे परिवर्तनं करणम्।
4. धातुभ्यः शब्दानाम् निर्माणं सम्यक्तया करणम्।

➢ **मूल्याङ्कनम् कौशलविकासो वा :**

1. भाषायाम् प्रयुक्तानाम् पदानां निर्माणं मूलधातुभिः सह एव भवति। यदा धातुभिः सह प्रत्ययाः प्रयुज्यन्ते तदा नाम, विशेषणं, लिङ्ग परिवर्तनं वा जायन्ते।
2. तद्धित-स्त्री प्रत्ययानां प्रयोगेण शब्दभण्डारणक्षमता वर्धते।
3. तेन शब्दकोशानां शब्दशक्तिः संवर्ध्य भाषा परिपुष्टा भवति।

➢ **समयः**

होरार्धम् (30 मिनट)

➢ **सहायक-साधनानि**

1. विशेषणस्य, स्त्रीलिङ्गशब्दानां मूल धातु-शब्दानां वा चित्रमयं प्रदर्शनपट्टम्, मार्जनी, सङ्केतयष्टिः, श्यामपट्टः सुधाखण्डाश्च!
2. ये प्रत्ययाः शब्दानां पश्चात् संयुज्य विशेषणस्य निर्माणं कुर्वन्ति ते तद्धिताः स्त्रीप्रत्ययाः वा कथ्यन्ते। एभिः भाषा बलवती परिपुष्टा वा जायते।

➢ **शिक्षण (अध्यापनं) विधिः**

1. एतत्कार्यार्थं शिक्षकाः कक्षायाः छात्राणां त्रीन् वर्गान् रचयन्तु।
2. ते तेषां वर्गाणां हरितः, धवलः रक्तश्च इति नामानि धारयन्तु।
3. पुनः छात्राणां नामानुसारं पंक्तीन् रचयित्वा सर्वप्रथमं हरितः वर्गस्य छात्रान् सम्बोध्य पृच्छन्तु—
   - भो छात्राः! युक्तः (वाला, वाली) अर्थेण युक्तस्य पदस्य अन्ते कौ प्रत्ययौ प्रयुज्येते? सम्यक्तया विचिन्त्य वदन्तु भवन्तः।
   - छात्राः तस्य उत्तरं मतुप् इन् (णिनि, णिन्) च प्रत्ययौ कथयिष्यन्ति।
4. ततः शिक्षकाः धवलः इति वर्गस्य छात्रान् पृच्छन्तु—
   - यूयं वदत—शब्दैः सह कौ प्रत्ययौ संयुज्य भाववाचकं पद निर्माणयतः?
   - छात्राः उदिष्यन्ति—गुरुवर! त्व एवं तल् प्रत्ययौ ईदृशौ स्तः।
5. पश्चात् पुनः शिक्षकाः छात्रान् 'ठक्' प्रत्ययस्य विषये कथयिष्यन्ति यत् अस्य प्रत्ययस्य कः अंशः शब्देन सह प्रयुज्यते?
   - छात्राः—गुरुवर! ''इक'' अंशः। अनेन प्रत्ययेन तस्मात् शब्दात् निर्मितपदस्य निर्माणं भवति।
6. शिक्षकाः छात्रेभ्यः साधुवादन् यच्छन्तः तालिकाञ्च वादयन्तः रक्तवर्गस्य छात्रान् सम्बोध्य कथयिष्यन्ति—
   - बालाः! वदन्तु भवन्तः, स्त्रीप्रत्ययाः कति सन्ति? तेषाञ्च प्रयोगेण मूलशब्दे किं परिवर्तनं जायते?
   - छात्राः ''टाप्'' एवं ङीप् इति द्वयोः प्रत्ययोः नामनी कथयिष्यन्ति।
   - ते तयोः प्रयोगेन शब्देषु ''आ'' अथवा ''ई'' अंशस्य सम्मेलनं कृत्वा आकारान्त एवं ईकारान्त पदानां निर्माणं अपि वदिष्यन्ति।
   - एवमेव शिक्षकाः तान् ल्युट्, क्तिन्, तसिल् तृच् च प्रत्ययणां विषयेऽपि प्रक्ष्यन्ति।
   - छात्राः यथाज्ञानं तेषां प्रश्नानाम् उत्तराणि अपि दास्यन्ति।
   - गुरुजनाः सर्वेभ्यः साधुवादं वदिष्यन्ति, सर्वान् छात्रान् च तालिका वादनं कर्तुं प्रेरयिष्यन्ति।

❑ **गृहकार्यम्**

1. एवमेव शिक्षकाः छात्रेभ्यः गृहात् अपि कार्यं कृत्वा श्वः कक्षायाम् आनेतुं कथयिष्यन्ति।
2. ते छात्रान् प्रत्ययाणाम् एकं चित्रमयं प्रदर्शन model निर्माण कक्षायाम् आनेतुमपि वदिष्यन्ति।
3. अध्यापकाः छात्रान् प्रत्येकं प्रत्ययानां पञ्च-पञ्च पदानि निर्माण आनेतुं कथयिष्यन्ति।

❑ **कार्यनिरीक्षणम्**

1. आगामिदिवसे शिक्षका: छात्रैः कृतं गृहकार्यं द्रक्ष्यन्ति।
2. ते छात्रान् सुकार्यार्थं प्रोत्साहनस्वरूपं तालिकावादनमपि कारयिष्यन्ति।

❑ **प्रश्नकार्यम्**

ततः ते छात्राणां ज्ञानं परीक्षितुं पाठानुरूपं प्रश्नान् अपि प्रक्ष्यन्ति; यथा—गृहतः, शक्तिमान्, दानी, गृहिणी, रूपी, इत्यादीषु पदेषु के प्रत्यया: सम्मिलिता: सन्ति?

❑ **सामान्यकार्यकलापः हस्ताक्षरो वा**

कक्षायां छात्राणां उत्तमं प्रदर्शनार्थं शिक्षका: तेभ्यः प्रोत्साहनं स्व-आशीर्वादं च दास्यन्ति।

पुनः ते छात्राणाम् उत्तरपुस्तिकायां स्वहस्ताक्षरम् अपि करिष्यन्ति।

---

**विषयः — वाक्येषु अव्ययप्रयोगः** **उपविषयः — अव्ययाः**

❑ **क्रियाकलापः— 7 : "यस्य न व्ययः इति अव्ययः" अर्थात् यत् पदं केषुचिद् वचनेषु विभक्तिषु लिङ्गेषु वा न परिवर्तते सः अव्ययः कथ्यते। तेषां वाक्येषु कथं प्रयोगो भवति इत्यस्य ज्ञानम् अनेन प्रकरणेन जायते।**

➢ **उद्देश्यम्**

1. सार्थकानां सोद्देश्यानां वा वाक्यानां निर्माणम्।
2. वाक्यांशस्य अव्ययस्य वा परिपूर्णतां प्रदर्शनम्।
3. अव्ययानां सार्थकताम् उपयोगितां वा कथनम्।
4. अव्ययानां महत्त्वं प्रदर्श्य भाषायां संयोजनं प्रदर्शनम्।

➢ **कौशल-विकासः**

1. छात्राः अव्ययानां सहायतया सार्थकानां वाक्यानां निर्माणे समर्थाः भविष्यन्ति।
2. ते न्यूनतमपदैः सरलतया सार्थक शब्द-संयोजने सफलाः भवितुमर्हन्ति।
3. शब्द-धातु रूपेभ्यः रहिताः अव्ययाः छात्राणां कृते सङ्ख्याः भविष्यन्ति।

➢ **समयः**

होरार्धम् (30 मिनट)

➢ **सहायक-साधनानि**

1. केषाञ्चिद् अव्ययानां चित्रम्, श्यामपट्टः, सङ्केतयष्टिः, सुधाखण्डाः, मार्जनी आदयः।
2. शिक्षकाः चित्रं प्रदर्श्य छात्रान् अव्ययान् पाठयिष्यन्ति।

➢ **शिक्षणविधिः**

1. शिक्षकाः कक्षायां छात्रान् चतुर्षु पङ्क्तिषु उपवेशयन्तु। पुनः ते तेषां नामानि धृतिः, क्षमा, दमः अस्तेयम् च करिष्यन्ति।
2. पुनः ते प्रदर्शनचित्रं कक्षायाम् अवलम्ब्य छात्रान् दर्शयिष्यन्ति अव्ययानां च प्रकृतिः स्वरूपं वा प्रक्ष्यन्ति।
3. पुनरपि ते धृतिः समूहस्य छात्रान् सम्बोध्य प्रक्ष्यन्ति—

   भो छात्राः! श्यामपट्टे लिखितानाम् अधुना, ततः, चन, कुत्र, कदा, अत्र च आदीनाम् अव्ययानाम् अर्थम् उक्त्वा वाक्येषु प्रयुज्यन्तु। छात्राः तत्कृत्वा शिक्षकस्य सम्मानं करिष्यन्ति।

4. एवमेव क्षमा समूहस्य छात्राणां कृते शिक्षकाः पञ्च-दश वाक्यानि दत्वा तेषां रिक्तस्थानानि उचितैः अव्ययैः पूर्त्यर्थं कथयिष्यन्ति।
   - यथा— ............ (1) रविवारः भविष्यति यतः ............ (2) शुक्रवासरः आसीत्। ............ (3) शनिवासरः अस्ति। ............ (4) रामः अयोध्यायाम् अजायत। नृपस्य हरिश्चंद्रस्य कालः ............ (5) आसीत्, तत्केनापि न ज्ञायते।
   - पुनरपि छात्राः तथैव करिष्यन्ति।
5. गुरुजनाः अधुना दमः इति वर्गस्य छात्रान् सम्बोध्य वदेयुः—
   शिष्या! निम्नवाक्येषु दत्तेषु अव्ययेषु उचितम् अव्ययं चित्वा रिक्तस्थानानि पूरयत; यथा—
   - ................ हिमालये ऋषयः अभवन्। (अधुना/ह्यः/पुरा)
   - ................ मम विद्यालये वार्षिकोत्सवः भविष्यति। (श्वः/ह्यः/अद्य)
   - त्वया ................ किं कर्तव्यम्? (कुत्र/कदा/अधुना)
   - अधुना रामः ................ गम्यते? (इदानीम्/कुत्र/श्वः)
   - कति ................ छात्राः विद्यालयं गच्छन्ति। (चन/तत्र/चित्)

   छात्राः दत्तेषु अव्ययेषु उचितम् अव्ययं चित्वा वाक्यपूर्तिं कुर्वन्तु।
6. शिक्षकाः प्रसन्नाः भूत्वा तेभ्यः साधुवादं दास्यन्ति। पुनः ते अस्तेयवर्गं पृच्छन्तु—
   - भो छात्रा! निम्नअव्ययानाम् अर्थं वदन्तु— इदानीम्, कुतः, तत्र, अद्य, पुरा, कदाचन, चिरम्, क्षिप्रम्, परितः आदयः।
   - छात्राः तेषामुत्तराणि सम्यक्तया प्रदास्यन्ति।
   - शिक्षकाः प्रसन्नतया तेभ्यः साधुवादं प्रदाय तालिकावादनं कारयिष्यन्ति।

### ❑ गृहकार्यम्

कक्षाकार्यस्य पश्चात् शिक्षकाः छात्रेभ्यः गृहकार्यं दास्यन्ति। ते छात्रान् दश अव्ययान् चित्वा वाक्येषु प्रयुज्य आनेतुं कथयिष्यन्ति।

### ❑ कार्यनिरीक्षणम्

1. शिक्षकाः, छात्रेभ्यः दत्तं कार्यम् आगामिदिवसे निरीक्षणं करिष्यन्ति।
2. ते श्रेष्ठकार्यार्थं छात्रेभ्यः साधुवादमपि प्रदास्यन्ति।

### ❑ प्रश्नकार्यम्

1. शिक्षकाः मध्ये-मध्ये छात्रान् निश्चिते विषये प्रश्नान् पृष्ट्वा छात्राणां ज्ञानस्य परीक्षणं करिष्यन्ति।
2. छात्राः अपि यथासम्भवं प्रश्नानाम् उत्तराणि दातुं प्रयतिष्यन्ते।

### ❑ शिक्षकहस्ताक्षरम्

छात्राणां कार्यं निरीक्ष्य प्रश्नान्ते शिक्षकाः प्रसन्नाः भूत्वा हस्ताक्षरमपि तेषाम् उत्तरपुस्तिकायाम् करिष्यन्ति। श्रेष्ठ कार्यार्थञ्च छात्रान् प्रोत्साहितान् करिष्यन्ति।

---

## विषयः — वाच्य

## उपविषयः — वाच्यपरिवर्तनम्

**❑ क्रियाकलापः— 8 : वाक्यानां निर्माणविधा एव वाच्यं भवति। तस्य परिवर्तनं कृत्वा वाक्यप्रयोगविधिः एव 'वाच्यपरिवर्तनं' भवति। अस्मिन् पाठे तस्याः विधायाः एव विवेचनं क्रियते।**

### ➢ उद्देश्यम्

1. वाच्यपरिवर्तनस्य उद्देश्यम् सम्यक्तया वाक्यप्रयोगस्य कुशलता एवास्ति।
2. भाषायाः प्रयोगे सरलता व्यावहारिकता च भवेत्।
3. भाषायां लावण्यं सौन्दर्यं वा भवितव्यम्।
4. वाक्यनिर्माणविधिः यदि अनेकशः भवति तदा भाषायाः सौन्दर्यं वर्धेत।

➢ **कौशलविकासः मूल्याङ्कनम् वा :**

1. वाक्यरचनायाम् सरलता जायते।
2. श्रोतृणाम् हृदये वक्तारं प्रति प्रेमं उद्भवति।
3. जनाः एतादृशाय वाक्ये स्नेहं यच्छन्ति।
4. श्रोतृणाम् जनानां हृदये श्रेष्ठवाक्यानां प्रभावो भवति।
5. भाषायाः क्षेत्रे प्रावीण्यं जायते।

➢ **सहायक-साधनानि**

1. वाच्यपरिवर्तनस्य चित्राङ्कनम्, श्यामपट्टः, मार्जनी, सुधाखण्डाः, सङ्केतयष्टिः।
2. शिक्षकाः श्यामपट्टे एतादृशं लिखित्वा वाच्यपरिवर्तनं पाठयिष्यन्ति।

वाच्यः

↓ ↓ ↓

| कर्तृवाच्यः | कर्मवाच्यः | भाववाच्यः |
|---|---|---|
| (कर्त्ता-प्रधानम्) | (कर्म-प्रधानम्) | (भाव-प्रधानम्) |

3. वाक्ये यस्य प्रधानता भवति तस्मिन् प्रथमा विभक्तिः भवति, क्रिया अपि तदाधारिता भविष्यति।

➢ **समयः**

होरार्धम् (30 मिनट)

➢ **शिक्षणविधिः**

1. सर्वप्रथमं शिक्षकाः वाच्यपरिवर्तनस्य प्रदर्शनचित्रम् एकस्मिन् स्थाने स्थापयिष्यन्ति।
2. पुनः ते छात्राणां त्रीन् वर्गान् ब्रह्मा, विष्णु, शिवः इति नामभिः रचयेयुः।
3. तत्पश्चात् शिक्षकाः प्रथमवर्गस्य ब्रह्मानाम्नः छात्रान् प्रश्नम् पृच्छेयुः यत्—भो शिष्याः! कति वाच्याः भवन्ति?
   - शिष्याः वदिष्यन्ति—त्रयः।
   - शिक्षकाः श्यामपट्टे लेखिष्यन्ति—कर्तृवाच्यस्य स्वरूपं किम्?
   - शिष्याः—कर्तृवाच्ये कर्त्ता-प्रधानं भवति। तस्मिन् कर्तरि प्रथमाविभक्तिः कर्मणि द्वितीयाविभक्तिः क्रिया च कर्तुः अनुसारं भवति।

     **यथा**—सः ग्रामं गच्छति।

     अस्मिन् सर्वे शिष्याः प्रमुदिताः भूत्वा तालिकावादनं करिष्यन्ति शिक्षकाश्च साधुवादान् दास्यन्ति।
4. पुनः शिक्षकाः विष्णुः इति वर्गस्य प्रश्नं लेखिष्यन्ति—
   - कर्मवाच्यस्य विवेचनं कुर्वन्तु भवन्तः।
   - छात्राः—गुरुवर! कर्मवाच्ये कर्तरि तृतीया विभक्तिः, कर्मणि प्रथमा विभक्तिः एवं क्रिया कर्मानुसारेण आत्मनेपद रूपे मूलधातुना सह 'य' अक्षरं संयुज्य भवति; यथा—तेन ग्रामः गम्यते।
5. पश्चात् शिक्षकाः शिवः इति नामधेयं वर्गं पृच्छेयुः—
   - बालाः! यूयम् वदत—भाववाच्ये कर्तरि क्रियायां च का विभक्तिः प्रयुज्यते?
   - छात्राः वदिष्यन्ति—गुरुवर! भाववाच्ये कर्तरि तृतीया विभक्ति तथा क्रियायां अकर्मकधातोः प्रथम पुरुषस्य एकवचनं भवति; यथा—तैः स्थीयते। रामेण हस्यते आदयः।

   शिक्षकाः—सर्वेभ्यः साधुवादम्। सर्वे सुष्ठु उत्तराणि अयच्छन् अतः मम आशीर्वादं सर्वेभ्यः। सर्वे तालिकावादनं कुर्वन्ति।

## ❑ गृहकार्यम्

1. शिक्षका: छात्रेभ्य: प्रत्येकं वाच्यस्य त्रीणि-त्रीणि वाक्यानि लिखिता श्व: कक्षायाम् आनेतुं कथयिष्यन्ति।
2. ते छात्रान् वाच्यपरिवर्तनस्य प्रदर्शनपट्टम् model अपि सज्जीकृत्य प्रदर्शनार्थम् आनेतुं कथयिष्यन्ति।

## ❑ कार्यनिरीक्षणम्

1. कक्षायां शिक्षका: आगामिदिवसे छात्रै: आनीतं कार्यं अवलोकयिष्यन्ति।
2. ते उत्तमाय कार्याय छात्रान् प्रोत्साहितान् अपि करिष्यन्ति।
3. श्रेष्ठकार्यार्थं ते छात्राणां प्रशंसामपि करिष्यन्ति।

## ❑ हस्ताक्षरम्

1. शिक्षका: छात्राणां कार्यं दृष्ट्वा तस्योपरि स्वहस्ताक्षरं करिष्यन्ति।
2. योग्येभ्य: छात्रेभ्य: च पुरस्कारमपि दास्यन्ति।

---

**विषय: — समय:** **उपविषय: — समयलेखनम्**

❑ **क्रियाकलाप:— 9 : समय ज्ञानं जीवनस्य अनिवार्यम् अङ्गं वर्तते। अत: समय ज्ञानं अतीव महत्त्वं धारयति। जनानां दिनचर्यां समये एव आधारिता वर्तते। संस्कृतभाषायां समयलेखनं पुरातन समयात् एव प्रचलति। अत: छात्राणां कृते समयलेखनस्य ज्ञानम् उचितं प्रतीयते।**

### ➢ उद्देश्यम्

1. छात्रा: समयस्य महत्त्वं जानन्तु। ते समयस्य महत्त्वं ज्ञात्वा स्वदिनचर्यां समुचितम् कुर्वन्तु।
2. समयज्ञानं जीवनेन सह सम्बन्धितम् अस्ति अत: समयस्य प्रतिष्ठा कर्तव्या।
3. समयस्य ज्ञानं प्राप्य जना: जीवनस्य महत्त्वमपि जानन्तु।
4. समयं वृथा न यापयेत् यत: समय: सदैव मानवजीवने एकरस: न भवति।

### ➢ मूल्याङ्कनम् कौशलविकासो वा :

1. समयलेखनम् समयस्य महत्त्वं प्रतिपादयति।
2. अनेन समयस्य अपव्यय: रुध्यते।
3. संस्कृतभाषायामपि इयं विद्या महत्त्वं धारयति अत: छात्रेभ्य: समयलेखनस्य कार्यमपि महत्त्वपूर्णं वर्तते। छात्रा: समयस्य ज्ञानं प्राप्य समयस्य सदुपयोगं कुर्वन्ति।

### ➢ समय:

पञ्चदशकला परिमितम् (15 मिनट)

### ➢ सहायक-साधनानि

समयस्य चतुर्णां पादानां चित्राङ्कनम् श्यामपट्ट:, मार्जनी, सुधाखण्डा: सङ्केतयष्टिश्च।

### ➢ शिक्षणविधि:

1. सर्वप्रथमं शिक्षकमहोदया: कक्षाया: छात्रान् चतुर्षु वर्गेषु विभजन्तु; तेषाञ्च नामानि—मेधा, कर्म, ज्ञानम्, फलम् आदीनि भवेयु:।
2. तत: शिक्षका: सर्वान् छात्रान् स्व-स्वसमूहेषु गन्तुं प्रेरयन्तु।
3. तत्पश्चात् सर्वप्रथमं ते समयस्य चतुर्णां पादानां; यथा—पूर्णम्, सपाद, सार्ध पादोन च चित्राङ्कनम् कक्षायाम् अवलम्बयन्तु।
4. पुन: मेधावर्गस्य छात्रान् आहूय 1.15, 4.15, 9.15, 11.15, 6.15 एवं 7.15 इत्यादीनां समयान् श्यामपट्टे लिखित्वा तेषां संस्कृतपदानि पृच्छन्तु।

5. छात्राः सपादएकवादनम्, सपादचतुर्वादनम् ........................... इत्यादीन् कथष्यिन्ति।

6. पश्चात् शिक्षकाः कर्मसमूहस्य छात्रान् आहूय तेभ्योऽपि श्यामपट्टे 2.30, 3.30, 5.30, 7.30, 10.30, 12.30 इत्यादीः सङ्ख्याः लेखिष्यन्ति एवं छात्रान् तासाम् संस्कृतपदानां लेखनाय वदिष्यन्ति।

7. छात्राः अपि तासाम् सङ्ख्यानां सार्धद्वि, सार्धत्रयो, सार्धपञ्च इत्यादीन् पदान् लेखिष्यन्ति।

8. शिक्षकाः एतेभ्यः उत्तरेभ्यः प्रसन्नाः भूत्वा तेभ्यः सर्वेभ्यः साधुवादेन सह आशीर्वादं दास्यन्ति।

9. पुनः शिक्षकाः तृतीय-वर्गस्य 'ज्ञानस्य' छात्रान् सम्बोध्य वदिष्यन्ति।

   - भो छात्राः! 'पादोन' समयस्य कानिचिद् उदाहरणानि लिखत।—छात्राः गुरोः आदेशं प्राप्य यथाशक्ति उदाहरणानि अधोलिखितानुसारं वदिष्यन्ति—पादोन-एकवादनम्, पादोन-द्विवादनम्, पादोन-त्रयोवादनम् आदयः।

10. तत्पश्चात् अध्यापकाः चतुर्थस्य 'फलम्' समूहस्य छात्रान् आहूय वादिष्यन्ति—

    - भो पुत्राः! क्रमशः एकः एकः छात्रः आगत्य अधोलिखितान् समयान् संस्कृतभाषायां लिखतु— 1.00, 4.00, 5.00, 6.00, 9.00, 12.00 आदि।

11. छात्राः गुरु-आज्ञां संप्राप्य श्यामपट्टे यथाक्रमम् आगत्य—एकवादनम्, चतुर्वादनम्, पञ्चवादनम्, षड्वादनम्, नववादनम् द्वादशवादनम च लेखिष्यन्ति।

12. अन्ते शिक्षकाः सर्वेभ्यः छात्रेभ्यः प्रसन्नतया स्वाशीर्वादम् दास्यन्ति।

## ❑ गृहकार्यम्

1. एवमेव शिक्षकाः छात्रान् प्रत्येकं प्रकारस्य समयस्य पञ्च-पञ्च उदाहरणानि गृहे लेखितुम् कथयन्तु।
2. छात्राः अपि गुर्वाज्ञां मत्वा तत्करिष्यन्ति।

## ❑ कार्यनिरीक्षणं प्रश्नकार्यम् च

1. आगामिदिवसे शिक्षकाः छात्रान् आहूय गतदिवसस्य गृहकार्यं दर्शयितुं कथयिष्यन्ति।
2. छात्राः अपि यथाक्रमम् आगत्य स्वकार्यं दर्शयिष्यन्ति।
3. सहैव शिक्षकाः तान् प्रश्नान् अपि पृच्छन्तु; यथा—सार्धसप्तवादनम्, पादोन-नववादनम्, सपादचतुर्वादनम् षड्वादनम् च सङ्ख्यायां लिखन्तु।
4. छात्राः तथैव शुद्धम् लिखन्तु।

## ❑ शिक्षक-हस्ताक्षरम्

1. शिक्षकाः छात्राणां कार्य-निरीक्षण पश्चात् तेषाम् अभ्यास-पुस्तिकायां स्वहस्ताक्षरं उत्तमटिप्पणिना सह करिष्यन्ति।
2. छात्रेभ्यः साधुवादम् अपि दास्यन्ति।

---

## विषयः — उपपदविभक्तिः प्रत्ययाश्च     उपविषयः — वाक्यसंशोधनम् शब्दशुद्धिः च

### ❑ क्रियाकलापः— 10 : वाक्यानां संशोधनम् प्रत्ययान्त-शब्दानां च निर्माणम्।

**➢ उद्देश्यम्**

1. विभिन्न विशेष शब्दैः सह का विभक्तिः प्रयुज्यते तस्याः च किं महत्त्वम् कश्च प्रयोगः इत्यस्य ज्ञानम् करणम्।
2. धातुभिः सह प्रत्ययानां प्रयोगो भूत्वा कथं क्रिया, क्रियाविशेषणं विशेषणं च भवन्ति; एतस्य अपि ज्ञानं भवेत्।

- **कौशल-विकासः**
  1. छात्राणां बौद्धिकः विकासः भवेत्।
  2. तेषां निरीक्षणक्षमतायाः विकासः भवेत्।
  3. वाक्यानाम् अशुद्धि-शोधनम् शुद्धा क्रिया च निर्मिता भवेत्।
- **समयः**
  होरार्धम् (30 मिनट)
- **सहायक-साधनानि**
  व्याकरणपुस्तकम्, मार्जनी, सुधाखण्डाः, श्यामपट्टः, सङ्केतयष्टिः आदयः।
- **शिक्षणविधिः**
  1. शिक्षकाः छात्रान् चतुर्षु वर्गेषु विभक्ताः करिष्यन्ति।
  2. द्वौ वर्गौ उपपदविभक्तिनां कृते द्वौ च वर्गौ प्रत्ययानां कृते भविष्यन्ति।
  3. अध्यापकाः छात्रेभ्यः अपूर्णं वाक्यं दत्वा तस्य मध्ये आगतस्य उपपदशब्दस्य प्रयोगं कारयिष्यन्ति। पुनः अशुद्धं वाक्यं दत्वा तस्य शोधनार्थमपि छात्रान् प्रेरयिष्यन्ति।
  4. एवमेव धातुं दत्वा प्रत्ययं च निर्दिश्य क्रियायाः क्रियाविशेषणस्य च निर्माणार्थं छात्रान् वदिष्यन्ति। पुनः क्रियां क्रियाविशेषणं च दत्वा ते धातु-प्रत्ययानां विभाजनं प्रक्ष्यन्ति।
  5. छात्राः अपि स्वज्ञानानुसारम् उत्तराणि दास्यन्ति।

## शिक्षकाय निर्देशाः

1. सर्वेषां छात्राणां क्रमः आगच्छेत् इत्यस्य ध्यानं अवश्यमेव दद्यात्।
2. कश्चिदपि छात्रः अनुत्तरितः न भवेत्।
3. उत्तरार्थं वर्गेभ्यः अङ्काः अपि प्रदास्यन्ते।
4. यस्य वर्गस्य अधिकाः अङ्काः भविष्यन्ति सः वर्गः विजयी भविष्यति।

## कक्षाकार्यम्

1. सीता रामं स्वमुद्रिकाम् अयच्छत्। इति वाक्यं शुद्धं कृत्वा लिखन्तु।
2. 'नगरस्य निकषा' इति वाक्यम् अपि शुद्धं कुरु।
3. 'नमः कृष्णम्' इति वाक्ये का अशुद्धिः वर्तते?

## गृहकार्यम्

1. शिक्षकाः छात्रेभ्यः अशुद्धान् वाक्यान् दत्वा तेषां शोधनाय **अथवा** विशेष-उपपदान् दत्वा तेषां वाक्येषु प्रयोगाय कार्यं यच्छन्तु; यथा—सीता रामेण सह वनं अगच्छत्। अत्र 'रामेण' इति पदे का विभिक्तिः किमर्थं च आगता?
2. मम विश्वासः तस्मिन् वर्तते। अत्र रेखाङ्किते पदे का विभक्ति केन च कारणेन?

## मौखिकप्रश्नाः

शिक्षकाः सुविधानुसारं छात्रान् प्रश्नमपि प्रक्ष्यन्ति; यथा—''प्रयोजने'' का विभक्ति प्रयुज्यते? उदाहरणेन सह उत्तरत।

## निर्दिष्टः क्रियाकलापः

1. शिक्षकाः छात्रान् कलाकर्गदद्वये उपपदशब्दानां प्रत्ययानाञ्च चित्राङ्कनाय निर्देशनम् यच्छन्तु। यस्य छात्रस्य कार्यम् सुन्दरं भवेत् तस्य कार्यस्य कक्षायां टङ्कनम् कुर्युः।
2. यस्य छात्रस्य कार्यम् उत्तमं भविष्यति तस्य कृते तालिकावादनमपि कारयिष्यन्ति।

## क्रियाकलापः— 11 : लिङ्ग-विभक्ति-वचनानां ज्ञानम्

### उद्देश्यम्

1. छात्राणां योग्यता शब्द-धातु रूपैः सह वाक्यनिर्माणे भवेत्।
2. ते पाठस्य अर्थं ज्ञातुं समर्थाः भवेयुः।
3. संस्कृत-पठन-पाठन, लेखन-श्रवण-वाचन इत्यादीनां योग्यता भवेत्।
4. शब्दानां मध्ये अन्तर-ज्ञातुं योग्यता भवेत्।
5. शब्दनिर्माणस्य, वर्तनी अवलोकनस्य अपि सामर्थ्यम् आगच्छेत्।
6. दैनिकव्यवहारे संस्कृतस्य प्रयोगाय योग्यता भवेत्।

### समयः

होरार्धम् (30 मिनट)

### सहायक-साधनानि

व्याकरणपुस्तकम्, मार्जनी, सुधाखण्डाः, श्यामपट्टः, सङ्केतयष्टिः आदयः।

### शिक्षणविधिः

1. शिक्षकाः छात्रान् अजन्तशब्दानां रूपाणि अवबोधयेयुः। तेषां मध्ये अन्तरं अपि दर्शयेयुः।
2. तत्पश्चात् हलन्त शब्दानां मध्ये समानतां-भिन्नतां वा कथयित्वा तेषां रूपाणि अवबोधयेयुः।
3. एवमेव सङ्ख्यावाचक शब्दानां लिङ्ग-विभक्ति-वचनानुसारम् अन्तरं बोधयेयुः; यथा—'एक' पदस्य रूपं एकवचने एव चलिष्यति, 'द्वि' पदस्य रूपं केवलं द्विवचने एव तथा त्रि-चतुर्-पञ्चन् शब्दानां रूपाणि बहुवचने एव चलिष्यन्ति।
4. सङ्ख्यावाचक शब्दानां रूपाणाम् आधारः सर्वनामशब्दाः भविष्यन्ति।
5. अनेन प्रकारेण धातुरूपाणां अपि रूपाणि परस्मैपदे 'दृश् (पश्य्)' इव एवं आत्मनेपदे 'सेव्' इव, उभयपदे च द्वयोः इव चलिष्यन्ति।

### कौशल-विकासः

1. अनेन छात्राणां शब्द-धातुरूपाणां ज्ञाने योग्यता वर्धिष्यते। तेषां सहायतया छात्राः विभिन्नवाक्यानां निर्माणं कृत्वा सम्यक्तया भाषायाः ज्ञानं योग्यतां वा प्राप्स्यन्ति।
2. पुस्तकपठनस्य सूक्तिपठनस्य च योग्यता आगते सति ते पाठस्य अन्य भाषायाम् रूपान्तरणं कर्तुं पारयिष्यन्ति।
3. संस्कृतभाषणकौशलस्य च विकासः योग्यता वा भविष्यति।

## शिक्षकाय निर्देशाः

1. शिक्षकमहोदयाः छात्रान् प्रत्येकं शब्दानां रूपं धातूनाञ्च रूपं कक्षायां प्रक्ष्यन्ति।
2. छात्राः स्वस्मरण-ज्ञानानुसारं तेषाम् उत्तराणि प्रदास्यन्ति।
3. छात्रैः या अशुद्धिः भविष्यति तस्याः संशोधनाय शिक्षकाः तान् प्रेरयिष्यन्ति। वाक्येषु तेषाम् उपयोगं कृत्वा भाषायाः ज्ञाने प्रवीणाः भविष्यन्ति।

## कक्षाकार्यम्

1. 'चतुर्' शब्दस्य पुंल्लिङ्गस्य सप्तमी विभक्तौ किम् रूपं भविष्यति?
2. 'नी' धातोः विधिलिङ्लकारस्य उत्तमपुरुषे कानि रूपाणि भविष्यन्ति?

## ❑ गृहकार्यम्

एवमेव अन्येषां शब्दानां रूपाणि अपि छात्राः स्मरिष्यन्ति।

छात्राः निम्नधातुरूपेषु एकम् एकं धातुरूपं स्मृत्वा आगमिष्यन्ति; यथा—

सेव्, वृत्, दृश्, नी धातवः केवलं लोट् तथा विधिलिङ्लकारयोः।

## ❑ मौखिकप्रश्नाः

1. ततः ते मौखिकप्रश्नान् पृष्ट्वा तान् प्रोत्साहितान् अपि करिष्यन्ति।
2. मध्ये-मध्ये यदि करतल ध्वनिः भविष्यति तर्हि छात्राः प्रसन्नाः भविष्यन्ति।

## ❑ निर्दिष्टः क्रियाकलापः

छात्रा! एवमेव भवन्तः अन्य रूपाणि अपि स्मरन्तु। एवम् अन्यैः सह तेषां तुलनां कृत्वा सम्यक् अवबोधयन्तु।

---

## विषयः — उपपदविभक्तयः तथा प्रत्ययज्ञानम् उपविषयः — वाक्यसंशोधनम् प्रत्ययाश्च

## ❑ क्रियाकलापः — 12 : अशुद्धि-शोधनम्

### ➢ उद्देश्यम्

1. छात्राणां वाक्यानि शुद्धानि भवेयुः।
2. ते वाक्यनिर्माणे उपपदविभक्तिनां प्रयोगं कर्तुं समर्थाः भवेयुः।
3. अपूर्ण (वर्तमान, भूत, भविष्य) काले एवं भूतकाले ते क्रियायाः निर्माणे धातुरूपाणि विना अपि योग्याः भवेयुः।
4. प्रत्ययानां प्रयोगः कदा भवितुम् शक्यते इत्यस्य अपि ज्ञानम् प्राप्नुयात्।

### ➢ समयः

होरार्धम् (30 मिनट)

### ➢ सहायक-साधनानि

व्याकरण-पुस्तकम्, लघुवाक्यानां पट्टम्, प्रत्यययुक्ताः शब्दाः, श्यामपट्टः, मार्जनी, सुधाखण्डाः सङ्केतयष्टिका च।

### ➢ शिक्षणविधिः

1. सर्वप्रथमं कक्षायां शिक्षकमहोदयाः एकं वाक्यं वदिष्यन्ति। तस्य लेखनम् अपि श्यामपट्टे करिष्यन्ति। पुनः छात्रान् सूक्ष्मतया वाक्यं द्रष्टुम् प्रेरयिष्यन्ति।
2. यस्मिन् शब्दे कारकनियमानाम् अनुसारेण निर्धारिता विभक्तिः न भविष्यति तस्य कारणं ते छात्रान् प्रक्ष्यन्ति।
3. छात्राणाम् अनुत्तरभवति सति ते तस्य कारणं कथयिष्यन्ति;
   यथा—परितः, उभयतः, समया, विना योगे द्वितीया विभक्तिः, विना, अलम्, हीनः योगे तृतीया विभक्तिः आदि।
4. शतृ, शानच् प्रत्ययौ निरन्तर-क्रियायां क्त क्तवतु च प्रत्ययौ भूतकाले प्रयुज्येते।
5. पश्चात् छात्राः तान् नियमान् ज्ञात्वा वाक्यनिर्माणं क्रियानिर्माणञ्च करिष्यन्ति।

### ➢ कौशल-विकासः

1. अनेन कारणेन छात्रेषु वाक्य-निर्माण-कौशलं वर्धिष्यते।
2. वाक्यानां शोधनस्य एवं शुद्धवाक्यानां लेखनस्य अपि विकासः भविष्यति।
3. छात्राः शुद्धं वाक्यं लिखित्वा कक्षायां प्रदर्शयिष्यन्ति।
4. छात्राः दश धातुभिः सह शतृ, शानच्, क्त, क्तवतु, प्रत्यानाञ्च संयोजनं कृत्वा चत्वारिंशत् पदानां निर्माणं करिष्यन्ति।

- **शिक्षकाय निर्देशाः**

1. छात्राः निर्धारितानां नियमानाम् अनुसारेण एव वाक्यसंरचनां शिक्षकाणां निर्देशनेन करिष्यन्ति।
2. या अपि त्रुटिः भविष्यति तस्याः निराकरणमपि अध्यापकाः यथासमयं करिष्यन्ति।
3. शिक्षकाः आगामि-दिवसे छात्राणां कार्यं अवलोकयिष्यन्ति।
4. यदि कार्यं उत्तमं भविष्यति तदा छात्राणां उत्साहवर्धनाय करतलध्वनिम् अपि कारयिष्यन्ति।
5. तत्पश्चात् स्वविवेकानुसारं सम्मतिं दत्वा तेषाम् उत्तरपुस्तिकायां स्वहस्ताक्षरम् अपि करिष्यन्ति।

- **कक्षाकार्यम्**

1. शतृ प्रत्ययस्य प्रयोगः कदा भवति ?
2. सः कार्यं कुर्वाणः अस्ति। अत्र रेखाङ्कित पदे कः प्रत्ययः ?

- **गृहकार्यम्**

1. अध्यापकाः छात्रेभ्यः दश अशुद्धान् वाक्यान् दश च प्रकृति-प्रत्ययौ दत्वा तेषां शोधनाय पृथक् करणाय च कथयिष्यन्ति।
2. उपपदविभक्तिनां प्रत्यययुक्तान् च पञ्चशब्दान् दत्वा तेषां वाक्येषु प्रयोगाय छात्रान् प्रेरयिष्यन्ति।

- **निर्दिष्टः क्रियाकलापः**

अस्मिन् पाठे अध्यापकाः छात्रान् कथयिष्यन्ति—भो छात्राः ! भवन्तः यत् वाक्यं इतस्ततः पश्यन्तु एतेषां नियमानाम् अनुसारेण एव तस्य शोधनं कुर्वन्तु कारयन्तु च। तदैव युष्माकम् भाषा शुद्धा परिष्कृता च भविष्यति।

---

## विषयः — कारक एवं उपपदविभक्तयः    उपविषयः — अशुद्धि संशोधनम्

- **क्रियाकलापः— 13 : वाक्यानां संशोधनेन भाषा शुद्धा भवति। शुद्धा भाषा निहितार्थ प्रकटनेऽपि समर्था भवति। भाषा कारक एवं उपपद विभक्तिनां प्रयोगेण एव शुद्धा, परिष्कृता परिपुष्टा भवितुं शक्नोति।**

➢ **उद्देश्यम्**

1. छात्राः वाक्यानां संशोधने समर्थाः भवेयुः।
2. छात्राणां न्यूनतमा अशुद्धिः भवेत्।
3. भाषा प्रयोगे छात्राणाम् आत्मविश्वासो वर्धेत।
4. देववाणी संस्कृतभाषायाः महत्त्वं वर्धेत।

➢ **मूल्याङ्कनम् कौशलविकासो वा :**

1. कारक-उपपदविभक्तिनां प्रयोगेण छात्रेषु भाषाप्रयोगस्य क्षमता वर्धते।
2. तेषाम् आत्मविश्वासः संवर्ध्य कुशलतां जनयति।
3. भाषागत अशुद्धयः दूरीभवन्ति।
4. शुद्धभाषा प्रयोगेन जनाः तान् प्रशंसन्ति।

➢ **समयः**

होरार्धम् (30 मिनट)

➢ **सहायक-साधनानि**

कारकनियमानां उपपदविभक्तिनाञ्च द्वे चित्रमये प्रदर्शनपट्टे, श्यामपट्टः, मार्जनी, सुधाखण्डाः सङ्केतयष्टिश्च।

➢ **शिक्षणविधिः**

1. सर्वप्रथमं शिक्षकाः प्रदर्शनपट्टे कक्षायां छात्राणां समक्षे अवलम्बयन्तु।
2. पुनः छात्राणां पञ्चवर्गेषु गङ्गा, यमुना, कावेरी, कृष्णा, गोदावरी इति नामानि कृत्वा विभाजनं कुर्वन्तु।

3. ततः छात्रान् पङ्क्तिं उपवेश्य सर्वप्रथमं गङ्गावर्गम् आह्वयन्तु तेभ्यश्च उभयतः, निकषा, गम्, प्रति, हा, सह, काणः, हीनः, अलम् आदीन् पदान् श्यामपट्टे लिखित्वा पृच्छेयुः यत् एतेषां पदानां योगे का विभक्तिः प्रयुज्यते।
   - छात्राः तेषामुत्तराणि द्वितीया तृतीया च विभक्त्योः रूपे कथयन्तु।
4. शिक्षकाः गङ्गावर्गाय प्रसन्नाः भूत्वा करतलध्वनिं कारयन्तु। पुनः ते यमुणावर्गाय प्रश्नान् उपस्थापयन्तु—
   - भो छात्राः ! इमानि वाक्यानि कथम् अशुद्धानि सन्ति ज्ञात्वा आगत्य कारणं लिखत—
   - भिक्षुकः नेत्रेण अन्धः प्रतीयते, सीता रामं भोजनं यच्छति, गुरुम् नमः, कोलाहलाय अलम्, बालकान् स्वस्ति।
   - छात्राः एकैकं आगत्य श्यामपट्टे अशुद्धीनां कारणानि लेखिष्यन्ति।
5. शिक्षकाः तेभ्योऽपि साधुवादं प्रदास्यन्ति। तत्पश्चात् शिक्षकाः कावेरीवर्गस्य छात्रान् आह्वयन्तु—
   - भो छात्राः! श्यामपट्टे लिखितान् पदान् नीत्वा कारक-उपपदविभक्तिनां नियमानुसारेण शुद्धानि वाक्यानि रचयन्तु भवन्तः—
   - स्वाहा, अनन्तरम्, विना, ऋते, भयम्, त्रस् आदयः।
   - छात्राः पुनः वारं-वारम् आगत्य तान् पदान् नीत्वा वाक्यानि रचयिष्यन्ति।
6. शिक्षकाः अस्मिन् साधुवादं दत्वा पुनः कृष्णावर्गस्य छात्राणम् आवाहनं कुर्वन्तु—
   - बालाः ! श्यामपट्टे लिखितेषु वाक्येषु उचितैः पदैः रिक्तस्थानानि पूरयन्तु—
   - त्वम् ................ समया कथम् उपतिष्ठति ? (नद्याः/नदीम्/नदी/नद्याम्)
   - सर्वे जनाः ................ कृते जल्पन्ति ? (धनस्य/धनाय/धनम्/धनेन)
   - सीमा ................ श्रेष्ठतमा वर्तते। (रमायाः/रमायाम्/रामासु/रमाणाम्)
   - बालकः ................ नीचैः पतति। (वृक्षस्य/वृक्षेण/वृक्षम्/वृक्षात्)
   - छात्राः एकैकशः आगत्य तेषां वाक्यानाम् उचितैः पदैः पूर्तिं करिष्यन्ति।
7. पुनः गुरवः प्रतीद्य तेभ्यः साधुवादं प्रदाय गोदावरी इति पञ्चमवर्गस्य छात्रेभ्यः श्यामपट्टे प्रश्नान् दास्यन्ति—
   - छात्राः ! कुशलः, समक्षे, समीपम्, स्निह्, अभिलष्, पण्डितः, उद्भवति, तरप् इत्येषां पदानां योगे काः विभक्तयः प्रयुज्यन्ते ? विभक्तीन् उक्त्वा तेषां पदानां वाक्येषुं पूर्तिं कुर्वन्तु।
   - छात्राः एकम्-एकम् कृत्वा आगत्य श्यामपट्टे लेखिष्यन्ति।
   - शिक्षकाः प्रसन्नाः भूत्वा तेभ्यः स्वाशीर्वादं साधुवादं च प्रदास्यन्ति। अन्यान् छात्रान् तालिकावादनाय अपि प्रेरयिष्यन्ति।

➢ **शिक्षकेभ्यः निर्देशाः**

1. शिक्षकाः ध्यायन्तु यत् सर्वेषां छात्राणां वारम् अवश्यमेव आगच्छन्तु।
2. सर्वे छात्राः कक्षायाम् अनुशासनेन उपविश्य कार्यं कुर्वन्तु।
3. यः छात्रः उत्तराणि दातुम् असमर्थः स्यात् तस्मै शिक्षकाः प्रोत्साहनं दत्वा उत्तराणि दातुं समर्थः कुर्यः।

## ❑ गृहकार्यम्

1. कक्षायाम् कृतं कार्यं दृष्ट्वा (निरीक्ष्य) शिक्षकाः छात्रेभ्यः दश-दश वाक्यानि दत्वा तानि गृहात् शुद्धानि कृत्वा श्वः आनेतुं कथयन्तु।
2. छात्राः तत्कृत्वा आगामिदिवसे कक्षायाम् आनेष्यन्ति।

## ❑ कार्य-निरीक्षणम्

1. आगामिदिने शिक्षकाः छात्रैः कृतं कार्यं पश्येयुः।
2. यत्र छात्रान् कठिनता भवेत् तत्र स्वमार्गदर्शनमपि यच्छेयुः।
3. अन्यान् छात्रान् प्रेरयन्तु अपि।

## ❑ शिक्षक-हस्ताक्षरम्

- छात्राणां कार्यं सम्यक्तया निरीक्ष्य शिक्षकाः तेषाम् अभ्यासपुस्तिकायां स्व-हस्ताक्षरम् अपि करिष्यन्ति।

# अभ्यास-प्रश्नपत्रम्–1

**अवधिः–होरात्रयम्** **पूर्णाङ्काः 80**

**निर्देशः** 1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
3. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

## खण्डः 'क' ( अपठित-अवबोधनम् ) 10 अङ्काः

**1. गद्यांशान् ध्यानेन पठित्वा प्रश्नान् उत्तरत–**

(गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर दीजिए। Read the paragraph carefully and answer the questions.)

संस्कृतभाषायाम् आदर्शपुरुषरूपेण, मर्यादापुरुषरूपेण वा भगवतः श्रीरामस्य वर्णनं महर्षिवाल्मीकिना स्वमहाकाव्येऽनर्घैः अक्षरैः चित्रितम्। नाटकेषु मुख्यतः महाकविः भासः प्रतिमानाटके अभिषेकनाटके च कृतवान्। ततो महाकविः भवभूतिः उत्तररामचरिते महावीरचरिते च मर्यादापुरुषोत्तमिमम् अवर्णयत्। महाकाव्ये महाकविः कालिदासः रघुवंशे वर्णितवान्। ये-ये महाकवयः नाटककाराः अस्य वर्णनं कुर्वन्ति ते सर्वे चरित्रमस्य अलौकिकं वर्णयन्ति। वयं भारतीयाः एव न सर्वेऽपि सांसारिकाः जनाः पूजयन्ति महान्तं पुरुषमेनम्। अस्य चरितस्य कारणात् देशेऽस्माकं पर्वद्वयं मान्यतेऽत्युत्साहेन विजयदशमी दीपावली च।

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) वाल्मीकिः आदर्शपुरुषं कस्मिन् अवर्णयत्?

(*ii*) उत्तररामचरितं कस्य कृतिः?

(*iii*) संसारिकाः जनाः कीदृशं पुरुषं पूजयन्ति?

(*iv*) सर्वे महाकवयः कीदृशं चरित्रं वर्णयन्ति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) अस्माकं देशे पर्वद्वयं कथं मान्यतेऽत्युत्साहेन?

(*ii*) के कस्य चरित्रम् अलौकिकं वर्णयन्ति?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.) ½ × 4 = 2

(*i*) अस्मिन् अनुच्छेदे 'अवर्णयत्' अस्याः क्रियायाः कर्तृपदं किम्?

(क) मर्यादापुरुषोत्तमम् (ख) महाकविः (ग) भवभूतिः (घ) भासः

(*ii*) अत्र अनुच्छेदे 'अक्षरैः' इति पदस्य किम् विशेषणम् प्रदत्तम्?

(क) अनर्घैः (ख) सुन्दरैः (ग) उत्तमैः (घ) विचक्षणैः

(*iii*) अनुच्छेदे 'अद्भुतम्' अस्य पदस्य किं पर्यायं लिखितम्?

(क) उत्तमम् (ख) अलौकिकम् (ग) महान्तम् (घ) विशिष्टम्

(*iv*) गद्यांशे 'पारलौकिका:' अस्य विलोमपदं लिखत।

(क) लौकिका: (ख) संसारिका: (ग) ईदृशा: (घ) धन्या:

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** **2 × 1 = 2**

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## खण्डः 'ख' ( रचनात्मकं कार्यम् ) 15 अङ्काः

**2. भवती सरोजिनी। भवत्याः वर्गेण अनाथबालकैः सह प्रतियोगितायाम् पराजयः अनुभूतः। आत्मानुभवान् वर्णयन्त्या भवत्या मातरं प्रति लिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लेखनीयम्–**

(आप सरोजिनी हैं। आपके वर्ग की अनाथ बालकों के साथ प्रतियोगिता में पराजय हुई। अपने अनुभवों का वर्णन करते हुए माता के प्रति लिखे पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूरा करके पुनः लिखिए। You are Sarojini. Your team was defeated in a competition with the orphans. In a letter written to your mother describing your experiences, fill in the blanks with the help of the words given in the box below.)

**½ × 10 = 5**

(*i*) ..............................

पूना नगरत:।

तिथि: 26.3.20.......

पूज्याः (*ii*) ..............................।

सादरं चरणस्पर्शम्।

अत्र खलु सर्वगतम् .............................. (*iii*)। मन्ये तत्रापि सर्वे (*iv*) .............................. भविष्यन्ति। मातः! अस्माकं विद्यालयस्य समीपे एकः अन्यः विद्यालयः अस्ति। यत्र सर्वे दीनाः .............................. (*v*) च छात्राः एव पठन्ति। अस्माकं प्राचार्यः तस्य (*vi*) ..............................दशमकक्षायाः छात्रैः सह गीता-अन्त्याक्षरी-प्रतियोगिताम् (*vii*) ......................। जानाति भवती, वयं सर्वे छात्राः तस्यां पराजिताः जाताः। तेषां प्रदर्शनं तु (*viii*) .............................. आसीत्। नूनं दर्पः सर्वं नाशयति, (*ix*) .............................. सर्वत्र विजयते।

पितृचरणयोः मम् प्रणामाः।

भवत्याः पुत्री,

(*x*) ......................

| |
|---|
| **मञ्जूषा**—असहायाः, कुशलिनः, अभूतपूर्वम्, सरोजिनी, श्रमः, आयोजितवान्, विद्यालयस्य, नूतनविद्यापीठम्, मातृचरणाः, कुशलम्। |

**3. पञ्चसु संस्कृतवाक्येषु मञ्जूषापदसहायतया अधः प्रवत्त चित्रस्य वर्णनं कुरुत–** **1 × 5 = 5**

(पाँच संस्कृत वाक्यों में मञ्जूषा के शब्दों की सहायता से नीचे दिए चित्र का वर्णन कीजिए। Describe the following picture in five Sanskrit sentences with the help of words given in the box.)



मञ्जूषा–चित्रकलाप्रतियोगिता, बालका:, बालिका:, ध्यानमग्ना:, हस्ते तूलिका, समक्षं पत्रम् केचन चित्रकार्ये लग्ना:, केचन चिन्तयन्ति, शिक्षक: कार्यं निरीक्षते, मनसि उत्साह:।

*अथवा*

**मञ्जूषायां प्रदत्तशब्दानां सहायतया 'वर्षर्तौ उद्यानस्य वर्णनम्' पञ्चसु संस्कृतवाक्येषु कुरुत–** 1 × 5 = 5

1. ..............................
2. ..............................
3. ..............................
4. ..............................
5. ..............................

**मञ्जूषा**—सर्वत्र हरीतिमा, वृक्षा:, स्नाता:, इव, पतन्ति, पक्वानि फलानि, सर्वत्र जलम् एव, गर्तेषु बालका:, कर्गदनौका:, पुष्पाणि, स्वच्छानि, यदा-कदा, सूर्य:, जलबिन्दव:।

4. **निम्न वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत** (निम्न वाक्यों का संस्कृत भाषा में अनुवाद कीजिए। Translate the following sentences in Sanskrit.)– 1 × 5 = 5

1. देव सदैव असुरों को जीतते हैं।
2. कैकेयी के विचार से भरत को राज्यपद मिला।
3. उत्तम छात्र बड़ों का सम्मान करते हैं।
4. सम्मान के साथ जियो।
5. माता सदा पूज्या होती है।

## खण्ड: 'ग' ( अनुप्रयुक्त-व्याकरणम् ) 25 अङ्का:

5. **स्थूलपदेषु सन्धिच्छेदम् अथवा सन्धियुक्तं पदं दत्तेभ्य: विकल्पेभ्य: शुद्धं चित्वा उत्तरपुस्तिकायां लिखत–**
(स्थूल पदों में संधि अथवा सन्धिच्छेद युक्त पद को दिए गए विकल्पों में से शुद्ध शब्द चुनकर उत्तर-पुस्तिका में लिखिए। Separate or join bold words and choose the appropriate answer from the options given below and write answer in the answer sheet.) 1 × 4 = 4

1. **चलदनिशं** कालायसचक्रम्।

(क) चलद + निशं (ख) चलत + निशं
(ग) चलत् + अनिशं (घ) चलन् + अनिशं

2. भवति **शिशुजनो वयोऽनुरोधात्।**

3. क्रुद्धः सिंहः **इतस्ततः** धावति।

4. **शरीरोपचयः** कान्तिर्गात्राणां सुविभक्तम्।

6. **स्थूलपदेषु समासम् अथवा विग्रहं विकल्पेभ्यः चित्वा उत्तरपुस्तिकायाम् लिखत–**

(स्थूल पदों में समास अथवा समास विग्रहों को विकल्पों से चुनकर उत्तर-पुस्तिका में लिखिए। Join or disjoin compounds in the bold words choose the appropriate answer from the options given below and write in the answer sheet.) 1 × 4 = 4

1. **कज्जलमलिनं** धूमं मुञ्चति।

(क) कज्जल इव मलिनम् (ख) कज्जलेन इव मलिनम्

(ग) कज्जलम् इव मलिनम् (घ) कज्जलः मलिनम्

2. **राजासनं** खलु एतत्।

3. **क्रुद्धः सिंहः** तं प्रहर्तुम् इच्छति।

4. आरक्षी **सुपुष्टदेहः** आसीत्।

7. **स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगो कृत्वा विकल्पेभ्यः शुद्धं उत्तरं चित्वा उत्तरपुस्तिकायाम् लिखत–**

(स्थूल पदों के प्रकृति-प्रत्यय को अलग अथवा संयुक्त करके विकल्पों से शुद्ध उत्तर को चुनकर उत्तर-पुस्तिका में लिखिए। Separate or join suffixes in the bold words and write appropriate answer from the options given below in the answer sheet.) 1 × 4 = 4

1. कुत्सितवस्तुमिश्रितं **भयम्** इदम्।

2. राजस्य समीपम् उपसृत्य **प्रणम्य** च।

(क) प्र + णम् + ल्यप् (ख) प्र + नम् + ल्यप् (ग) प्र + णम + ल्यप् (घ) प्रणम् + यत्

3. **भगवान्** वाल्मीकिः वधूः इति वदति।

4. **विचित्रा** दैवगतिः।

8. **समुचितम् अव्ययं चित्वा रिक्तस्थानानि सम्पूरयत–**

(समुचित 'अव्यय' पद को चुनकर रिक्त स्थानों की पूर्ति करें। Fill in the blanks with appropriate indeclinable words.) 1 × 4 = 4

1. सुशीला ........................ पतिं विना कथं खादिष्यति ?

(क) पुरा (ख) इदानीम् (ग) उच्चैः (घ) शनैः।

2. मानवजीवनं कदापि ........................ न करणीयम्।

3. ........................ शिवः कैलाशे अवसत्।

4. शक्तिम् अनतिक्रम्य ........................ कार्यं करणीयम्।

| मञ्जूषा– पुरा, एव, वृथा |
|---|

9. अधोलिखितं संवादं मञ्जूषायाः समुचित-क्रिया-कर्म-कर्तृपदैः वाच्यपरिवर्तनं पूरयत–

(नीचे लिखे संवाद को मंजूषा के उचित क्रिया, कर्म एवं कर्त्ता पदों से वाच्य परिवर्तन को भरिए। Complete the following dialogue with options change of voice with suitable verb, object and subject.) 1 × 3 = 3

**रमा** — माले! त्वम् किम् लिखसि?

**माला** — (*i*) ........................ तु पर्यावरणविषये लेखं लिखामि।

(क) अहम् (ख) मया (ग) वयम् (घ) आवाम्।

**रमा** — त्वया उपयुक्तः लेखः (*ii*) ........................। (लिख्)

**माला** — धन्यवादाः। सम्प्रति (*iii*) ........................ कुत्र गम्यते? (युष्मद्)

**रमा** — विद्यालयः। किम् त्वया न ज्ञायते यत् अद्य तत्र वनोत्सवः अस्ति?

**माला** — आम् ज्ञातम्। मया अपि स वनोत्सवः द्रष्टव्यः।

10. घटिकां समयम् दृष्ट्वा प्रदत्तविकल्पेभ्यः शुद्धम् समयम् चित्वा एवं उचितं समयं लिखित्वा रिक्तस्थानम् पूरयत–

(घड़ी में समय देखकर दिए गए विकल्पों में से शुद्ध उत्तर चुनकर तथा उचित समय लिखकर रिक्त स्थानों को पूरा कीजिए। See the clock and fill the correct time in the blanks by choosing correct option.) ½ × 4 = 2

(*i*) प्रहरी प्रातः (8.00) ............................................ वादने उत्तिष्ठति।

(*ii*) प्रहरी राकेशः रात्रौ (10.15) ............................................ वादने कार्याय गच्छति।

(क) सपादएकादश (ख) पादोन-एकादश (ग) पादोन-दश (घ) सपाददश।

(*iii*) सः (4.30) ............................................ वादनं यावत् निजकार्यम् सम्पादयति।

(*iv*) पुनः सः (4.45) ............................................ वादने स्वगृहम् आगच्छति।

11. निम्नवाक्येषु रेखाङ्कित पदानि शुद्धानि कृत्वा लिखत– 1 × 4 = 4

(*i*) जनाः पञ्चवादने सदैव उद्याने <u>भ्रमति</u>।

(क) भ्रमसि (ख) भ्रमामि (ग) भ्रमथः (घ) भ्रमन्ति।

(*ii*) <u>यूयम्</u> कदा वृक्षारोपणं करिष्यन्ति?

(*iii*) भावना श्वः पूजां न <u>अकरोत्</u>।

(*iv*) मेधाविनी <u>बालकः</u> यथासमयम् पठति।

**खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न पाठ्यपुस्तक पर आधारित हैं तथा 30 अंक के हैं।**

# अभ्यास-प्रश्नपत्रम्–2

अवधिः–होरात्रयम् पूर्णाङ्कः: 80

**निर्देशः** — विद्यार्थी कृपया निर्देश अभ्यास प्रश्नपत्रम्–1 से देखें।

## खण्डः 'क' ( अपठित-अवबोधनम् ) 10 अङ्काः

**1. गद्यांशान् ध्यानेन पठित्वा प्रश्नान् उत्तरत–**

(गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर दीजिए। Read the paragraph carefully and answer the questions.)

संस्कृतसाहित्ये सर्वविधानां रचनानां लेखकाः वर्तन्ते। केचित् सन्ति काव्यलेखकाः ये महाकाव्यानि रचयन्ति। तेषां कृते छन्दोज्ञानम् अनिवार्यम्। अतः छन्दसां भेदानां, स्वरूपाणां परिचायकाः ग्रन्थाः सन्ति। केचित् सन्ति गद्यकाराः ये गद्यस्य प्रकारैः परिचायकानि पुस्तकानि लिखन्ति। किं बहुना, अस्मिन् साहित्ये नाटकानि अपि विद्यन्ते, अतः समालोचकाः नाटकलक्षणम् अपि लिखितवन्तः। नाटकलक्षणे इदमपि सूचितम् कानिचित् नाटकानि भवन्ति, कानिचित् प्रकरणानि। प्रकरणे भवन्ति दश अङ्काः, नाटकेषु भवन्ति, पञ्च सप्त वा अङ्काः। कानिचित् नाटकानि तु एकांकानि एव दृश्यन्ते। वस्तुतः संस्कृतसाहित्यं गौरवान्वितं कथ्यते।

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) काव्यलेखकाः कानि रचयन्ति?

(*ii*) प्रकरणे कति अङ्काः भवन्ति?

(*iii*) वस्तुतः संस्कृतसाहित्यं कीदृशं कथ्यते?

(*iv*) समालोचकाः किं लिखितवन्तः?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) गद्यकाराः किं कुर्वन्ति?

(*ii*) काव्यलेखकानां कृते किम् अनिवार्यम्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.) ½ × 4 = 2

(*i*) 'महत्त्वम्' इति पदस्य कः पर्यायः अनुच्छेदे प्रदत्तः?

(क) बलम् (ख) गौरवम् (ग) उपयोगिताम् (घ) वस्तुतः

(*ii*) गद्यांशे 'सर्वविधानाम्' इति विशेषणपदस्य किं विशेष्यम्?

(क) रचनानाम् (ख) लेखकानाम् (ग) कवीनाम् (घ) महाकवीनाम्

(*iii*) 'वर्तन्ते' क्रियायाः कर्तृपदं किम्?

(क) रचनानाम् (ख) सर्वविधानाम् (ग) लेखकाः (घ) कवयः

(*iv*) 'काव्यलेखकाः ये' इति सर्वनामपदम् अनुच्छेदे केभ्यः प्रयुक्तम्?

(क) लेखकेभ्यः (ख) काव्यलेखकेभ्यः (ग) कविभ्यः (घ) महाकविभ्यः

**IV. उपरिलिखितम् अनुच्छेदं पठित्वा तस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## खण्डः 'ख' ( रचनात्मकं कार्यम् ) 15 अङ्काः

**2. भवती श्यामला। भवती पितरं प्रति एकं पत्रं लिखति। मञ्जूषायाः उचितानि पदानि चित्वा पत्रं पूरयतु–**

(आप श्यामला हैं। आप पिता जी को एक पत्र लिखती हैं। मञ्जूषा से उचित पद चुनकर पत्र पूर्ण कीजिए। You are Shyamala. You write a letter to your father. Complete the letter with appropriate words given in the box.) **½ × 10 = 5**

(*i*) ..................................

पितृश्रीचरणसन्निधौ,

सादरं (*ii*) ..................................

भवतः पत्रं प्राप्तम्। पत्रं पठित्वा बहु आनन्दः (*iii*) .................................. । अहम् अत्र कुशलिनी। भवतः मातुः च (*iv*) .................................. अधिकं चिन्तयामि। अत्र मम प्रशिक्षणं सम्यक् प्रचलति। भवता दत्तं (*v*) .................................. आगमनसमये मार्गे एव मया पठितम्। प्रशिक्षणस्य (*vi*) .................................. अहं शैक्षिकप्रवासाय गमिष्यामि। ततः आगत्य गृहम् (*vii*) .................................. । एतं विषयं पूज्यमातरम् अपि सूचयतु। (*viii*) .................................. अपि मम वन्दनानि अनुजाय च (*ix*) .................................. ।

भवदीया (*x*) ..................................

श्यामला।

**मञ्जूषा**—अभवत्, श्रीनगरतः, स्वास्थ्यविषये, प्रियपुत्री, शुभाशीषः, वन्दनानि, मातृचरणयोः, पश्चात्, आगमिष्यामि, पुस्तकम्।

**3. पञ्चसु संस्कृतवाक्येषु मञ्जूषापदसहायतया अधः दत्तं चित्रवर्णनं कुरुत–** **1 × 5 = 5**

(पाँच संस्कृत वाक्यों में मञ्जूषा के शब्दों की सहायता से नीचे दिए चित्र का वर्णन कीजिए। Describe the following picture in five Sanskrit sentences with the help of words given in the box.)



**मञ्जूषा**—जलप्लावनस्य चित्रं वर्तते, अतिभीषण समस्या, आपद्ग्रस्तानां सहायतां, सैनिकाः, सर्वत्र जलमेव दृश्यते, नौकायाः, अनेके जनाः, अवतरन्ति, वृक्षाः, दुःखिनः, अस्तव्यस्तं जीवनम्।

*अथवा*

**एकः छात्रः रात्रौ शिरसः अधः पुस्तकं स्थापयित्वा सुप्तः। सन्त्रस्तं पुस्तकम् आत्मवेदनां वर्णयति। मञ्जूषातः पदानि चित्वा वर्णने रिक्तस्थानानि पूरयत–**

(एक छात्र रात को सिर के नीचे पुस्तक लेकर सोया हुआ है। दुःखी पुस्तक आत्मवेदना का वर्णन करती है। मञ्जूषा से पद लेकर रिक्त स्थान भरकर पुनः कथा उत्तर-पुस्तिका में लिखिए। A student is sleeping at night keeping a book under his head. The aggrieved book narrates her self-suffering. Fill in the blanks with suitable words from the box.) ½ × 10 = 5

अहं पुस्तकम् अस्मि। एषः यः मम *(i)* .................... शिरः स्थापयित्वा स्वपिति सः मम स्वामी। इदानीम् अहम् अतीव *(ii)* ....................। तेन स्थाने स्थाने मम *(iii)* .................... लेखन्या व्रणाः कारिताः। पृष्ठानाम् अधिकांशाः कोणाः तु परिवर्तनेन *(iv)* .................... जाताः। *(v)* .................... अलङ्कृतानि मम चित्राणि अस्य *(vi)* .................... नष्टीकृतानि। स माम् *(vii)* .................... स्थापयित्वा क्रीडामग्नः भवति। तेन मम मुखम् एव कृष्णमसीं *(viii)* .................... दूषितम्। यथा *(ix)* .................... आयोज्यन्ते तथा अस्माभिः *(x)* .................... अपि आयोजनीयः। येन अस्माकम् अपि जीवनरक्षा स्यात्।

| |
|---|
| **मञ्जूषा**—पुस्तकाधिकारदिवसः, मानवाधिकारदिवसाः, उपरि, त्रिवर्षीयभ्रात्रा, सन्त्रस्तम्, पातयित्वा, भग्नाः, पृष्ठेषु, इतस्ततः, नानावर्णैः। |

**4. निम्न वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत–** 1×5=5

(निम्न वाक्यों का संस्कृत भाषा में अनुवाद कीजिए। Translate the following sentences in Sanskrit.)

1. भारत हमारी मातृभूमि है।
2. हमें इसका सम्मान करना चाहिए।
3. विद्या मनुष्यों का मित्र होती है।
4. जीवन की आधारशिला शिक्षा ही होती है।
5. पिता की आज्ञा मानकर श्रीराम सीता व लक्ष्मण के साथ वन को गए थे।

## खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) 25 अङ्काः

**5. स्थूलपदेषु सन्धिच्छेदम् अथवा सन्धियुक्तं पदं दत्तेभ्यः विकल्पेभ्यः शुद्धं चित्वा उत्तरपुस्तिकायां लिखत–** 1 × 4 = 4

(स्थूल पदों में संधि अथवा सन्धिच्छेद युक्त पद को दिए विकल्पों में से शुद्ध चुनकर उत्तर-पुस्तिका में लिखिए। Separate or join bold words and choose the appropriate answer from the options given below answer in the answer sheet.)

1. करणीयं **बहिः + अन्तः + जगति**।
   (क) बहिसन्तर्जगति (ख) बहिरर्न्तजगति (ग) बहिरन्तर्जगति (घ) बहिरान्तरजगति
2. किं **द्वयोरप्येकमेव** प्रतिवचनम्?
3. तथापि वृषः **नोत्थितः**।
4. क्रुद्ध सिंहः **इतस्ततः** धावति।

**6. स्थूलपदेषु समासम् अथवा विग्रहं विकल्पेभ्यः चित्वा उत्तरपुस्तिकायाम् लिखत–** **1 × 4 = 4**

(स्थूल पदों में समास अथवा समास विग्रह को विकल्पों से चुनकर उत्तर-पुस्तिका में लिखिए। Join or disjoin compounds in the bold words choose the appropriate answer from the options given below and write in the answer sheet.)

1. खगकुलकलरव **गुञ्जितवनदेशम्।**

(क) गुञ्जितम् वनदेशम् (ख) गुञ्जितः वनदेशम् (ग) गुञ्जिते वनदेशम् (घ) गुञ्जिता वनदेशम्

2. **भ्रातरौ** आवाम् सोदर्यौ।

3. यदि आनयोः बालभावजनितं किञ्चिद् **अविनयं** पश्यति।

4. **नदीजलम्** अपि नैकस्मिन् स्थले पुञ्जीकरणीयम्।

**7. स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगो कृत्वा विकल्पेभ्यः शुद्धं उत्तरं चित्वा उत्तरपुस्तिकायाम् लिखत–**

(स्थूल पदों के प्रकृति-प्रत्यय अलग अथवा संयुक्त करके विकल्पों से शुद्ध उत्तर को चुनकर उत्तर-पुस्तिका में लिखिए। Separate or join suffixes in the bold words and write appropriate answer from the options given below in the answer sheet.) **1 × 4 = 4**

1. दुर्वहमत्र जीवितं **जातम्।**

(क) जा + क्त (ख) जन् + क्त (ग) जन + क्तवतु (घ) जा + क्तवतु

2. भवन्तौ **गायन्तौ** कविरपि पुराणः।

3. **समीक्ष्य** कुर्याद् व्यायामम्।

4. अहम् विशालकायः बलशाली **पराक्रमी** च।

**8. प्रदत्तेषु उत्तरेषु यत् उत्तरम् शुद्धम् अस्ति तत् चीयताम्–** **1 × 4 = 4**

(दिए गए उत्तरों में से जो उत्तर शुद्ध है उसे विकल्प से चुनिए। Choose the appropriate answer from the options given below.)

1. भोजनं सदा ........................ चर्वणपूर्वकं खादितव्यम्।

(क) शनैः (ख) अपि (ग) इतस्ततः (घ) इदानीम्।

2. चाणक्यनीतिं ........................ राजनीतिः न ज्ञायते।

3. ........................ सर्वे जनाः सुखिनः भवन्तु।

4. दुष्टाः ........................ एव जनान् घ्नन्ति।

| मञ्जूषा–नूनम्, वृथा, विना |
| --- |

**9. अधोलिखितं संवादं मञ्जूषाया: समुचित-क्रिया-कर्म-कर्तृपदैः पूरयत–**

(अधोलिखित संवाद को मंजूषा के उचित क्रिया, कर्म एवं कर्ता पदों से भरिए। Complete the following dialogue with options suitable verb, object and subject.) **1 × 3 = 3**

**मोहनः** — मालति! किम् त्वम् प्रातःकाले योगाभ्यासं करोषि?

**मालती** — मया योगाभ्यासः तु न (*i*) ......................, परमहं सूर्यनमस्कारं करोमि।

(क) कृयते (ख) क्रियते (ग) कुरुते (घ) करोमि।

**मोहनः** — सूर्यनमस्कारस्य को लाभः?

**मालती** — एतेन अस्माकं बुद्धिः तीव्रा (*ii*) ...................... । (भू)

**मोहनः** — आम्! अतः (*iii*) ...................... तु प्रातः एव गायत्रीमन्त्रम् अपि जपामि। (अस्मद्)

**मालती** — मया अपि गायत्रीमन्त्रः जप्यते यतः तेन मनः परितुष्टं भवति।

**10. अधोलिखितायां समयसारिण्याम् अङ्कानां स्थाने संस्कृतपदेषु समयम् लिखत–**

(नीचे लिखी समय सारिणी में अंकों के स्थान पर समय को संस्कृत शब्दों में लिखिए। Indicate the time in Sanskrit words in place of figures in the following time-table.) **½ × 4 = 2**

विद्यालये वार्षिकोत्सवस्य समयसारिणी

(*i*) प्रातः 10.00 ...................... वादने मुख्यातिथेः आगमनम्।

(*ii*) मध्याह्न 12.30 ...................... मुख्यातिथेः स्वागतम्।

(क) सार्ध द्वादश वादने (ख) सपाद द्वादश वादने (ग) पादोन द्वादश वादने (घ) सपाद एकवादने

(*iii*) प्रातः 10.45 ...................... वादने छात्राणां कार्यक्रमः भविष्यति।

(*iv*) अन्ते 12.15 ...................... वादने कार्यक्रमस्य समापनं भविष्यति।

**11. रेखाङ्कितानि पदानि शुद्धानि कृत्वा लिखत–** **1 × 4 = 4**

(*i*) जनाः प्रातः काले ईश्वरं जपति।

(क) जनो (ख) जनान् (ग) जनः (घ) जनेन

(*ii*) युवाम् लेखं लेखिष्यसि।

(*iii*) मोहन! त्वम्, इतः मा गच्छत।

(*iv*) ललिता अतीव गुणवान् अस्ति।

**खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न पाठ्यपुस्तक पर आधारित हैं तथा 30 अंक के हैं।**

# अभ्यास-प्रश्नपत्रम्–3

अवधिः–होरात्रयम् | पूर्णाङ्काः 80

निर्देशः — विद्यार्थी कृपया निर्देश अभ्यास प्रश्नपत्रम्-1 से देखें।

## खण्डः 'क' ( अपठित-अवबोधनम् ) 10 अङ्काः

**1. गद्यांशान् पठित्वा प्रश्नान् उत्तरत–**

(गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए। Read the paragraph and answer the questions.)

एकदा एकः वैदेशिकः प्रथमराष्ट्रपतेः श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्। राष्ट्रपतेः परिचारकः तं आतिथ्यगृहे प्रतीक्षितुम् अकथयत् तम् असूचयत् च यद् राष्ट्रपतिमहोदयाः सम्प्रति पूजां कुर्वन्ति। स अतिथिः ज्ञातुम् ऐच्छत् यद् राष्ट्रपतिः कथं करोति पूजाम्? सङ्कोचं कुर्वन् अपि स अन्तः पूजागृहं प्रविष्टः। राष्ट्रपतेः समक्षं विद्यमानं मृत्पिण्डं सोऽवन्दत श्रद्धया च तत्र उपाविशत्। पूजां परिसमाप्य राष्ट्रपतिमहोदयः पूजागृहे स्थितं तं दृष्ट्वा प्रसन्नः अभवत्, ससम्मानं तं अन्तः अनयत्। आगन्तुकस्य ललाटे विद्यमानं भावं दृष्ट्वा श्रीराजेन्द्रमहोदयः तस्य कौतूहलं विज्ञाय तस्मै समबोधयत्—एतद् मृत्पिण्डं भारतस्य भूम्याः प्रतीकम् अस्ति। एतेन मृत्पिण्डेन एव भारतीयाः महतीम् आत्मिकां सम्पदं प्राप्नुवन्ति। अतएव वयं मृत्तिकायाः कणेषु ईश्वरस्य दर्शनमपि कुर्मः। अस्माकं विचारे तु मानवेषु, पशुपक्षिषु, पाषाणेषु, वृक्षादिषु किं वा अचेतनेषु अपि ईश्वरस्य सत्ता अस्ति।

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.) 1 × 2 = 2

(*i*) कः श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्?

(*ii*) भारतभूम्याः प्रतीकम् किम् अस्ति?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) राष्ट्रपतिमहोदयः आगन्तुकं कुत्र दृष्ट्वा प्रसन्नः अभवत्?

(*ii*) राजेन्द्रप्रसादमहोदयः आगन्तुकस्य कौतूहलं विज्ञाय तस्मै किं समबोधयत्?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'प्राप्नुवन्ति' —अस्याः क्रियायाः अनुच्छेदे कर्तृपदं किम्?

(क) भारतीयाः (ख) नराः (ग) वैदेशिकाः (घ) नार्यः

(*ii*) 'मृत्पिण्डं दृष्ट्वा सोऽवन्दत'—अत्र 'स' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) वैदेशिकाय (ख) भारतीयाम (ग) नराय (घ) राष्ट्रपतये

(*iii*) 'भावम्' इति विशेष्यस्य किं विशेषणम्?

(क) विद्यामानम् (ख) उत्तमम् (ग) सामान्यम् (घ) विशेषम्

(*iv*) 'धरायाः' इति पदस्य कः पर्यायः अनुच्छेदं आगतः?

(क) अन्तः (ख) भूम्याः (ग) भूमेः (घ) पृथिव्याः

**IV. उपरिलिखितस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## खण्डः 'ख' ( रचनात्मकं कार्यम् ) 15 अङ्काः

2. भवान् नीरजः। भवतः ग्रामे स्वास्थ्यकेन्द्रस्योद्घाटनं भवति। भवतः मनसः आह्लादस्य वर्णनं कुर्वन् भवान् मित्रं सुनन्दं प्रति पत्रं लिखति। तस्मिन् पत्रे मञ्जूषायाः रिक्तस्थानानि पूरयन् पत्रं पूर्णं कृत्वा पुनः लिखतु–

(आप नीरज हैं। आपके गाँव में स्वास्थ्य केन्द्र का उद्घाटन हो रहा है। अपने मन की प्रसन्नता का वर्णन करते हुए आप अपने मित्र सुनन्द को पत्र लिख रहे हैं। उस पत्र में मञ्जूषा से रिक्त स्थानों को पूर्ण कर पत्र को पुनः लिखिए। You are Neeraj. A Health Centre is being opened in your village. Showing your happiness you are writing a letter to your friend Sunanda. Fill in the blanks in the letter with the help of the words given in the box and re-write the same.) ½ × 10 = 5

(*i*) ..........................

प्रियमित्र सुनन्द! दिनाङ्कः 3.10.20.........

सस्नेहं (*ii*) ..........................।

भवतः पत्रं प्राप्तम्। समाचाराः अवगताः। हर्षस्य विषयोऽयं यद् अस्माकं (*iii*) .......................... मण्डलाधिकारिभिः स्वास्थ्यकेन्द्रस्योद्घाटनं (*iv*) .......................... तारिकायां भविष्यति। सर्वे ग्रामीणाः समाचारम् एतं ज्ञात्वा (*v*) .......................... सञ्जाताः। अनेन स्वास्थ्यकेन्द्रेण (*vi*) .......................... रोगीणाम् उपचारो ग्रामे एव भविष्यति। ग्रामीणाः अधुना उपनगरं (*vii*) .......................... न गमिष्यन्ति। एतेन न केवलं ग्रामीणानां धनस्य अपव्ययो न भविष्यति परं तेषां (*viii*) .......................... नाशोऽपि न भविष्यति। क्षणेन रोगेषु नष्टेषु ग्रामे वातावरणं सुखदं भविष्यति। भावं जनानां द्रष्टुं भवान् अवश्यं मम ग्रामम् आगच्छतु। (*ix*) .......................... प्रणामाः, स्निग्धायै च शुभाषिषः।

भवतां (*x*) ..........................

नीरजः।

| |
|---|
| **मञ्जूषा**—सुहृत्, समयस्य, चिकित्सायै, पञ्चविंशत्याम्, मातृचरणयोः, गुरुग्रामः, प्रसन्नाः, नमः, ग्रामे, आर्तानाम्। |

3. पञ्चसु संस्कृतवाक्येषु मञ्जूषादत्तपदैः अधः दत्तं चित्रं वर्णयत– 1 × 5 = 5

(पाँच संस्कृत वाक्यों में मञ्जूषा के शब्दों की सहायता से नीचे दिए चित्र का वर्णन कीजिए। Describe the following picture in five Sanskrit sentences with the help of words given in the box.)



| |
|---|
| **मञ्जूषा**—वाटिका, वृक्षे, मञ्चः, प्रातः, बालिका, बालकः, फलानि, लघुपादपाः, उत्पतन्ति, खगाः, अधः, पतन्ति। |

*अथवा*

**मञ्जूषायां प्रदत्तशब्दानां सहायतया 'मम दिनचर्या' विषयम् अधिकृत्य पञ्च संस्कृतवाक्यानि लिखत–**

(मञ्जूषा में दिए शब्दों की सहायता से 'मेरी दिनचर्या' विषय पर संस्कृत में पाँच वाक्य लिखिए। Write five sentences in Sanskrit on the topic 'My daily routine' with the help of words given in box.) **1 × 5 = 5**

1. ..........

2. ..........

3. ..........

4. ..........

5. ..........

**मञ्जूषा**—भजामि, स्वपिमि, प्रात:काले, पाठान्, ईश्वरं, भोजनं करोमि, उद्याने, विद्यालयात्, क्रीडामि, सप्तवादने, रात्रौ, पठामि।

**4. निम्न वाक्यानां संस्कृत भाषायाम् अनुवादं कुरुत** (निम्न वाक्यों का संस्कृत भाषा में अनुवाद कीजिए। Translate the following sentences in Sanskrit.)– **1 × 5 = 5**

1. देवों का देव महादेव कहलाता है।

2. महामन्त्र गायत्री का जप बुद्धि को शुद्ध करता है।

3. छात्र गुरुओं का सम्मान करें।

4. भारत भूमि सभी देशों में पूज्य है।

5. छात्र जीवन की सफलता ही मानव जीवन की सफलता का आधार है।

## खण्ड: 'ग' (अनुप्रयुक्त-व्याकरणम्) 25 अङ्का:

**5. स्थूलपदेषु सन्धिच्छेदम् अथवा सन्धिं कृत्वा उत्तरपुस्तिकायां लिखत–**

(स्थूल पदों का संधि अथवा सन्धिच्छेद करके उत्तर-पुस्तिका में लिखिए। Separate or join bold words and write answer in the answer sheet.) **1 × 4 = 4**

1. तदैव **कश्चित्** कर्मचारी समागत्य न्यवेदयत्।

2. या शोभा **सरसो भवेत्**।

3. कश्चन चौर: **गृहाभ्यन्तरं** प्रविष्ट:।

4. आचार: प्रथमो धर्म: इति एतद् **विदुषाम् वच:**।

(क) विदुषां वच: (ख) विदुषाम्वच: (ग) विदुषाञ्वच: (घ) विदुषास्वच:

**6. स्थूलपदेषु समासम् अथवा विग्रहं विकल्पेभ्य: चित्वा उत्तरपुस्तिकायाम् लिखत–**

(स्थूल पदों में समास अथवा समास विग्रह को विकल्पों से चुनकर उत्तर-पुस्तिका में लिखिए। Join or disjoin compounds in the bold words choose the appropriate answer from the options given below and write in the answer sheet.) **1 × 4 = 4**

1. स: **भारवेदनया** क्रन्दति स्म।

(क) भाराणाम् वेदनया (ख) भाराय वेदनया

(ग) भारस्य वेदनया (घ) भारम् वेदनया

2. **अम्भोदाः** बहवो हि सन्ति।

3. **महत् कम्पनं** हि जातम्।

4. न्यायाधीशः तं जनं **ससम्मानं** मुक्तवान्।

**7. स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगो कृत्वा विकल्पेभ्यः शुद्धं उत्तरं चित्वा उत्तरपुस्तिकायाम् लिखत–**

(स्थूल पदों के प्रकृति-प्रत्यय को अलग अथवा संयुक्त करके विकल्पों से शुद्ध उत्तर को चुनकर उत्तर पुस्तिका में लिखिए। Separate or join suffixes in the bold words and write appropriate answer from the options given below in the answer sheet.) 1 × 4 = 4

1. वाक्पटुः धैर्यवान् **मन्त्री** सभायामप्यकातरः।

   (क) मन्त्र + इन् (ख) मन्त्र + ई (ग) मन्त्र + ङीप् (घ) मन्त्र + ईयस्

2. इति **प्रोच्य** उच्चैः अहसत्।

3. पुत्रं द्रष्टुं च सः **प्रस्थितः**।

4. सा किं **शक्या** जनयितुम्।

**8. मञ्जूषायां प्रदत्तैः अव्ययैः सहायतया वाक्यानां रिक्तस्थानानि पूरयत–**

(मञ्जूषा में दिए गए अव्ययों की सहायता से वाक्यों के रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with the help of indeclinables given in the box.) 1 × 4 = 4

| **मञ्जूषा**—कदापि, यावत्, यत्र-कुत्र। |
|---|

1. .................................. अहम् अत्र तिष्ठामि तावत् मा गच्छ।

2. सिंहस्य अभावे वने जीवाः .................................. भ्रमन्ति।

3. .................................................. दुष्कार्याणि न कुर्यात्।

4. वर्षायाम् गृहाद् .................................................. मा गच्छ।

   (क) बहिः (ख) पुरा (ग) सहसा (घ) तत्र

**9. निम्न वाक्यानि वाच्यपरिवर्तन माध्यमेन सम्पूर्ण पुनर्लिखत–** 1 × 3 = 3

1. कन्यया विद्यालयः .......................।

   (क) गम्यन्ते (ख) गम्येते (ग) गम्यते (घ) गम्यसे

2. सा तत्र संस्कृतं .......................। (पठ्)

3. ....................... संस्कृतं पठित्वा ज्ञानं प्राप्यते। (तत्)

**10. कोष्ठकेषु समयं दृष्ट्वा संस्कृत भाषायाम् लिख्यताम्–** ½ × 4 = 2

1. सीता प्रातः (9.00) .................................. वादने उत्तिष्ठति।

   (क) नव (ख) सार्ध नव (ग) सपाद नव (घ) पादोन नव

2. सा (10.30) ............................................ विद्यालयं गच्छति।

3. सीता मध्याह्ने (12.15) ............................................ वादने भोजनं करोति।

4. सा (2.45) ............................................ गृहम् आगच्छति।

**11. विकल्पेभ्यः शुद्धम् उत्तरं चित्वा रिक्तस्थानानि सम्पूरयत–** **1 × 4 = 4**

(विकल्पों से शुद्ध उत्तर चुनकर खाली स्थान भरें। **Fill in the blanks by correct words who given below.)**

1. सः बालकः भोजनं ............................... ।

(क) खादामि (ख) खादति (ग) खादसि (घ) खादावः

2. अधुना ........................... कुत्र गच्छानि? (अस्मद्)

3. किं सा ह्यः ............................... । (आ + गम्)

4. ......................... कन्ये अत्र फले खादतः। (तत्)

**खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न**
**पाठ्यपुस्तक पर आधारित हैं तथा 30 अंक के हैं।**

# अभ्यास-प्रश्नपत्रम्-4

अवधिः–होरात्रयम् | पूर्णाङ्काः 80

निर्देशः — विद्यार्थी कृपया निर्देश अभ्यास प्रश्नपत्रम्-1 से देखें।

## खण्डः 'क' ( अपठित-अवबोधनम् ) 10 अङ्काः

**1. गद्यांशान् पठित्वा प्रश्नान् उत्तरत–**

(गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए। Read the paragraph and answer the questions.)

आसीत् कस्मिंश्चिन्नगरे कथाप्रियो नाम राजा। राजकार्ये उदासीनः सः स्तुतिपाठकैः सह विनोदेन कालं नयति स्म। प्रतिदिनं नूतनः कश्चिद् पुरुषः नृपतये अभिनवां कथां श्रावयति स्म। कथाश्रवणेन प्रसन्नः राजा तस्मै बहुमूल्यं पारितोषिकं प्रयच्छति स्म। एकस्मिन् दिने रम्या काचित् कथा तेन श्रुता किन्तु सा शीघ्रमेव समाप्ता, तदा क्रोधवशात् स अकथयत्—यः कोऽपि सुदीर्घां कथां कथयिष्यति तस्मै अर्धं राज्यं आत्मनः कन्यां च दास्यामि। परं यस्य कथा शीघ्रमेव समाप्ता भविष्यति तस्य शिरः छेत्स्यामि।

**I. एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word.) ½ × 4 = 2

(*i*) नृपस्य किं नाम आसीत् ?

(*ii*) नृपः कीदृशीं कथां शृणोति स्म ?

(*iii*) कः कथा श्रवणेन प्रसन्नः भूत्वा पारितोषिकं प्रयच्छति स्म ?

(*iv*) यस्य कथा शीघ्रं समाप्ता भविष्यति नृपः तस्य किं छेत्स्यति ?

**II. पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in complete sentence.) 2 × 2 = 4

(*i*) कथाश्रवणेन प्रसन्नः नृपः कीदृशं पारितोषिकं प्रयच्छति ?

(*ii*) कीदृशः सः नृपः विनोदेन कालं नयति स्म ?

**III. भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of Language.) ½ × 4 = 2

(*i*) 'अश्रावयत्' इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम् ?

(क) श्रावयिष्यति (ख) श्रावयति (ग) श्रावयति स्म (घ) कथयिष्यति स्म

(*ii*) 'राज्ञे' इति पदस्य कः पर्यायः अनुच्छेदे आगतः ?

(क) तस्मै (ख) नृपाय (ग) राज्ञे (घ) नृपतये

(*iii*) 'आरम्भा' इति पदस्य कः विपर्ययः प्रयुक्तः ?

(क) समाप्ता (ख) समाप्तम् (ग) आरम्भाः (घ) आरब्धा

(*iv*) 'बहुमूल्यं पारितोषिकं' अनयोः पदयोः कः विशेष्यः ?

(क) बहुमूल्यम् (ख) बहुमूल्यः पारितोषिकं

(ग) पारितोषिकम् (घ) पारितोषिकः

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** 2 × 1 = 2

(इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए। Write a suitable title for this paragraph.)

## खण्डः 'ख' ( रचनात्मकं कार्यम् ) 15 अङ्काः

2. भवान् आशुतोषः। भवतः मित्रं शुभम् ऊन-एकोनविंशतिवर्षीयां क्रिकेटप्रतियोगितां विजित्य आगतः। स्वानुभवान् वर्णयन् भवान् स्वपितरं प्रति पत्रं लिखति। तस्मिन् पत्रे विद्यमानानि रिक्तस्थानानि मञ्जूषापदसहायता पूरयित्वा पुनः लिखतु–

(आप आशुतोष हैं। आपका मित्र शुभम उन्नीस वर्षों से पूर्व की क्रिकेट प्रतियोगिता में विजयी होकर आया है। अपने अनुभवों का वर्णन करते हुए आप अपने पिता को पत्र लिख रहे हैं। उस पत्र के रिक्त स्थानों को मञ्जूषा के पदों की सहायता से पूरा कर पुनः लिखिए। You are Ashutosha. Your friend Shubham has come after winning his Under-Nineteen Cricket Tournament. Describing your feelings you are writing a letter to your father. Fill up the blanks in the letter from the box given below and re-write the same.)

½ × 10 = 5

प्रतिभाविकासविद्यालयः,
इन्द्रप्रस्थम्।
दिनाङ्कः 12.2.20.......

प्रातः स्मरणीयाः (*i*) ........................।
सादरं प्रणामाः।
अत्रं सर्वं कुशलम्। तत्रापि सर्वे (*ii*) ........................ सन्तु इति श्रीपतिं 'विष्णुं' (*iii*) ........................। आनन्दप्रदः (*iv*) ........................ अस्ति यद् मम मित्रम् (*v*) ........................ ऊन-एकोनविंशतिवर्षीयां क्रिकेटप्रतियोगितायां विजयी भूत्वा प्रतिनिवृत्तः। अतः अहं महान्तं (*vi*) ........................ अनुभवामि। आशासे यत् स भूयो भूयः बह्वीः (*vii*) ........................ विजेष्यते। भवानपि तस्मै (*viii*) ........................ लिखतु।
मातृचरणयोः (*ix*) ........................, राधिकायै शुभाशिषः।

भवतां (*x*) ........................
आशुतोषः।

| मञ्जूषा—वर्धापनपत्रं, प्रतियोगिताः, वशंवदः, पितृचरणाः, प्रार्थये, प्रणामाः, परितोषम्, समाचारः, शुभम्, कुशलिनः। |
|---|

3. पञ्चसु संस्कृतवाक्येषु मञ्जूषापदसहायतया अधः दत्तं चित्रवर्णनं कुरुत– 1 × 5 = 5

(पाँच संस्कृत वाक्यों में मञ्जूषा के शब्दों की सहायता से नीचे दिए चित्र का वर्णन कीजिए। Describe the following picture in five Sanskrit sentences with the help of the words given in the box.)




| मञ्जूषा—छात्रः, परीक्षादिवसः, छात्रा, मञ्चौ, गवाक्षे, श्यामपटे, घटिकायन्त्रम्, तिष्ठतः, कुरुतः, भित्तौ, सपाद-अष्टवादनम्, प्रारम्भः, परीक्षायाः, दृश्यते। |
|---|

*अथवा*

**अधोलिखितां कथां मञ्जूषाया सहायतया पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।**

(नीचे लिखी कथा को मञ्जूषा की सहायता से पूर्ण करके पुनः उत्तर-पुस्तिका में लिखिए। Complete the following story with the help of the words given in the box and re-write in your answer sheet.) **½ × 10 = 5**

**यथा दृष्टिः तथा सृष्टिः**

एकदा गुरुः द्रोणाचार्यः दुर्योधनम् (*i*) .................. आदिशत्—"वत्स! नगरे सर्वाधिकं गुणवन्तं जनम् अन्विष्य" (*ii*) .................. । दुर्योधनः (*iii*) .................. आसीत्। सः सर्वत्र (*iv*) .................. आगच्छत् अवदत् च—"भगवन्! (*v*) .................. गुणवत्वरः कोऽपि नास्ति इति।" आचार्यः पुनः युधिष्ठिरम् आहूय (*vi*) .................. "वत्स! संसारे सर्वाधिकं गुणहीनं जनम् (*vii*) .................. आनय इति।" युधिष्ठिरः आगत्य अवदत्—प्रभो! मत्तः गुणहीनः संसारे कोऽपि नास्ति। आचार्यः (*viii*) .................. आशिषम् अयच्छत्—प्रियपुत्र! तव (*ix*) .................. कीर्तिः कदापि न नंक्ष्यति। नूनं सत्यमेव उच्यते—यथा दृष्टिः तथा (*x*) .................. ।

| |
|---|
| **मञ्जूषा**—अहङ्कारी, अन्विष्य, सृष्टिः, आहूय, भ्रान्त्वा, कीर्तिः, आदिष्टवान्, आनय, मत्तः, युधिष्ठिराय। |

**4. निम्न वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत** (निम्न वाक्यों का संस्कृत भाषा में अनुवाद कीजिए। Translate the following sentences in Sanskrit.)– **1 × 5 = 5**

1. सभी मिलकर संसार में अपना काम करें।
2. देवों और दैत्यों द्वारा समुद्रमंथन हुआ था।
3. मातृशक्ति सदा सम्मान के योग्य हैं।
4. चाणक्य ने चाणक्यनीति लिखी थी।
5. महर्षि वाल्मीकि रामायण के रचयिता हैं।

## खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) 25 अङ्काः

**5. स्थूलपदेषु सन्धिच्छेदम् अथवा सन्धियुक्तं पदं दत्तेभ्यः विकल्पेभ्यः शुद्धं चित्वा उत्तरपुस्तिकायां लिखत–**

(स्थूल पदों में संधि अथवा सन्धिच्छेद युक्त पद को दिए विकल्पों में से शुद्ध चुनकर उत्तर-पुस्तिका में लिखिए। Separate or join bold words and choose the appropriate answer from the options given below answer in the answer sheet.) **1 × 4 = 4**

1. यद्यपि ग्रामस्य आरक्षी एव चौरः + आसीत्।
   (क) चौर आसीत्  (ख) चौरः आसीत्  (ग) चौरासीत्  (घ) चौरा आसीत्
2. केचिद् **वृष्टिभिरार्द्रयन्ति** वसुधाम्।
3. **तदेवाहुः** महात्मानः समत्वमिति तथ्यतः।
4. **अत्यादारः** शङ्कनीयः।

**6. स्थूलपदेषु समासम् अथवा विग्रहं विकल्पेभ्यः चित्वा उत्तरपुस्तिकायाम् लिखत–**

(स्थूल पदों में समास अथवा समास विग्रह को विकल्पों से चुनकर उत्तर-पुस्तिका में लिखिए। Join or disjoin compounds in the bold words choose the appropriate answer from the options given below and write in the answer sheet.) **1 × 4 = 4**

1. यदि न स्यात् **नरपतिः**।
   (क) नराणाम् पति  (ख) नराय पतिः  (ग) नरेण पतिः  (घ) नरः पतिः

2. **अवक्रता** यथाचित्ते तथा वाचि भवेद् यदि।
3. **महत् कम्पनं** जातम्।
4. **'वनस्य दृश्यम्'** समीपे एव एका नदी वहति।

**7. स्थूलपदानाम् 'प्रकृतिप्रत्ययः' पृथक् संयोगो कृत्वा विकल्पेभ्यः शुद्धं उत्तरं चित्वा उत्तरपुस्तिकायाम् लिखत–**
(स्थूल पदों के प्रकृति-प्रत्यय को अलग अथवा संयुक्त करके विकल्पों से शुद्ध उत्तर को चुनकर उत्तर-पुस्तिका में लिखिए। Separate or join suffixes in the bold words and write appropriate answer from the options given below in the answer sheet.) **1 × 4 = 4**

1. तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि **विशेषतः**।
   (क) विशेष + तः (ख) विशेष + तस् (ग) विशेष + तसिल् (घ) विशेष + तसः
2. यत् **प्रोक्तं** येन केनापि तस्य तत्त्वार्थनिर्णयः।
3. **विचित्रा** खलु दैवगतिः।
4. इति भवता **प्रष्टव्याः** स्मः।

**8. निम्नवाक्येषु वाच्यपरिवर्तनं कृत्वा पुनः लिखत–** **1 × 3 = 3**

1. देवेन्द्रः स्वगृहात् प्रातः विद्यालयं ....................। **(गम्)**
   (क) गच्छति (ख) गच्छतः (ग) गच्छन्ति (घ) गच्छसि
2. तेन तत्र छात्राः ....................। **(पठ्)**
3. .................... देवेन्द्रः दृष्ट्वा प्रसीद्यते। (छात्र)

**9. तालिकादत्तपदानि संयोज्य चतुर्वाक्यानि रचयत।**
(तालिका में दिए गए पदों को जोड़कर चार वाक्य बनाइए। Frame four sentences with the help of the words given in the table.) **1 × 4 = 4**

| | | | |
|---|---|---|---|
| सः | किमर्थम् | उपन्यासं | कुर्यात् |
| | यदा-कदा | नूनम् | न कुर्यात् |
| | श्वः | अध्ययनं | पठिष्यति |
| | सम्प्रति | अनुकरणं | न पठतु |

**10. देवदत्तः एकः कृषकः अस्ति। सः कति वादने स्व कार्याणि करोति; अङ्कानां स्थानेषु संस्कृत पदानि लिखत–**
**½ × 4 = 2**

1. देवदत्तः प्रातः (5.00) .................... **उत्तिष्ठति।**
   (क) चतुर्वादने (ख) पञ्चवादने (ग) सपाद पञ्चवादने (घ) सार्ध पञ्चवादने
2. सः प्रातः नित्यकर्मं कृत्वा (5.30) .................... **वादने स्नानं करोति।**
3. पश्चात् सः (6.15) .................... वादने प्रातराशम् करोति।
4. ततः देवदत्तः हलं नीत्वा (6.45) .................... स्वक्षेत्रं प्रति गच्छति।

11. विकल्पेभ्यः शुद्धम् उत्तरं चित्वा रिक्तस्थानानि सम्पूरयत– $1 \times 4 = 4$

(विकल्पों से शुद्ध उत्तर चुनकर खाली स्थानों को भरें। Fill in the blanks by correct words who given below.)

1. ........................................ फलं खादति। (बालक:)
2. मया सह ते अपि .................................... ।

(क) गच्छति (ख) गच्छत: (ग) गच्छसि (घ) गच्छन्ति

3. किं सा ह्यः ........................................ ? (आगम्)
4. सः अकथयत्—अहं पत्रवाहक: .................. । (अस्)

**खण्डः 'घ' (पठित-अवबोधनम्) के प्रश्न**
**पाठ्यपुस्तक पर आधारित हैं तथा 30 अंक के हैं।**